823

१
प्रश०
भा

श्रीसच्चिदानन्दस्वरूपाय परमात्मने नमः ॥ ओंश्रीगणेशाय नमः ॥ अथवैशेषिकदर्शनप्रशस्तपदभाष्यसहिते न्यायकन्द
लीयारव्यारहस्यम् ॥ शङ्करोऽशङ्करो मा पात् कृष्णोऽकृष्णस्तथा मयि। गुरुर्गुरुतमो भूयादत्र दुष्कर कर्मणि ॥१॥ रहस्यं न्या
यकन्दल्याः जमभाषेन शास्त्रिणा। वैशेषिकाधिगन्तृणां बोधसत्वाय रच्यते ॥२॥ ग्रन्थादौ निजेष्टदेवं परमात्मानं शास्त्रकर्तारं
गुरुं पद्यार्द्धेन प्रणमति। निखिलविघ्नोपशमनाय ग्रन्थपरिसमाप्तिफलाप्तये च देवता गुरवश्च नमस्क्रियन्ते इत्यनवद्य
सदाचारत्वात् सर्वदा सर्वत्र प्रेक्षावद्भिरनुष्ठेयत्वादफलो नममाचारः इति सर्वेषां विदुषां मतम् । प्रणम्येति = मया श्री-

मू: प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥१॥

प्रशस्तपादाचार्येणेति शेषः। हेतुं जगतो निमित्तकारणम्। ईश्वरं "स्थेशभासपिसकसो वरच्,, इतीशधातोर्वरच् प्रत्ययः,
सर्वजगतः स्वामिनं प्रणम्य नत्वाऽनु पश्चात् कणादं "कणान् तण्डुलकणान् अत्तीति कणादः,, "कणादस्य कापोती वृत्तिः तिष्ठ मनु
तो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता संज्ञा। मुनिं शुद्धात्मज्ञानप्रदीपक्षपिततमसमत्युग्रतपसं साक्षाद्दृष्ट
तत्वाऽवबोधयुक्तमिति वा प्रणम्यात ईश्वरगुरुप्रणामादनन्तरं पदार्थधर्मसंग्रहः पदार्था द्रव्यादयः षट्, तेषां धर्माः साधा
रणासाधारणस्वभावाः संगृह्यन्ते संक्षेपेणाभिधीयन्तेऽनेनेति पदार्थधर्मसंग्रहः महोदयः महान् उदयः उद्गमः उद्बोधो ज्ञान
मिति यावत् महत्फलमपवर्गलक्षणं यस्मात् संग्रहादसौ महोदयः संग्रहः प्रवक्ष्यते पदार्थधर्माणां संक्षेपेणाभिधायको ग्रन्थः
प्रकर्षेण वक्ष्यते इति ग्रन्थकर्तुः प्रतिज्ञेति। अस्मिन् संसारेऽवलोक्यते द्रव्यं समवायिकारणमित्युक्तेः पृथिव्यादि द्व्यणुकादयः
जगत्कारणम्। गुणकर्ममात्रवृत्तित्वादसमवायिकारणस्येश्वरेच्छाजनितपरमाणुक्रिया, तत्संयोगश्चासमवायिकारणम्। सम
वाय्यसमवायिभिन्नं कारणं सर्वदा निमित्तकारणमेव भवत्यतः ईश्वरः जगतो निमित्तकारणमिति। निमित्तकारणसंसूचनाय
हेतुपदमधायि। शास्त्रान्तरबोधनिरासाय कणादमुनिपदद्वयमुपस्थापितम्। पदार्थसाधर्म्यवैधर्म्ययोर्वक्ष्यमाणत्वात् संग्रह
पदसाफल्यम्। पदार्थसाधर्म्यवैधर्म्यज्ञानादेव मोक्षो जायतेऽतो महोदयपदोपस्थितिः। एतेन संग्रहस्य पदार्थधर्मैः सह वाच्यवाच
कभावस्तत्प्रतिपत्त्या च महोदयेन सह साध्यसाधनभावसम्बन्धो दर्शितः। एतस्मिन् मोक्षोपलब्धिनिमित्तकः षट् पदार्थबोधः

विषयः २ तदध्ययने प्रयोजनम् ३ तज्जिज्ञासुश्चाधिकारी ४ इत्यमनुबन्धचतुष्टयं प्रयोजनीयम् ॥ ननु पदार्थधर्मसंग्रहपरो ग्रन्थो महोदयहेतुरिति नोपपद्यते । शब्दानामर्थप्रतिपादनमन्तरेण कार्यान्तराभावादित्याशङ्क्य पदार्थधर्मप्रत्ययहेतोः संग्रहस्य पारम्पर्येण महोदयहेतुं प्रतिपादयन्नाह - द्रव्येति - द्रव्याणि गुणाश्च कर्माणि च सामान्यञ्च विशेषाश्च समवायश्चेति विभागवचनाऽनुसारेण विग्रहः । उद्देशस्य विभागवचनेन सामान्यविषयत्वात् । ते द्रव्यगुणकर्मसामान्यविशेषसमवायास्तेषां षण्णां षट्संख्यापरिमितानां पदार्थानां पदजन्यप्रतीतिविषयत्वानां साधर्म्यवैधर्म्यतत्त्वज्ञानं, यस्य वस्तुनो यो भावस्तत्तस्य तत्त्वं साधारणो धर्मः साधर्म्यं असाधारणो धर्मो वैधर्म्यं यद्वा विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावः इति, साधर्म्यं वैधर्म्यञ्च साधर्म्यवैधर्म्ये ते एव तत्त्वम् अनारोपितं रूपमित्यर्थः । साधर्म्यवैधर्म्यतत्त्वं तस्य ज्ञानमवबोधो निःश्रेयसहेतुः । श्रेय आत्यन्तिकी दुःखनिवृत्तिः । असत्यसंवेदननिखिलदुःखोपरमरूपत्वापरावृत्तेश्च, निश्चितं श्रेयस्तस्य कारणं द्रव्यादिस्वरूपज्ञानम् । सर्वाधारत्वात्प्रथमं द्रव्यमेव, कर्मापेक्षया गुणबाहुल्याद्द्रव्यमनुगुण एव ।

मू - "द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः ॥ तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव ॥

गुणाऽनुसरण्या तदनु कर्मविधानम् । कर्मान्वितत्वात्सामान्यस्य कर्मोऽनुव्याख्यानम् । पञ्चपदार्थवृत्तेः समवायस्य सर्वविशेषेणाभिधाने प्राप्ते विशेषकथनं मध्ये । अभावस्य नो पार्थक्यं भावप्रतियोगित्वात् । सर्वेषां षण्णां सामान्यलक्षणान्युच्यन्ते । गुणाश्रयत्वं द्रव्यत्वम् । सामान्यवत्त्वमगुणत्वे संयोगविभागेषु अकारणमनपेक्षत्वं गुणसामान्यलक्षणम् । एकद्रव्यत्वमगुणत्वं संयोगविभागयोरनपेक्षकारणत्वं कर्मत्वम् । अनुवृत्तिप्रत्ययकारणत्वं सामान्यत्वम् । अत्यन्तव्यावृत्तिबुद्धिहेतुत्वं विशेषत्वम् । अयुतसिद्धयोराश्रयाश्रयिभावत्वं समवायत्वम् ॥

सः मोक्षः कस्मादेव भवत्यत आह । तदिति = तन्निःश्रेयसं धर्मादेव भवति " यतोऽभ्युदयनिःश्रेयससिद्धिः सः धर्मः " वै० द० १।१।२ इति लक्षणादेव भवति । कीदृशात् धर्मात् " ईश्वरचोदनाभिव्यक्तात् " । चोद्यन्ते प्रेर्यन्ते स्वकार्येऽनयेति चोदना ईश्वरस्य चोदना ईश्वरचोदना ईश्वरेच्छाविशेषः । अभिव्यक्तिः कार्यारम्भं प्रति आभिमुख्यम् । ईश्वरचोदनाभिव्यक्ता । ईश्वरेच्छाविशेषेण कार्यारम्भाभिमुखीकृतादेव निःश्रेयसं भवतीति वाक्ययोजना ॥ तच्चेति चकारः द्रव्यादिसाधर्म्यादिज्ञानेन सह धर्मस्य निःश्रेयसहेतुत्वं समुच्चिनोति । धर्मोऽपि केवलं न निःश्रेयसदो यावन्मर्त्ये ईश्वरेच्छाऽनुग्रहो न स्यात् अत आह " ईश्वरचोद —— " इत्युक्तम् ॥

एवं षट्पदार्थज्ञानस्य पुरुषार्थोपायत्वं निरूप्य प्रत्येकपदार्थभेदजिज्ञासामवतारयति ,,अथेति= कानि द्रव्याणि के च गुणाः कानि च कर्माणि इति धर्मिणि अवच्छेदकेऽवश्यं धर्मो ज्ञायन्तेऽतो धर्मेषु पृथक् प्रश्नः अकारि । किञ्च तेषामित्यादि । अत्रापि चः समुच्चये बोध्यः ।। उत्तरमाह = तत्रेति= तत्र तेषु द्रव्यादिषु मध्ये द्रव्याणि पृथिव्यादीनि - पृथ्वी - मही, आपो - जलम् , तेजः - प्रकाशः(अग्निः), वायुः - मरुत् , आकाशः - व्योम, कालः - समयः, दिक् - दिशा ,आत्मा - (जीवात्मा - परमात्मा) ,मनः - अन्तःकरणम् , इत्यादीनि सर्वाणि सामान्यविशेषसंज्ञया सामान्यसंज्ञया द्रव्यसंज्ञया विशेषसंज्ञया पृथ्व्यादिसंज्ञया उक्तानि सूत्रकर्त्रा कणादेन प्रतिपादितानि नवैव नवसंख्याकानि । तद्व्यतिरेकेण तेभ्यो नवभ्यो व्यतिरेकेण अन्यस्य द्रव्यस्य संज्ञानभिधानात् संज्ञाया अकथनात् । तमसो दशमद्रव्यत्वेन प्रतीयमानत्वात्

मू- अथ के द्रव्यादयः पदार्थाः किञ्च तेषां साधर्म्यं वैधर्म्यञ्च ।

मू- तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञयोक्तानि नवैवेति । तद्व्यतिरेकेणान्यस्य संज्ञानभिधानात् ।।

कुतो नव - यथा गुणवत्त्वक्रियावत्त्वाभ्यां द्रव्यमेव "गुणाश्रयत्वं द्रव्यत्वमित्युक्तलक्षणात्तथा गंधस्पर्शरहितत्वान्न क्षितिः । रसभास्वररूपविरहितत्वात् न जलतेजसी, रूपवत्त्वान्नो मनोवायू । क्रियावत्त्वान्नाकाशादिपञ्चकम् " तमः खलु चले नीलं परापरविभागवत् । प्रसिद्धधर्मवैधर्म्यात् नवभ्यो भेत्तुमर्हति । अतो न नव ~~इति चेन्न - तमो न रूपि द्रव्यम्~~) तथात्वे भावसहकृतेनैव चक्षुषा तत्प्रत्यक्षमुपपद्येत । इति चेन्न तमो न रूपि द्रव्यम् प्रकाशाऽसहकृतचक्षुर्ग्राह्यत्वात् आलोकाऽभाववत् । रूपिद्रव्यचाक्षुषप्रत्यक्षे प्रकाशस्यैव कारणत्वात् । [illegible] । प्रौढप्रकाशकतेजःसामान्याऽभावस्तमः , नीलं तमश्चलतीति प्रतीतिरपि भ्रान्तिकल्पा । सा च आलोकाऽपसारणौपाधिकी भ्रान्तिरेव । तस्माद्रूपविशेषोऽयमत्यन्तं तेजोऽभावे सति सर्वतः समारोपितस्तम इति प्रतीयते । तमोऽधिकद्रव्यस्वीकरणादनन्ताऽवयवप्रागभावादिकल्पनागौरवं स्यात्तस्मान्न दशमं द्रव्यं तम इति । तथा च "द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भावाभावस्तमः ,, वै० ५ । २ । १९ द्रव्यादि सामान्यलक्षणानि यथा - गन्धवत्त्वं पृथ्वीत्वम् । स्नेहवत्त्वं जलत्वम् । उष्णस्पर्शवत्त्वं तेजस्त्वम् । रूपरहितत्वे सति स्पर्शवत्त्वं वायुत्वम् । शब्दगुणवत्त्वमाकाशत्वम् । पदार्थमात्राधारत्वं कालत्वम् । दूरत्वसमीपत्वबुद्धिनियामकत्वं दिक्त्वम् । ज्ञान

वत्वमात्मत्वम् । सुखादिप्रत्यक्षकारणत्वं मनस्त्वमिति । के ते गुणा इत्यत आह । गुणा इति – सूत्रकारेण वै. द. १।१।६ सूत्रे रूपादयः सप्तदश गुणा [illegible]नोक्ताः । गुरुत्वादयोऽन्ये सप्त गुणाः चकारात्प्रदर्शिरे । संस्कारः वेगस्थितिस्थापकभावनाभेदात् त्रिधा । अदृष्टशब्देन धर्माधर्मयोरुपसंग्रहः । चतुर्विंशतिगुणानां सामान्यलक्षणानि लिख्यन्ते । चक्षुर्मात्रग्राह्यत्वे सति विशेषगुणत्वं रूपत्वम् १ रसनेन्द्रियग्राह्यजातिमत्त्वं रसत्वम् २ घ्राणग्राह्यजातिमत्त्वं गन्धत्वम् ३ त्वगिन्द्रियमात्रग्राह्यजातिमद्गुणत्वं स्पर्शत्वम् ४ गणनाव्यवहाराऽसाधारणकारणत्वं संख्यात्वम् ५ परिमितिव्यवहाराऽसाधारणकारणत्वं परिमाणत्वम् ६ पृथग्व्यवहाराऽसाधारणकारणत्वं पृथक्त्वम् ७ विभागजनककर्मजगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं संयोगत्वम् ८ संयोगनाशकगुणत्वं विभागत्वम् ९ परव्यवहाराऽसाधारणकारणत्वं परत्वम् १० अपरव्यवहाराऽसाधारणकारणत्वम् अपरत्वम् ११ सम्बन्धाऽवच्छिन्नप्रकारतानिरूपितप्रकारतासमानाधिकरणगुणत्वव्याप्यजातिमत्त्वं बुद्धेर्लक्षणम् १२

मू. गुणाश्च । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वे बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाश्चेति । कण्ठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्काराऽदृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिगुणाः ॥

धर्मजन्यत्वे सति अनुकूलवेदनीयत्वं सुखत्वम् १३ पापजन्यत्वे सति प्रतिकूलवेदनीयत्वं दुःखत्वम् १४ यत्नसंस्कारभिन्नत्वे सति सम्बन्धाऽनवच्छिन्नप्रकारताकत्वमिच्छालक्षणम् १५ विघ्नोत्पादकज्ञानजन्यगुणत्वं द्वेषत्वम् १६ संस्कारेच्छाभिन्नत्वे सति सम्बन्धाऽनवच्छिन्नप्रकारताकत्वं प्रयत्नम् १७ आद्यपतनाऽसमवायिकारणत्वं गुरुत्वम् १८ स्यन्दनाऽसमवायिकारणत्वं द्रवत्वम् १९ चूर्णादिपिण्डीभावहेतुत्वं स्नेहत्वम् २० तीक्ष्णगतिजनकगुणत्वं वेगत्वम् (१) अनुभवजन्यस्मृतिजनकगुणत्वं भावनात्वम् (२) स्थानप्रचलितवस्तुनः पूर्ववत्स्थापकत्वं स्थितिस्थापकत्वम् (३) (वेगभावनास्थितिस्थापकान्यतमत्वं संस्कारमात्रस्य लक्षणम् २१ स्वर्गाद्युत्पादकयागादिव्यापारत्वं धर्मत्वम् २२ निन्दितकर्मजन्यनरका[illegible]द्युत्पादकगुणत्वं धर्मस्य लक्षणम् २३ श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दत्वम् २४ ॥ श्रीः

श्रीः श्रीः श्रीः

उत्क्षेपणेति = उत्क्षेपणादीनि पञ्चैव कर्माणि । एवकारो न्यूनाऽधिकव्यवच्छेदार्थः वै. द. १।१।७ सूत्रे प्रतिपादितानि । भ्रमणादिषु सत्सु कुतः पञ्चैवेति चेन्न, भ्रमणादीनां गमनग्रहणात् गमने एव लभ्यमानत्वात् गमनविशेषा गमनभेदा एव न जात्यन्तराणि । उत्क्षेपणादीनां लक्षणानि यथा "ऊर्ध्वदेशसंयोगजनकक्रियाऽनुकूलत्वम् उत्क्षेपणत्वम्", "अधोदेशसंयोगजनकक्रियानुकूलत्वम् अपक्षेपणत्वम्", "स्वसन्निकृष्टदेशसंयोगजनकक्रियाऽनुकूलक्रियात्वम् आकुञ्चनत्वम्", "दूरदेशसंयोगजनकक्रियानुकूलक्रियात्वं प्रसारणत्वम्", "उत्तरदेशसंयोगजनकक्रियाऽनुकूलक्रियात्वं गमनत्वम्" ॥ सामान्यमिति = पराऽपरभेदात् सामान्यं द्विविधम् । तत्स्वरूपं यथा "अनुवृत्तिप्रत्ययकारणम् अनुगतप्रतीतिकारणम् । अत्यन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपाऽनुगमः प्रतीयते तत्सामान्यं तत्र परं व्यापकम् । अपरं व्याप्यमित्यर्थः । तत्रेति = तत्र द्वयोर्मध्ये परं सामान्यं सत्तेति तत्र हेतुः महाविषयत्वात् । द्रव्यत्वाद्यपेक्षया बहुविषयत्वादित्यर्थः । सा च सत्ताऽनुवृत्तेरेव स्वाश्रयस्यानुवृत्तेरेव हेतुस्तस्मात्सामान्यमेव । यद्यप्येषा सामान्यादिभ्यो व्यावर्तते, तथाऽपि न तेभ्यः स्वाश्रयं व्यावर्तयितुं शक्नोति तेषां स्वरूपसत्तासम्बन्धिसंवेद्यत्वात् । स्वसमानाधिकरणात्यन्ताऽभावाप्रतियोगित्वमिति तत्त्वम् ।

"कर्माणि विभजते"

मू. = उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव कर्माणि । गमनग्रहणाद् भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नमनादयो गमनविशेषा न जात्यन्तराणि ।

"सामान्यं कथयति" सामान्यं द्विविधं परमपरञ्चानुवृत्तिप्रत्ययकारणम् । "किं तत्परं सामान्यमित्यत आह" तत्र परं सत्ता महाविषयत्वात् । सा चाऽनुवृत्तेरेव हेतुत्वात्सामान्यमेव । "किमपरं सामान्यमित्यत आह" द्रव्यत्वाद्यपरमल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यं सद्विशेषाख्यमपि लभते । "अथ विशेषमभिधत्ते" नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः ।

द्रव्यत्वेति = द्रव्यत्वं गुणत्वं कर्मत्वञ्चापरं सत्ताऽपेक्षयाऽल्पविषयत्वात् अल्पस्थाननिवासविषयत्वात् इत्यर्थः । तत्र द्रव्यत्वापेक्षया पृथिवीत्वादिकमपरं तदपेक्षया घटत्वादिकमपरम् । गुणत्वापेक्षया रूपत्वादिकमपरम् । कर्मत्वापेक्षयोत्क्षेपणादिकमपरम् । तच्च द्रव्यत्वादिकं स्वविषयस्य विजातीयेभ्योऽपि व्यावृत्तिहेतुत्वात्सामान्यं सद्विशेषाख्यां विशेषसंज्ञां लभते । व्यावृत्तेरपि हेतुत्वाद्विशेषसंज्ञामपि लभते । स्वसमानाऽधिकरणात्यन्ताऽभावप्रतियोगित्वमपरसामान्यम् । नित्येति = नित्येषु द्रव्येषु वृत्तिर्येषामिति नित्यद्रव्यवृत्तयस्तथा अन्त्या अन्तेऽवसाने भवन्तीत्यन्त्याः येभ्यः परं न कश्चिदप्यस्ति तथाभूता विशेषाः सन्ति । स्वाश्रयो विशिष्यते सर्वतो व्यवच्छिद्यते येन स विशेषः बहुत्वे विशेषाः इति ।

श्री: श्री: श्री:

ननु विशेषाः किं विशेषा एव? किं वा द्रव्यत्वादिवदुभयरूपा इति तत्राह। ते इति = त्वर्थकः चः, निश्चयार्थकः खलुः। नित्यद्रव्यवृत्तयो ये विशेषास्ते विशेषा एव निश्चिताः न तु सामान्येऽपि भवन्तीत्यर्थः। तत्र हेतुः। अत्यन्तं सर्वदा व्यावृत्तेरेव स्वाश्रयस्येतरस्माद् व्यवच्छेदस्यैव हेतुत्वात् कारणत्वादिति। समवायस्वरूपं निरूपयति। अयुतेति = युतसिद्धिः पृथक्सिद्धिः पृथगवस्थितिरुभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वं सा ययोर्नास्ति तावयुतसिद्धौ तयोः सम्बन्धः समवायः। ययोर्द्वयोर्मध्ये एकमविनश्यत् पराश्रितमेवावतिष्ठते तावयुतसिद्धौ तौ पञ्चविधौ। अवयवावयविनौ १ गुणगुणिनौ २ क्रियाक्रियावन्तौ ३ जातिव्यक्ती ४ विशेषनित्यद्रव्ये ५ यथा तन्तुपटयोः समवायः यथा यद्यपि तन्तवः पटव्यतिरिक्ताश्रये समवयन्ति तथाऽप्युभयोर्मिथः परिहारेण पृथगाश्रयाश्रयित्वं नास्ति पटस्य तन्तुष्वेवाश्रितत्वात्। यत्र तु द्वयोरपि सम्बन्धिनोः परस्परपरिहारेण व्यतिरिक्ताश्रयाश्रयित्वं तत्र युतसिद्धिः। यथा त्वगिन्द्रियशरीरयोः। शरीरं हि त्वगिन्द्रियपरिहारेण पृथगाश्रये स्वावयवे समाश्रितम्। तेन अनयोः संयोगः न तु समवायः। नित्यानां तु युतसिद्धिः

मू. ते च खल्वत्यन्तव्यावृत्तिहेतुत्वाद्विशेषा एव। अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इहप्रत्ययहेतुः स समवायः। एवं धर्मैर्विना धर्मिणामुद्देशः कृतः। षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि। आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः।

पृथगवस्थितिः पृथग्गमनयोग्यता सा ययोर्नास्ति तावयुतसिद्धौ। तयोर्यः सम्बन्धः स समवायः, यथाऽऽकाशद्रव्यत्वयोरिति। आधार्याधारभूतानां माश्रय्याश्रयाणामयुतसिद्धानामिह अत्र प्रत्ययहेतुः निश्चयहेतुः यः सम्बन्धः स समवायः समवायरूपः। यद्वा अयुताः प्राप्ताश्च ते सिद्धाश्चेत्ययुतसिद्धाः प्राप्ता एव सन्ति न वियुक्ताः इति यावत्तेषां नित्यप्राप्तिलक्षणः समवायः॥ अनुद्दिष्टेषु धर्मिषु धर्मा न शक्यन्ते वक्तुमतो धर्मिणामुद्देशं प्रक्रमयितुं संगतिं प्रदर्शयति। एवमिति = एवं पूर्वोक्तप्रकारेण धर्मैर्विना धर्मान् परित्यज्य धर्मिणां धर्मविशिष्टानामुद्देशः कृतो धर्मिणां संज्ञामात्रेण संकीर्तनं कृतमिदानीं धर्मा उद्दिश्यन्ते इतिभावः॥ यद्यपि धर्माः पदार्थेभ्योऽव्यतिरिक्तास्तथाऽपि तेषां धर्मिरूपतया परिज्ञानाय पृथगुद्देशो विधीयते। षण्णामिति = द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानाम् अस्तित्वं यस्य वस्तुनो यत्स्वरूपं तदेव तस्यास्तित्वम्। अभिधेयत्वम् = अभिधानप्रतिपादनयोग्यत्वं तच्च वस्तुनः स्वरूपमेव भावस्वरूपमेव अवस्थाभेदेन ज्ञेयत्वं ज्ञानविषयत्वम् अभिधेयत्वञ्च साधर्म्यमुच्यते। आश्रितत्वं साधर्म्यं प्रतिपादयति। आश्रितत्वमिति नित्यद्रव्येभ्यः चतुर्विधपरमाण्वाकाशकालदिगात्ममनोभ्योऽन्यत्र व्यतिरिक्तानां मनित्यद्रव्याणामाश्रितत्वं साधर्म्यमुक्तम्॥ श्री:

द्रव्यादीनां विशेषान्तानां साधर्म्यं साधयति। द्रव्येति = द्रव्यमादिर्येषां तथाभूतानां द्रव्यादीनां पञ्चानां द्रव्यगुणकर्मसामान्यविशेषाणां सम
वायित्वं समवायलक्षणवृत्तिमत्त्वम्। अनेकत्वं परस्परविभिन्नत्वमितरेतरव्यावृत्तं स्वरूपमेव साधर्म्यम्। गुणादीनां समवायान्तानां साधर्म्यमा
चष्टे। गुणेति = गुणप्रभृतीनां पञ्चानां पदार्थानां गुणकर्मसामान्यविशेषसमवायानां निर्गुणत्वं गुणाऽभावविशिष्टत्वं निष्क्रियत्वं क्रियाऽभाव-
विशिष्टत्वं साधर्म्यम्। द्रव्यादीनां कर्मान्तानां साधर्म्यमाह। द्रव्यादीनामिति = द्रव्यादीनां त्रयाणां द्रव्यगुणकर्मणां सत्तासम्बन्धः सत्तया
सामान्येन सम्बन्धः समवायरूपो द्रव्यगुणकर्मणां साधर्म्यम्। सामान्यविशेषवत्त्वम् अनुवृत्तिव्यावृत्तिहेतुत्वात् सामान्यविशेषा द्रव्यत्वादयः
तैः सह सम्बन्धो द्रव्यादीनां स च समवाय एव। स्वसमवायार्थशब्दाभिधेयत्वं स्वसमवानामर्थानां द्रव्यगुणकर्मणां शब्दाभिधेयत्वं सा
धर्म्यम्। वैशेषिकैः स्वयं व्यवहाराय यः संकेतो व्यधायि शास्त्रेऽस्मिन्नर्थशब्दा द्रव्यगुणकर्माणि प्रतिपत्तव्यानि। तेन द्रव्यादीनि त्रीणि नि
रुपपदेनार्थशब्देनोच्यन्ते। धर्माधर्मकर्तृत्वञ्च धर्माधर्मोपपत्तिनिमित्तत्वम्। त्रयाणामुदाहरणानि यथा हि भूमिरेकैव दीयमानाऽपहृय

मूः- द्रव्यादीनां पञ्चानां समवायित्वमनेकत्वञ्च। गुणादीनां पञ्चानामपि निर्गुणत्व
निष्क्रियत्वे। द्रव्यादीनां त्रयाणामपि सत्तासम्बन्धः सामान्यविशेषवत्त्वं स्वसम
वायार्थशब्दाभिधेयत्वं धर्माधर्मकर्तृत्वञ्च। कार्यत्वानित्यत्वे कारणवतामेव।
कारणत्वञ्चान्यत्र पारिमाण्डल्यादिभ्यः।

धर्माऽधर्मयोः कारणम्। एकः संयोगः द्वयोः कारणम् यथा कपिलास्पर्शो नराऽस्थिस्पर्शश्च। एवं कर्माऽप्युभयकारणं यथा तीर्थगमनं
शौण्डिकगृहगमनञ्च। धर्माधर्मकर्तृत्वमित्यत्र त्वप्रत्ययेन धर्माधर्मजननं प्रति तेषां निजा शक्तिरुच्यते। साधर्म्यद्वयसूचनाय चकारः।
कारणत्वं साधर्म्यमाह। कार्यत्वेति = येषां द्रव्यादीनामुत्पत्तिकारणमस्ति ते कारणवन्तस्तेषां कारणवतामेव कार्यत्वम् अनित्यत्वं साधर्म्यं
न च सर्वेषामित्यर्थः। स्वरूपविनाश एवानित्यत्वम् इति सिद्धान्तः। यथोक्तम् "अनित्यत्वं विनाशाख्यं क्रियासामान्यमुच्यते" इति। यद्यपि
विनाशो वस्तुस्थितिकाले नास्ति, तथापि प्रमाणान्तरसिद्धसद्भावो भवत्येव विशेषणम्। अनित्यो घटः [redacted] इति प्रत्येतुरेकत्वात्, तथा
लोके विना शरीरम् अध्रुवाविषया इति। पारिमाण्डल्यव्यतिरिक्तानां साधर्म्यं प्रवक्ति। कारणत्वमिति = पारिमाण्डल्यमिति परमाणुपरिमा
णम् आदिशब्दात् द्व्यणुकपरिमाणमाकाशकालदिगात्मनां विभुत्वम्, अन्त्यशब्दमनःपरिमाणं परत्वापरत्वे द्विपृथक्त्वमन्यावयविपरि
माणञ्चेत्यादि ग्राह्यम्। एतानि परित्यज्य अपरेषां द्रव्यादीनां त्रयाणां कारणत्वं समवाय्यसमवायिकारणत्वं साधर्म्यम्। यद्यपि
द्रव्यस्यासमवायिकारणत्वं नास्ति न च गुणकर्मणोः समवायिकारणत्वं तथापि निमित्तकारणविलक्षणतया इदं साधर्म्यमुक्तमित्यर्थः॥

नित्यद्रव्यसाधर्म्यमाह । द्रव्याश्रितत्वमिति = द्रव्यग्रहणमुपलक्षणम् । नित्यगुणेभ्य इत्यप्यवलोकनीयम् । तद्वृत्तयोऽन्त्या विशेषास्तेऽपि गृह्यन्ते । नित्यद्रव्याणि तद्वृत्तांश्च तद्गुणान् विहाय द्रव्य एवाश्रितत्वं द्रव्यसमवायिकारणत्वं गुणासमवायिकारणत्वं साधर्म्यम् द्रव्यादीनाञ्च त्रयाणां साधर्म्यं नाऽपरेषामित्यर्थः । सम्प्रति सामान्यादीनां साधर्म्यमाह । सामान्यादीनामिति = सामान्यम् आदिर्येषु द्रव्येषु तथाभूतास्तेषां सामान्यादीनां त्रयाणां सामान्यविशेषसमवायानां स्वात्मसत्त्वं स्वात्मैव सत्वं स्वरूपं यत्सामान्यादीनां तदेव तेषां सत्वं न सत्तायोगः सत्त्वम् । एतेन सामान्यादीनां त्रयाणां सामान्यरहितत्वं साधर्म्यमुक्तमित्यर्थः । बुद्धिलक्षणत्वम् बुद्धिरेव लक्षणं प्रमाणं येषां ते बुद्धिलक्षणाः विप्रतिपन्नसामान्यादिसद्भावे बुद्धिरेव लक्षणं नान्यत् । द्रव्यादिसद्भावे त्वन्यदपि तत्कार्यं प्रमाणं स्यादित्यर्थः । यद्वा बुद्ध्या लक्ष्यन्ते प्रतीयन्ते इति बुद्धिलक्षणाः । इतितन्न द्रव्यादेरपि स्वबुद्धिलक्षणत्वादिदं वैधर्म्यमुक्तं स्यात् । अकार्यत्वं कारणानपेक्षस्वभावत्वं । अकारणत्वं समवाय्यसमवायिकारणत्वाऽभावः न तु निमित्तकारणप्रतिषेधो बुद्धिनिमित्तत्वाऽभ्युपगमात् । असामान्यविशेषवत्त्वम् परजातिरहितत्वमित्यर्थः । सामान्येषु सामान्यं नाम नापरं सामान्यमस्ति । नित्यत्वं विनाशरहितत्वम् । अर्थशब्दाऽभिधेयत्वं चैतेषां साधर्म्यम् । चः समुच्चयेऽस्ति ।

मू॰ द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः । सामान्यादीनां त्रयाणां स्वात्मसत्वं बुद्धिलक्षणत्वमकार्यत्वमकारणत्वमसामान्यविशेषवत्वं नित्यत्वमर्थशब्दानभिधेयत्वञ्चेति । पृथिव्यादीनां नवानामपि द्रव्यत्वयोगः स्वात्मन्यारम्भकत्वं गुणवत्वं कार्यकारणाऽविरोधित्वमन्त्यविशेषवत्वम् ।

इदानीं द्रव्याणामेव साधर्म्यं निरूपयति । पृथिव्यादीनामिति = पृथिव्यादीनां नवानां पृथिव्यप्तेजोमरुद्व्योमकालदिगदेहिमनसां द्रव्यत्वयोगः द्रव्यत्वेन सामान्येन योगः सम्बन्धः । स्वात्मन्यारम्भकत्वं स्वसमवेतकार्यजनकत्वमित्यर्थः । गुणवत्वं गुणैः सह सम्बन्धः । कार्यकारणाविरोधित्वं कार्यकारणयोरविरोधित्वं विरोधपरिरहितत्वम् । द्रव्याणि न कार्येण विनाश्यन्ते नाऽपि कारणेन कार्यकारणाऽविरोधीनि । नित्यानां कारणविनाशयोरभावादेव कारणेनाऽविनाशः, अनित्यद्रव्याणां कारणविनाशयोः सम्भवेऽपि कारणेन न विनाशः किन्त्वन्येनेति विवेकः । गुणकर्मणोस्तु विनाशो यथा । "गुणो हि क्वचित्कार्येण विनाश्यते यथाऽऽद्यः शब्दः द्वितीयशब्देन, क्वचित्कारणेन विनाश्यते यथाऽन्त्यः शब्दः उपान्त्यशब्देन । कर्माऽपि कारणेन विनाश्यते यथोत्तरसंयोगेन । अन्त्यविशेषवत्त्वम् अन्त्यविशेषयोगित्वमित्यर्थः । इत्यत्र अपि शब्दः अभिव्याप्त्यर्थः ।

श्री: श्री: श्री:

अनाश्रितत्वं क्वचिद् व्यसमवेतत्वं नित्यत्वं विनाशरहितत्वञ्च द्रव्याणां साधर्म्यं तत्किं सर्वेषां साधर्म्यमित्यत आह। अनाश्रितेति = अवयविद्रव्येभ्योऽन्यत्र अवयविद्रव्याणि परित्यज्यान्त्यविशेषवत्त्वानाश्रितत्वनित्यत्वानि सन्तीत्यर्थः। पृथ्व्यादीनां द्रव्याणामेव परस्परसाधर्म्यं वैधर्म्यञ्च प्रतिपादयन्नाह। पृथिवीति = पृथिवीजलाग्निवाय्वात्ममनसामनेकत्वं प्रत्येकं व्यक्तिभेदः। अपरजातिमत्त्वं पृथिवीत्वादिजातिसम्बन्धित्वम्। क्षितिजलज्योतिरनिलमनसां साधर्म्यमाह। क्षितीति = पृथिव्युदकाग्निपवनमनसां क्रियावत्त्वमुत्क्षेपणादिक्रियायोगः। मूर्तत्वं परिच्छिन्नपरिमाणयोगित्वम्। परत्वापरत्ववेगवत्त्वानि परत्वापरत्ववेगसमवायः। आकाशकालदिगात्मनां साधर्म्यमाह। आकाशेति = आकाशकालदिगात्ममनसां सर्वगतत्वं सर्वैर्मूर्तैः सह संयोगः आकाशादीनां न तु सर्वत्र गमनं तेषां निष्क्रियत्वात्। सर्वशब्देनात्र प्रकृतापेक्षयाऽनन्तरोक्तानि मूर्तद्रव्याणि परामृश्यन्ते। परममहत्त्वमियत्ताऽनवच्छिन्नपरिमाणयोगित्वम्। सर्वसंयोगिसमानदेशत्वं च सर्वेषां संयोगिनां मूर्तद्रव्याणामाकाशः समानो देशः एकः आधार इत्यर्थः, एवं साधर्म्यं दिगादिष्वपि व्याख्येयम्।

मू. अनाश्रितत्वनित्यत्वे चान्यत्रावयविद्रव्येभ्यः। पृथिव्युदकज्वलनपवनात्ममनसामनेकत्वापरजातिमत्त्वे। क्षितिजलज्योतिरनिलमनसां क्रियावत्त्वमूर्तत्वपरत्वापरत्ववेगवत्त्वानि। आकाशकालदिगात्ममनसां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वञ्च। पृथिव्यादीनां पञ्चानामपि भूतत्वेन्द्रियप्रकृतित्वबाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि। चतुर्णां द्रव्यारम्भकत्वस्पर्शवत्त्वे।

पृथिव्यादीनामाकाशान्तानामितरेतरवैधर्म्येण साधर्म्यं कथयति। पृथिव्यादीनामिति = पृथिव्यादीनां पञ्चानां पृथिव्यप्तेजोमरुद्व्योम्नां भूतत्वं भूतशब्दवाच्यत्वम्। इन्द्रियप्रकृतित्वमिन्द्रियस्वभावत्वम्। बाह्यैकैकेन्द्रियग्राह्यविशेषगुणवत्त्वानि। बाह्यैः बहिःप्रत्यक्षैरेकैकैश्चक्षूरसनाघ्राणत्वक्श्रोत्रैर्ग्राह्या ग्रहणयोग्या ये विशेषगुणाः रूपरसगंधस्पर्शशब्दास्तैस्तद्वत्ता पृथिव्यादीनां साधर्म्यम्। अन्तःकरणग्राह्यत्वमप्येषां गुणानामस्ति, तत्श्चैकैकेन्द्रियग्राह्यत्वमसिद्धं तदर्थं बाह्यग्रहणम्। एकैकग्रहणं स्वरूपकथनार्थम्। पृथिव्युदकाऽनलानिलानां साधर्म्यमाह। चतुर्णामिति = चतुर्णां पृथिव्युदकानलानिलानां द्रव्यारम्भकत्वं द्रव्यं प्रति समवायिकारणभावः। स च निजा शक्तिरेव। स्पर्शवत्त्वं स्पर्शसमवायः। श्रीः श्रीः श्रीः

क्षित्युदकतेजसां साधर्म्यमाह = त्रयाणामिति = त्रयाणां क्षित्युदकतेजसां प्रत्यक्षत्वमिन्द्रियजज्ञानप्रतिभासमानता न तु महत्त्वादिकारणयोगः रूपवत्त्वं रूपसमवायः । द्रवत्वं स्पन्दता । पृथिव्युदकयोः साधर्म्यमाह । द्वयोरिति = द्वयोः पृथिव्युदकयोर्गुरुत्वं नाम गुणान्तरम् । तस्य भावात् पृथिव्यामुदके च गुरुशब्दनिवेशः । रसवत्त्वञ्च रससमवायः । भूतात्मनां साधर्म्यमाह । भूतात्मनामिति = भूतात्मनां भूतानां पृथिव्यप्तेजोवायुनभसामात्मनाञ्च वैशेषिकगुणयोगः । विशेषो व्यवच्छेदः विशेषाय स्वाश्रयस्येतरेभ्यो व्यवच्छेदाय प्रभवन्तीति वैशेषिकाः रूपादयस्तद्योगो भूतात्मनाम् । क्षित्युदकात्मनां साधर्म्यमाह । क्षितीति = क्षित्युदकात्मनां क्षितेः उदकस्य आत्मनश्च चतुर्दश गुणवत्त्वं चतुर्दशगुणयोगत्वसाधर्म्यम् । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुरुत्व द्रवत्वरूपरसगंधा एते चतुर्दश गुणा क्षितौ सन्ति । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगगुरुत्व द्रवत्व रूपरसस्नेहा एते चतुर्दश गुणा जले सन्ति । बुद्धिसुखदुःखेच्छा द्वेषप्रयत्न संख्यापरिमाणपृथक्त्वसंयोगविभाग भावनाधर्माधर्मा एते चतुर्दशगुणा आत्मनि सन्ति । आकाशात्मनां च क्षणिकैकदेशवृत्तिभिर्विशेषगुणैः सह योगो विद्यते इत्यत आह । आकाशात्मनामिति = इत्यत्र

मू॰ त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वानि । द्वयोर्गुरुत्वं रसवत्त्वञ्च । भूतात्मनां वैशेषिकगुणवत्त्वम् । क्षित्युदकात्मनां चतुर्दशगुणवत्त्वम् । आकाशात्मनां क्षणिकैकदेशवृत्तिविशेषगुणवत्त्वम् । दिक्कालयोः पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां निमित्तकारणत्वञ्च ।

विशेषगुणा पृथिव्यादीनामपि सन्ति तन्निवृत्त्यर्थमेकदेशवृत्तिग्रहणम्[*] । ये च ते आकाशात्मनामव्याप्यवृत्तयो विशेषगुणास्तेषामाशुतरविनाशित्वञ्च स्वरूपमस्तीति क्षणिककीर्तनं कृतम् । यथा वा अव्याप्यवृत्तिक्षणिक विशेषगुणवत्वमाकाशात्मनां साधर्म्यम् । दिक्कालयोः गुणान् साधर्म्यञ्चाह । दिक्कालयोरिति = दिक्कालयोः पञ्चगुणवत्त्वं सर्वोत्पत्तिमतां सर्वेषां कार्याणां निमित्तकारणत्वं साधर्म्यम् । यत्र देशे काले च कारणानि भवन्ति तत्र तेषां जनकत्वं नान्यत्रेत्यभ्युपेतव्यं विशिष्टदेशकालयोरङ्गत्वं कार्यजननाय तयोः कारणैरपेक्षणीयत्वात् । इदमेव च देशस्य कालस्य च निमित्तत्वं यदेकत्र कार्योत्पत्तिरन्यत्रानुपपत्तिरिति । दिशि काले च संख्यापरिमाणपृथक्त्वसंयोगविभागा एते पञ्चैव गुणाः । श्री ॥

श्री ॥

* एकदेशवृत्तिरव्याप्यवृत्तिः । यदा किञ्चिदवच्छेदेन शब्दः श्री ॥
श्री । उत्पद्यते तदाऽन्याऽवच्छेदेन तदभावस्यापि सत्त्वात् श्री ॥
एवं ज्ञानादिकं यदा मनसि विभौ शरीराद्यवच्छे-
पं॰ देनोत्पद्यते तदा घटाद्यवच्छेदेन तदभावोऽप्यस्त्येव ।

११
प्रश.
भा. स्टी.

क्षितितेजसोः साधर्म्यमाह । क्षितितेजसोरिति = पृथिव्यग्न्योर्नैमित्तिकद्रवत्वयोगः । निमित्तादुपजातं नैमित्तिकं तद्द्रवत्वञ्चेति नैमित्तिकद्रवत्वं तेन सह क्षितितेजसोर्योगः । यथा पार्थिवस्य सर्पिरादेस्तैजसस्य च सुवर्णरजतादेरग्निसंयोगेन विलयनात् । अधुना साधर्म्यवैधर्म्यसमाप्तिमाह एवमिति = एवमनेनैव न्यायेन सर्वत्र सर्वस्मिन् पदार्थेऽन्यदपि साधर्म्यं समानधर्मत्वं स्वयं वाच्यं विपर्ययादितरव्यावर्तते वैधर्म्यं विरुद्धधर्मत्वञ्च वाच्यमितीत्थं द्रव्यासङ्करः द्रव्याणामसङ्करत्वं "संकरो नाम जात्यन्तरे जात्यन्तरसमावेशः" "यद्वा परस्परात्यन्ताऽभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः सङ्करः । सम्प्रति द्रव्यादीनां विशेषलक्षणार्थं प्रकरणमारभ्यते ॥ इहेति = पूर्वं द्वयोर्बहूनां परस्परापेक्षया वैधर्म्यमुक्तम् । इह वक्ष्यमाणे प्रकरणे इदानीं सम्प्रति एकैकश एकैकस्य द्रव्यस्य वैधर्म्यं व्यावर्तको धर्म उच्यते कथ्यते ॥ उद्देशक्रमेण पृथिव्याः प्रथमं वैधर्म्यमाह ॥ पृथिवीति = इयं पृथिवीति व्यवहर्तव्या पृथिवीत्वाऽभिसम्बन्धात् । यत् पुनः पृथिवीति न व्यवह्रियते न तत्पृथिवीत्वेनाभिसम्बद्धम् । यथाबादिकम् । या लोके पृथिवीति व्यपदिश्यते सा पृथिवी पृथि

विपर्ययाद्

मू: = क्षितितेजसोर्नैमित्तिकद्रवत्वयोगः । एवं सर्वत्र साधर्म्यं वैधर्म्यं च वाच्यमिति द्रव्यासङ्करः । इहेदानीमेकैकशो वैधर्म्यमुच्यते । पृथिवीत्वाभिसम्बन्धात् पृथिवी । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः । चाक्षुषवचनात् सप्त संख्यादयः । पतनोपदेशाद् गुरुत्वम् । अद्भिः सामान्यवचनाद् द्रवत्वम् । उत्तरकर्मवचनात् संस्कारः ॥

वीत्वाभिसम्बन्धात् । पृथिवीत्वं नाम सामान्यविशेषास्तेनाभिमतः सम्बन्धः समवायलक्षणस्तस्मात् । यद्वा समवायेन गन्धवत्त्वं पृथिव्याः लक्षणम् । गन्धसहचरितचतुर्दशगुणवत्त्वमपि पृथिव्या इतरेभ्यो वैधर्म्यमिति प्रतिपादयन्नाह । रूपरसेति = रूपादिसंस्कारान्तचतुर्दशगुणवती पृथिवी चतुर्दश गुणाः पृथिव्यामेवेत्यर्थः । इत्यत्र द्वन्द्वानन्तरं मतुप्प्रत्यययोगात् प्रत्येकं रूपादीनां पृथिव्या सह सम्बन्धो लभ्यते । सूत्रकारस्याप्येते गुणाः पृथिव्यामभिमताः इत्यत आह "एते चेति" गुणविनिवेशाधिकारे गुणानां विनिवेशो द्रव्येषु समवायः स च द्वि[redacted]प्रतिपाद्यत्वेनाधिक्रियतेऽस्मिन्निति गुणविनिवेशाधिकारो द्वितीयाऽध्यायस्तस्मिन् गुणविनिवेशाधिकारे रूपादयो रूपरसगंधस्पर्शाः गुणविशेषा गुणभेदाः पृथिव्यां सिद्धाः प्रतिपादिताः । रूपरसगन्धस्पर्शवती पृथिवीति । संख्यादयः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे रूपिद्रव्यसमवायाच्चाक्षुषाणीति । चाक्षुषवचनाद्रूपवत्यां पृथिव्यां संख्यादयः सप्त सिद्धाः । पतनोपदेशादिति संयोगप्रयत्नाऽ

भावे गुरुत्वात्पतनमित्युपदेशात् सूत्रकारेण पतनसम्बन्धिन्यां पृथिव्यां गुरुत्वमस्तीति। अद्भिरिति = सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यमिति वचनात्पृथिव्यां नैमित्तिकं द्रवत्वमस्तीत्युक्तम्। उत्तरकर्मेति = नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरमुत्तरञ्चेति सूत्रकारेण इषौ पार्थिवद्रव्ये कर्महेतुः संस्कार इति दर्शयता पृथिव्यां वेगोऽस्तीति ज्ञापितम्। अविद्यमानस्याहेतुत्वात्।

पृथिव्या गन्धादीन्निरूपयति। क्षिताविति = पृथिव्यां गन्धः। यो गन्धो जलवाय्वोः प्रतीयते स चापि पार्थिवसम्बन्धेन भवति न वस्तुतो जलादिषु गन्धो विद्यते पार्थिवद्रव्याऽभावे तदनुपलम्भात् गन्धवत्त्वं पृथिव्या एव लक्षणमित्यर्थः। यद्यपि रूपं पृथिव्यप्तेजसां तथाऽप्यवान्तरभेदाऽपेक्षया तदपि पृथिव्या एव वैधर्म्यमाह। रूपमिति = पृथिव्या रूपं शुक्लादि अनेकप्रकारं बहुविधं एकमिश्रमित्यर्थः। तत्र रूपाणि सप्तविधानि शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्। तत्र पृथिव्यामेव सप्तविधं रूपं नान्यत्र। मधुरादिरसः षड्विधः षट्प्रकारकः, मधुराम्ललवणकटुकषायतिक्तभेदात्। गन्धो द्विविधः। तदेव द्वैविध्यं दर्शयति। सुरभिरसुरभिश्चेति। असुर-

मू. क्षितावेव गन्धः। रूपमनेकप्रकारं शुक्लादि। रसः षड्विधो मधुरादिः। गन्धो द्विविधः सुरभिरसुरभिश्च। स्पर्शोऽस्या अनुष्णशीतत्वे सति पाकजः। सा तु द्विविधा नित्या चानित्या च। परमाणुलक्षणा नित्या।

भिरिति। सुरभिगन्धविरुद्धं प्रतिद्रव्यादिसमवेतं प्रतिकूलसंवेदनीयं गन्धान्तरं न तु तदभावमात्रं विधिरूपेण सातिशयतया च संवेदनात्। अथवा सोऽप्यसुरभिरेव सुरभिगन्धादन्योऽसुरभिरिति व्युत्पादनात्। अस्याः पृथिव्याः स्पर्शोऽनुष्णाशीतत्वे सति पाकजः पाकोद्भवः। अप्रतीयमानपाकजेषु स्तम्भादिषु स्पर्शस्य पाकजत्वमनुमानादेव यथा "स्तम्भादिषु स्पर्शः पाकजः पार्थिवस्पर्शत्वात् घटादिस्पर्शवत्। घटादिस्पर्शस्याऽपि पाकजत्वमेकेन्द्रियग्राह्यत्वे सति तद्गतरूपवत्। अवान्तरभेदनिरूपणमाह। सेति सा पृथिवी तु द्विविधा द्विप्रकारवती नित्या च अनित्या च। इत्यत्र चशब्दौ अन्योन्यसमुच्चयार्थौ नियमनिराकरणपरौ। तत्र का नित्या इत्युत्तरं ददाति परमाणुलक्षणा नित्या इत्यत्र लक्षणशब्दः स्वभावार्थः परमाणुस्वभाववती नित्या सर्वदाऽविनाशिनी। परमाणुस्वभावायाः पृथिव्याः सत्वेऽनुमानं प्रमाणमेव। यथाऽणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत्। यत्रेदं विश्रान्तम्। यतः परमाणुर्नास्ति स परमाणुः। अत एव नित्यो द्रव्यत्वे सति अनवयवत्वादाकाशवत्।

अनित्यां पृथिवीं निरूपयति = ~~[illegible]~~ कार्यलक्षणेति = कार्यलक्षणा पृथिवी सा च अनित्या नश्वरी कारणविभागस्याश्रयविनाशस्य च हेतोः सम्भवात्। सा पृथिवी "स्थैर्यो —" इति स्थैर्यं निबिडत्वं चिरकालाऽवस्थायित्वम्। आदिशब्दात् प्रशिथिलत्वादि परिग्रहः। अवयवानां सन्निवेशोऽवयवसंयोगविभागविशेषः। स्थैर्यादयश्चावयवसन्निवेशाश्च तैर्विशिष्टा अपरजाति बहुत्वोपेता गोत्वादिजाति भूयस्त्व युक्तेत्यर्थः। नन्वदृष्टकारिता सर्वभावानां सृष्टिः। कार्यलक्षणा पृथिवी कामर्थक्रियां पुरुषस्य जनयति येनेयमदृष्टेन क्रियते इत्यत आह शयनासनेति शयनं शय्या आसनं स्थितिः ते आदिर्येषु तथाभूतेषु कार्येषु येऽनेके उपकारास्तत्कारिणी कार्यलक्षणाऽऽदिपदाद्भ्रमणकृषिकर्मादिग्रहः। चकारश्च बहुविधाभिधाता ह्यनेकोपकारकरीति सूचयति। पृथिव्याः कार्यादिभेदान् निरूपयति। त्रिविधमिति = अस्याः पृथिव्याः शरीरमिन्द्रियं विषयः इति संज्ञा यस्य कार्यस्य तत्कार्यं त्रिविधं त्रिप्रकारकम्। भोक्तुर्भोगायतनं शरीरम्, आत्मविशेषगुणकारणमनःसंयोगवदन्त्यावयविमात्रवृत्तिजातिमत्त्वं वा शरीरम्, मृतशरीरे तद्योग्यत्वात्तद्व्यपदेशः। शरीराश्रयं ज्ञानपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रियं शरीरेन्द्रियव्यतिरिक्तमात्मोपभोगसाधनं द्रव्यं विषयः। शरीरभेदं कथयति। शरीरमिति = द्विविधं शरीरं योनिजम्। अयोनिजञ्चेति।

मू॰ कार्यलक्षणा त्वनित्या। सा च स्थैर्याद्यवयवसन्निवेशविशिष्टाऽपरजाति बहुत्वोपेता शयनासनाद्यनेकोपकारकरी च। त्रिविधं चाऽस्याः कार्यम्। शरीरेन्द्रियविषयसंज्ञकम्। शरीरं द्विविधम्। योनिजमयोनिजञ्चेति। तत्रायोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्योऽणुभ्यो जायते। ~~[illegible]~~।

शुक्रशोणितसन्निपातो योनिस्तस्माज्जातं योनिजं तद्विपरीतमयोनिजम्। तदेव दर्शयति। तत्रायोनिजमिति = तत्र तयोर्योनिजायोनिजयोर्मध्येऽयोनिजं शुक्रशोणितमनपेक्ष्यापेक्षां परिहृत्य देवर्षीणां देवानां ऋषीणाञ्च शरीरं शुक्रशोणिताऽभावे शरीरस्य कथमुत्पत्तिरित्यत आह धर्मविशेषसहितेभ्योऽणुभ्यः। विशिष्यते इति विशेषः धर्म एव विशेषो धर्मविशेषः प्रकृष्टो धर्मः तत्सहितेभ्योऽणुभ्यः जायन्ते प्रादुर्भवन्ति अणुभ्य इति पदं मूलनिर्देशके नत्वणवः समागत्य शरीरमारभन्ते। श्री:

श्री:

श्री: श्री: श्री: श्री:

क्षुद्रजन्तूनां शरीरोत्पत्तिमभिधत्ते। क्षुद्रजन्तूनामिति = क्षुद्रजन्तवो दंशमशकादयस्तेषां यातना पीडा दुःखमिति यावत्। तदर्थं शरीरं यातनाशरीरं तदधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितेति = शुक्रञ्च शोणितञ्च तयोः सन्निपातः संयोगविशेषः तस्मात् जातं योनिजमित्युच्यते। पितुः शुक्रं मातुः शोणितं तयोः सन्निपातानन्तरं जठरानलसम्बन्धाच्छुक्रशोणितारम्भकेषु परमाणुषु पूर्वरूपादिविनाशे सति समानगुणान्तरोत्पत्तौ द्व्यणुकादिक्रमेण कललशरीरोत्पत्तिः तत्रान्तःकरणप्रवेशो न तु शुक्रशोणितावस्थायाम्। शरीराश्रयत्वान्मनसः। तत्र मातुराहाररसो मात्रया संक्रामति। अदृष्टवशात्तत्र पुनर्जठरानलसम्बन्धात् कललारम्भकपरमाणुषु क्रियाविभागादिन्यायेन कललशरीरे नष्टे समुत्पन्नपाकजैः कललारम्भकपरमाणुभिरदृष्टवशादुपजातक्रियैराहारपरमाणुभिः सह सम्भूय शरीरान्तरमारभ्यते इत्येषा कल्पना शरीरे प्रत्यहं द्रष्टव्या। तत् योनिजं द्विविधम् जरायुजाण्डजभेदात्। द्वे विधे प्रकारौ यस्य तद्द्विविधम्। जरायुरिति। गर्भाशयस्याभिधानं तेन वेष्टितं जायते इति जरायुजम्। अण्डं बिम्बं तेन वेष्टितं जायते

मू. क्षुद्रजन्तूनां यातनाशरीराणि अधर्मविशेषसहितेभ्योऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तद्द्विविधं जरायुजमण्डजञ्चेति। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्। इन्द्रियं गन्धव्यञ्जकं सर्वप्राणिनां जलाद्यनभिभूतैः पार्थिवावयवैरारब्धं घ्राणम्।

इति तदण्डजम्। तत्र जरायुजं मानुषपशुमृगाणाम्। मानुषा अस्मदादयः। पशवः छागा ग्राम्या आरण्या मृगाः। अग्निषोमीयं पशुमालभेत, सप्तदश प्राजापत्यान् पशूनालभेतेति दर्शनात्। मृगाः कृष्णसारादयः। अण्डजं पक्षिसरीसृपाणां पक्षिणः प्रसिद्धाः सरीसृपाः परितः प्रसर्पणशीलाः सर्पमत्स्यादयः। पृथिव्या इन्द्रियमाह। इन्द्रियमिति = सर्वप्राणिनां निखिलदेहिनां गन्धव्यञ्जकं गन्धोपलम्भकं यदिन्द्रियं जलाद्यनभिभूतैरप्रतिहतसामर्थ्यैः यतः श्लेष्माद्यभिभवे सति गन्धो न गृह्यते इति भावः। पार्थिवावयवैः पृथिव्या अङ्गैः आरब्धं तद् घ्राणं नासाग्रवर्ति जिघ्रति गन्धमुपादत्तेऽनेनेति घ्राणम्। श्री: श्री:

श्री: श्री: श्री:

१४
प्रश्न-भा
स्वरी.

शरीरेन्द्रियाभ्यां विषयस्य स्वरूपविशेषं तु शब्देन दर्शयन् भेदं दर्शयति। विषय इति = मृत्पाषाणस्थावरस्वभावो विषयः द्व्यणुकादिक्रमेणारब्धस्त्रिविधस्त्रिप्रकारकः। तत्र तेषां मध्ये भूप्रदेशः स्थलनिम्नादयः प्राकारेष्टकादयः सर्वे ते मृत्प्रकाराः मृत्प्रभेदाः इत्यर्थः। उपशिलाः शिलाः। मणयः सूर्यकान्तादयः। वज्रोऽशनिर्हीरश्चेति पाषाणः आदिपदेन गैरिकाः गृह्यन्ते। तृणं गुल्मादिः

मू· विषयस्तु द्व्यणुकादिक्रमेणारब्धस्त्रिविधः मृत्पाषाणस्थावरलक्षणः। तत्र भूप्रदेशाः प्राकारेष्टकादयो मृत्प्रकाराः पाषाणाः उपलमणिवज्रादयः। स्थावरास्तृणौषधिवृक्षलताऽवतानवनस्पतय इति॥

ओषधयः फलपाकान्ता गोधूमादयः। ये सुपुष्पफलास्ते वृक्षाः कोविदारप्रभृतयः। लता प्रसिद्धैव। अवतन्वंती इत्यवताना नामविटपाः केतकीबीजपूरादयः। ये विना पुष्पं फलन्ति ते वनस्पतय औदुम्बरादयः। इत्यते स्थावराः "स्वबुद्ध्याधीनचेष्टाविरहत्वम्। लक्षणमिदं यद्यपि मृत्पाषाणयोः प्राप्नोति तथापि तयोः रूपान्तरस्यापि सम्भवादनेन रूपेणाभिधानं न कृतम्॥ श्रीः श्रीः श्रीः श्रीः

अपां लक्षणमाह। अप्त्वेति = अप्त्वधर्मसम्बन्धविशिष्टा आपो भवन्ति। यथा समवायेन स्नेहजलस्य लक्षणम्। रूपरसादिचतुर्दशगुणवत्य आप इति अत्र द्वन्द्वान्तरं मतुप्प्रत्ययः प्रत्येकं करणीयः। पूर्ववदिति = एषामपां सिद्धिः प्रतिपत्तिः पूर्ववत्। यथापूर्वं पृथिव्यां सूत्रकारवचनादेषां रूपादीनां गुणानां सिद्धिस्तथाऽप्स्वपीत्यर्थः। तथा च सूत्रम् "रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः, १।१।२ यथा पूर्वसिद्धिस्तथा प्रदर्श्यते। एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः चाक्षुषवचनात्सप्त संख्यादयः। पतनोपदेशात् गुरुत्वम्। उत्तरकर्मवचनात् संस्कार इति। अपां शुक्लमभास्वरं रूपम्। सहस्रशोऽग्निसंयोगेनापीदं शुक्लत्वं न परावर्तते परं स्वैवमेवाभास्वरशुक्लमेव रूपं जले संतिष्ठते। अथ यत्किञ्चित्सरागत्वं दृश्यते तत्पार्थिवपरमाणूनामेव। मधुर एव रसः। शीत एव स्पर्शः। निर्विशेष एव स्नेहः।

मू॰= अप्त्वाभिसम्बन्धादापः। रूपरसस्पर्शद्रवत्वस्नेहसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वसंस्कारवत्यः। पूर्ववदेषां सिद्धिः। शुक्लमधुरशीता एव रूपरसस्पर्शाः। स्नेहोऽम्भस्येव सांसिद्धिकश्च द्रवत्वम्। तास्तु पूर्ववद्द्विविधाः। नित्यानित्यभावात्। तासां तु कार्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम्। तत्र शरीरमयोनिजमेव वरुणलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्। इन्द्रियं सर्वप्राणिनां रसव्यञ्जकं विजात्यनभिभूतैर्जलावयवैरारब्धं रसनम्। विषयस्तु सरित्समुद्रहिमकरकादिः।

अपां वैधर्म्यमिति ध्वनयति। स्नेह इति = जले स्नेहो वर्तते। द्रवत्वञ्च सांसिद्धिकं स्वभावसिद्धम्। ता आपोऽपि परमाणुस्वभावा नित्याः कार्यस्वभावास्तु अनित्याः तुरप्यर्थकः। तासामपां कार्यं तु शरीरेन्द्रियविषयसंज्ञकं त्रिविधं त्रिप्रकारकम्। तत्र तेष्वाप्यं शरीरमयोनिजम्। यथानुमानम् "आपः कुत्रचिच्छरीरारम्भकाः द्रव्यारम्भकत्वात् पृथिवीवत्। "इति शरीरं वरुणलोके प्रसिद्धम्। इदं शरीरमागमाभिश्रेतव्यम्। पार्थिवेति = पार्थिवानां पृथिविसम्बन्धिनामवयवानामुपष्टम्भात्संयोगविशेषादाप्यं शरीरमुपभोगाय समर्थं स्यात्। आप्यशरीरोत्पत्तौ पार्थिवावयवा निमित्तकारणम् तेषां संयोगादाप्याऽवयवानां द्रव्यत्वे प्रतिबद्धे विशिष्टमेवेदं शरीरमुत्पद्यते न जलबुद्बुदप्रायमित्यर्थः। इन्द्रियमिति = सर्वप्राणिनां निखिलप्राणिमात्राणां रसव्यञ्जकं रसप्रत्यक्षकारि यदिन्द्रियं तद्विजात्यभिभूतैर्विजातिभिः पार्थिवावयवैः येऽनभिभूता अप्रतिहतसामर्थ्या आप्याऽवयवास्तैर्जलावयवैरारब्धं रसनम्। विषयस्तु सरित्–नदी, समुद्रो जलधिः। हिमे करको घनोपलमित्यादिः। श्री: श्री: श्री:

तेजो निरूपयति। तेज इति= तेजस्त्वाभिसम्बन्धात्तेजः। यथा वा समवायेनोष्णस्पर्शवत्त्वं तेजस्त्वम्। रूपस्पर्शादिवत्तेजः। पूर्ववदेषां रूपादीनां सि
द्धिः प्रतिपत्तिः। एते च गुणविनिवेशाधिकारे रूपादयो गुणविशेषाः सिद्धाः। चाक्षुषवचनात्सप्त संख्यादयः। अद्भिः सामान्यवचनाद्द्रवत्वम्
उत्तरकर्मवचनात् संस्कार इति तथा च सूत्रम् "तेजो रूपस्पर्शवत्" १।१।३ तत्र तेजसि रूपं शुक्लं भास्वरं परप्रकाशकं स्वप्रकाशकं
च। तेजसः स्पर्श उष्ण एव इत्यत्र चन्द्रनेत्रादिष्वनुपलभ्यमानां दाहशक्तिमपनयति। तत्र दाहोऽनुद्भूतरूपत्वमेव निबध्यते इति भावः। चतु
र्विधं हि तेजः यथा "किञ्चिदुद्भूतरूपस्पर्शं यथा सौरादि २ किञ्चिदुद्भूतरूपमनुद्भूतस्पर्शं यथा चान्द्रम् ३ किञ्चिदनुद्भूतरूपस्पर्शं यथा नाय
नम् ३ किञ्चिदनुद्भूतरूपमुद्भूतस्पर्शं यथा वारिभर्जनकपालादिगतं तेजः ४॥ तेजोभेदं दर्शयति। तदिति= अणुभावात् कार्यभावात्त

मू॰= तेजस्त्वाभिसम्बन्धात्तेजः। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
परत्वद्रवत्वसंस्कारवत्। पूर्ववदेषां सिद्धिः। तत्र शुक्लं भास्वरं च रूपम्। उष्ण एव
स्पर्शः। तदपि द्विविधमणुकार्यभावात्। कार्यञ्च शरीरादित्रयम्। शरीरमयोनिजमे
वादित्यलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्। इन्द्रियं सर्वप्राणिनां रूप
व्यञ्जकमन्यावयवानभिभूतैस्तेजोऽवयवैरारब्धं चक्षुः।

तेजो द्विविधम्। कार्यञ्च शरीरेन्द्रियविषयरूपात्त्रिविधम्। शरीरमयोनिजमेवादित्यलोके सूर्यलोके प्रसिद्धम्। पार्थिवावयवोपष्टम्भा
त् पार्थिवानामवयवानां निमित्तभूतानामुपष्टम्भात्संयोगविशेषात् उपभोगसमर्थमुपभोक्तुमर्हम्। तेजोऽवयवाः उपभोगक्षमं विशिष्टमेव श
रीरमारभन्ते न वह्निवदप्राप्यमित्यभिप्रायः। सर्वप्राणिनां निखिलजीवानां रूपव्यञ्जकं रूपप्रत्यक्षकारि यदिन्द्रियं यद्गन्धाद्यव्यञ्जक
त्वे सति रूपस्य व्यञ्जकमिन्द्रियं तैजसम्। तदन्यावयवानभिभूतैः ये पार्थिवोदकावयवैरप्रतिबद्धसामर्थ्यास्तेजोऽवयवास्तैरारब्धं चक्षुः।
अत इदं विशिष्टो मादृशां रूपाभिव्यञ्जकमिन्द्रियं नान्यत् तादृशं तदुत्पद्यते इत्यत्राऽदृष्टमेव कारणं कार्यनियम एव प्रमाणम्। तैजस
त्वं तु तस्य रूपादिषु मध्ये नियमेन रूपस्याभिव्यञ्जकत्वात् प्रदीपवत्। इदं त्वदृष्टवशादनुद्भूतरूपस्पर्शम्। तेन न स्वाश्रयं
दहति नाऽप्युपलभ्यते। श्री: श्री: श्री:

विषयं निरूपयति॥ विषयेति = विषय इति संज्ञा यस्य तद्विषयसंज्ञकं तेजः कार्यं चतुर्विधम्। भौमं दिव्यम् उदर्यम् आकरजञ्चेति भेदात्। तत्रेति निर्धारणार्थः। भौमं भूमौ भवं भौमं काष्ठेन्धनप्रभवं काष्ठस्वभावं यदिन्धनं तस्मात्प्रभवति उत्पद्यते निराश्रयस्यानुपपत्तेः काष्ठग्रहणमुपलक्षणार्थं तृणतुषादीनामपि कारणत्वात्। ऊर्ध्वज्वलनस्वभावम् ऊर्ध्वं ज्वलनं क्रियाविशेष एव स्वभावो यस्य तत्तथा। पचनदहनस्वेदनादिसमर्थं पचनं पाकः रूपपरावृत्तिर्वा। दहनं भस्मीकरणं स्वेदनं वातश्लेष्मापगमः आदिशब्दः विस्फोटादिजननलक्षणं सूचयति तत्र समर्थमित्यर्थक्रियोपवर्णनम्। दिव्यम् दिवि भवम् अबिन्धनम्। आप इन्धनं यस्येति व्युत्पत्त्या तत्सौरं सूरस्येदं सौरम्

मू॰ = विषयसंज्ञकं चतुर्विधम्। भौमं दिव्यमुदर्यमाकरजञ्च। तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलनस्वभावं पचनदहनस्वेदनादिसमर्थम्। दिव्यमबिन्धनं सौरविद्युदादि। भुक्तस्याहारस्य रसादिपरिणामार्थमुदर्यम्। आकरजञ्च सुवर्णादि। तत्र संयुक्तसमवायाद्रसाद्युपलब्धिरिति।

विद्युदादि आदिशब्दादुल्काया अवबोधः। उदर्यम् उदरे भवं तेजः उदर्यं भुक्तस्य भक्षितस्य आहारस्य आह्रियते इत्याहारस्तस्याहारस्य भोजनस्य रसादिपरिणामार्थं रसमलधातुभावेन परिणामप्रयोजनम्। आकरजम्, आकरः स्थानविशेषस्तस्मात्तस्मिन्भिति वा सुवर्णरजतादि तैजसं द्रव्यं जायते इत्याकरजं सुवर्णादि। तथा च सुवर्णादीनां तैजसत्वेऽनुमानम्। सुवर्णादि न पार्थिवम् अत्यन्तानलसंयोगेऽपि अपरावर्तमानरूपवत्त्वात् जलवत्। सुवर्णं तैजसं पार्थिवाऽऽप्याभ्यां भिन्नत्वे सति रूपवत्त्वात् सूर्यालोकवत्। आदिपदाद्रजतलोहादिकं गृह्यते। ननु कथं सुवर्णादौ गन्धरसयोरनुष्णाशीतस्पर्शस्य गुणस्योपलब्धिरित्यत आह। तत्रेति = भौमीनामदृष्टवशेन भूयसां पार्थिवानां पार्थिवाऽवयवानामुपष्टम्भादनुद्भूतरूपस्पर्शं पिण्डीभावयोग्यं सुवर्णादिकमारभ्यते। तत्र पार्थिवद्रव्यसमवेता इमे रसादयो गृह्यन्ते। यद्वा तत्र तेजसि संयुक्ता ये पार्थिवाद्यवयवाः तत्र समवायवन्तो ये रूपादयस्तेभ्यो रसाद्युपलब्धेः रसादिसम्प्राप्तिः। अत्र इतिशब्दः समाप्तौ। श्री: श्री:

प्रत्यक्षं पृथिव्यादि त्रयं व्याख्याय अप्रत्यक्षं द्रव्य व्याख्यानाऽवसरे नित्यानित्योभयस्वभाव द्रव्यनिरूपणस्य प्रकृतत्वाद्वायुं व्याचष्टे । वायुत्वेति= वायुत्वधर्मविशिष्टो वायुः यद्वा "अपाकजाऽनुष्णाशीतस्पर्शवत्त्वं वायोर्लक्षणम् । स्पर्शादि नवगुणवान् वायुः । अस्य वायोः स्पर्शोऽनुष्णाशीतत्वे सति नात्युष्णः नातिशीत इत्यनुष्णाशीतः तस्मिन्ननुष्णाशीतत्वे सत्यपाकजः । पाकाज्जात इति पाकजः, न पाकजः अपाकजः । यथा च सूत्रम् स्पर्शवान् वायुः २।१।४, गुणविनिवेशात् गुणानां विनिवेशः द्रव्येषु वृत्तिर्गुणविनिवेशः तस्मात् गुणविनिवेशात् संख्यादयो गुणाः सप्त भवन्ति । अरूपिषु अचाक्षुषवचनात् सप्त संख्यादयः । रूपरहितेषु द्रव्येषु संख्यादयः चाक्षुषा न भवन्ति इत्यभिधानाद् रूपिषु संख्यादीनां सद्भावः कथितः । अन्यथा तद्वर्तिनो तेषामप्रत्यक्षत्वाभिधानमसम्बद्धं स्यात् । तृणकर्मेति= तृणे कर्म वायुसंयोगात् वै·द· ५।१।१४ इति वचनाद्वायौ संस्कारो दर्शितः । तस्य भेदनिरूपणार्थमाह । स चेति= स च स्मृत्युत्थापितो बुद्धिसन्निहितः पश्चादयमिति प्रत्यक्षतरामृश्यते । न केवलं पृथिव्यादयो द्विविधाः अयमपि द्विविध इति चार्थः । परमाणुरूपो नित्यः कार्यरूपोऽनित्य इति भेदात्

मू= वायुत्वाभिसम्बन्धाद्वायुः । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवान् । स्पर्शोऽस्याऽनुष्णाशीतत्वे सत्यपाकजः । गुणविनिवेशात्सप्त संख्यादयः । तृणकर्मवचनात्संस्कारः । स चायं द्विविधोऽणुकार्यभावात् । तत्र कार्यलक्षणश्चतुर्विधः शरीरमिन्द्रियं विषयः प्राण इति । तत्राऽयोनिजमेव शरीरं मरुतां लोके पार्थिवाऽवयवोपष्टम्भाच्चोपभोगसमर्थम् । इन्द्रियं सर्वप्राणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं सर्वशरीरव्यापि त्वगिन्द्रियम् ।

तत्राणुकार्ययोर्मध्ये कार्यलक्षणः कार्यस्वभाव इत्यर्थः । चतुर्विधः शरीरेन्द्रियविषयप्राणभेदात् । तत्र कार्येषु मध्ये शरीरमयोनिजं न योन्युत्पन्नं मरुतां लोके वायुलोके प्रसिद्धं प्रख्यातमिति स्थान संकीर्तनम् । पार्थिवाऽवयवोपष्टम्भात् भूयसां पार्थिवाऽवयवानां निमित्तकारणभूतानामुपष्टम्भात् संयोगविशेषात् स्थिरं संहतस्वभावमुत्पन्नं पार्थिवशरीरवदुपभोगसमर्थम् । यत् सर्वप्राणिनां निखिलजीवानां स्पर्शोपलम्भकं स्पर्शपरिज्ञापकम् इन्द्रियं तत् पृथिव्याद्यनभिभूतैरप्रतिहतसामर्थ्यैर्वाय्ववयवैरारब्धं सर्वशरीरव्यापि निखिलदेहवर्तमानं त्वगिन्द्रियम् । त्वचि स्थितमिन्द्रियं त्वगिन्द्रियमुच्यते । तस्येन्द्रियस्य सद्भावे तावत् स्पर्शोपलब्धिरेव प्रमाणम् । वायवीयत्वं चास्य रूपादिमध्ये स्प-

स्पर्शस्यैवाभिव्यञ्जकत्वात् । अङ्· सङ्· सलिलशैत्याभिव्यञ्जकाङ्गसमीरणवत् इति ।

विषय प्राप्तौ निरूपयति । विषय इति- उपलभ्यमानस्पर्शाधिष्ठानभूतः उपलभ्यमानस्य प्राप्यमाणस्य स्पर्शस्य गुणविशेषस्याधिष्ठानभूतः आश्रयो [redacted] यः स विषयः । स च [redacted] स्पर्शशब्दधृतिकम्पलिङ्गः स्पर्शश्च शब्दश्च धृतिश्च कम्पश्चेति ते लिङ्गानि यस्येति बहुव्रीहिरितिस्पर्शशब्दधृतिकम्पलिङ्गः यथा स्पर्शेऽनुमानं "योऽयं रूपादिरहितः स्पर्शः प्रतीयते स क्वचिदाश्रितः स्पर्शत्वादितरस्पर्शवत् । अतो यत्राऽयमाश्रितः स वायुरिति परिशेषः । यथा शब्देऽनुमानम् "योऽयं पर्णादिषु अकस्माद्धुकधुकाशब्दः श्रूयते तस्याद्यः शब्दः स्पर्शवद्द्रव्यसंयोगजः अविभज्यमानाऽवयवद्रव्यसम्बन्धित्वे सति आदिशब्दत्वात्, दण्डाहतभेरीशब्दवत् । यश्चासौ स्पर्शवान् स वायुः । यथा धृत्यामनुमानम् "अन्तरिक्षे पर्णादीनां धृतिरवस्थितिः स्पर्शवद्द्रव्यसंयोगकार्या प्रयत्नवेगादिकारणाऽभावे सति धृतित्वाज्जलोपरिस्थितपर्णादिवत् । यथा कम्पेऽनुमानम् । वृक्षादीनां कम्पविशेषः स्पर्शवद्द्रव्यसंयोगजः, विशिष्टकम्पत्वात् नदीपूराहतवेतसादिवनकम्पवत् ।

मू:— विषयस्तूपलभ्यमानस्पर्शाधिष्ठानभूतः स्पर्शशब्दधृतिकम्पलिङ्गः तिर्य्यग्गमनस्वभावो मेघादिप्रेरणधारणादिसमर्थः । तस्याप्रत्यक्षस्यापि नानात्वं संमूर्छनेनाऽनुमीयते ।

तद्धर्मं दर्शयति । तिर्य्यग्गमनस्वभावः तिर्य्यग्गमनं स्वभावो यस्येति तिर्य्यग्गमनस्वभावः । मेघादिप्रेरणधारणादिसमर्थः । मेघो नामादिपदात् यानपात्रादिपरिग्रहस्तेषामपि वायुना प्रेर्यमाणत्वात् । यानपात्रादिपदेन व्योमयानस्य ग्रहणं प्राचीनसमये व्योमयानादय आसन् यथा रामायणे पुष्पकविमानवर्णनं श्रीमद्भागवते श्रीकृष्णशाल्वयुद्धप्रसंगे तद्वर्णनमस्ति । अप्रत्यक्षस्याक्षिगोचररहितस्यापि तस्य वायोर्नानात्वमनेकविधत्वं संमूर्छनेन विरुद्धायां दिशि क्रिया ययोस्तयोः संनिपातः परस्परगतिप्रतिबन्धहेतुः संयोगविशेषः संमूर्छनं तेन संमूर्छनेन अनुमीयते परिज्ञायते । श्री:

श्री: श्री: श्री:

किं नाम संमूर्छनमित्यत आह। समानजवयोरिति। समानजवयोः समानः सदृशो जवो वेगो [redacted] ययोस्तथाभूतयोः विरुद्धदिक्क्रिययोः विरुद्धायां दिशि क्रिया ययोस्तथाभूतयोः [redacted]: प्रतिबन्धहेतुः संयोगविशेषः संमूर्छनं भवति। असमानवेगयोः संमूर्छनं भवत्येकेनापरस्य विजयात्तदर्थं समानजवयोरिति। सोऽपि सन्निपातोऽपि सावयविनोः अवयवा विद्यन्ते अत्रेति अवयवी अवयविना सह वर्तत इति सावयवी तयोः सावयविनोः वाय्वोरूर्ध्वगमनेनोपरिचलनेनानुमीयते परिज्ञायते। ऊर्ध्वगमनेऽनुमानं यथा "वाय्वोरूर्ध्वगमनं परस्परव्याहतिपूर्वकं अन्यकारणासम्भवे सति तिर्यग्गतिस्वभावद्रव्योर्ध्वगतित्वात् परस्पराहतजलतरङ्गोर्ध्वगमनवत्। इत्यत्राऽवयविनोरिति वक्तव्ये सावयविनोरित्युक्तमवयवानामपि अवयवित्वविवक्षया स्थूलवायुपरिग्रहणार्थम्। तदप्यूर्ध्वगमनमपि तृणादिगमनेन तृणादीनामूर्ध्वगमनेन अनुमीयतेऽवबुध्यते। प्राणस्वरूपमाह। प्राणोऽन्तःशरीरे शरीरमध्ये यो वायुर्वर्तते स प्राण इत्युच्यते

मू॰- संमूर्छनं पुनः समानजवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः सोऽपि सावयविनोर्वाय्वोरूर्ध्वगमनेनानुमीयते। तदपि तृणादिगमनेनेति। प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुरेकः सन् क्रियाभेदादपानादिसंज्ञां लभते।

स प्राणः रसमलधातूनां रस इति भुक्तवताऽऽहारेषु पाकजोत्पत्तिक्रमेणोत्पन्नस्य द्रवविशेषस्य ग्रहणम्। मल इति मूत्रपुरीषयोरभिधानम्। धातवः त्वङ्मांसास्थिशोणितादयः तेषां रसमलधातूनां प्रेरणस्य इतस्ततो नयनस्यादिशब्दात् व्यूहनस्य च हेतुः कारणं प्राणः स चैकः सन् क्रियाभेदात् इति। मूत्रपुरीषयोरधोनयनादपानः। रसस्य गर्भनाडीवितननाद्व्यानः। अन्नपानादेरूर्ध्वं नयनादुदानः, मुखनासिकाभ्यां निष्क्रमणात् प्राणः, आहारेषु पाकार्थमुदर्यस्य वह्नेः समं सर्वत्र नयनात्समान इति अपानादिसंज्ञां लभते प्राप्नोति। यथा ग्रन्थान्तरे ऽप्युक्तम् "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः," एवं नागकूर्मकृकलदेवदत्तधनञ्जयात्मकवायूनां प्राणेऽन्तर्भावः। यथा नाग उद्गीर्णस्य हेतुः कूर्म उन्मीलनस्य कृकलः क्षुधायाः देवदत्तो विजृम्भणस्य धनञ्जयः पोषणस्येति। यद्वा "उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः। कृकलः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे। न जहाति मृतञ्चापि सर्वव्यापी धनञ्जयः ", ॥

उत्पत्तिमन्ति चत्वारि द्रव्याण्याख्याय विस्तरात्। तेषां कर्तृपरीक्षार्थमुद्यमः क्रियतेऽधुना॥१॥ पृथिव्यादीनां चतुर्णामुत्पत्तिविनाशौ निरूपणीयौ तयोश्च प्रतिपत्तिप्रकारणं निरूपणे ग्रन्थविस्तरः स्यादिति समानन्यायेनैकत्र निरूपणार्थं प्रकरणमारभ्यते ॥ इहेदानीमिति = इहास्मिन् वैशेषिकशास्त्रे इदानीमधुना चत्वारि द्रव्याणि आख्याय एषां चतुर्णाम् पृथिव्यप्तेजोमरुतां महाभूतानां सृष्टिसंहारविधिः सृष्टिश्च संहारश्च सृष्टिसंहारौ तयोः सृष्टिसंहारयोरुत्पत्तिविनाशयोः विधिः प्रकार उच्यते कथ्यते। अत्र महाभूतानामित्युक्तेः त्र्याणामेव परिग्रहः कपिञ्जलानालभेतेतिवत्। बहुत्वसंख्यायास्त्रावत्येव चरितार्थत्वात् अतश्चतुर्णामित्युक्तम्। चतुर्णामित्युक्ते चाऽनन्तरोक्तमेव वायुकार्यं शरीरमिन्द्रियं विषयः प्राण इति चतुष्टयं बुद्धौ निविशते तन्निवृत्त्यर्थं महाभूतानामिति। भाष्यकर्त्रा प्रतिज्ञायां पूर्वं सृष्टिः परं संहार उक्तस्तद्वर्णने च पूर्वं कृतः संहार प्राक्कथीत्यत उच्यते। अर्थप्रतिपादनमात्रस्य विवक्षितत्वात् पश्चादुक्तमपि संहारं प्रथमं कथयति। ब्राह्मेण ब्रह्मण इदं ब्राह्मं "पूर्वं तावद् ब्राह्ममानमुच्यते" क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम्।

मू० = इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते। ब्राह्मेण मानेन वर्षशतान्ते वर्तमानस्य ब्रह्मणोऽपवर्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरे—

पञ्चदशनिमेषाश्च काष्ठा त्रिंशत्तु ताः कला॥१॥ त्रिंशत्कलो मुहूर्तः स्यात् त्रिंशद्रात्र्या अहनी च ते। अहोरात्राः पञ्चदश पक्षो मासस्तु तावुभौ॥२॥ ऋतुर्मासद्वयं प्रोक्तमयनं तु ऋतुत्रयम्। अयनद्वितयं वर्षो मानुषोऽयमुदाहृतः॥३॥ एष दैवस्त्वहोरात्रः तैः पक्षादि च पूर्ववत्। दैववर्षसहस्राणि द्वादशैव चतुर्युगम्॥४॥ चतुर्युगसहस्रं तु ब्रह्मणो दिनमुच्यते। रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना॥५॥ इति ब्रह्मदिनादिकल्पनाऽनेन ब्राह्मेण मानेन प्रमाणेन वर्षशतान्ते वर्षाणां शतं वर्षशतं तस्य वर्षशतस्यान्तेऽवसाने वर्तमानस्य स्वसत्ताधारकस्य विद्यमानस्येति यावत् ब्रह्मणः नाभिकमलोद्भवस्याऽपवर्गकाले मोक्षकाले संसारखिन्नानां संसारे जगति नानास्थानेषु भूयोभूयः शरीरादिपरिग्रहेण खिन्नानां गर्भवासादिविविधदुःखेन दुःखितानां सर्वप्राणिनां सर्वेषां प्राणिमात्राणां निशि रात्रौ विश्रामार्थं कियत्कालं दुःखोपशमनार्थं सकलभुवनपतेः सर्वत्राव्याहतप्रभावस्य महेश्वरस्य परमात्मनः संजिहीर्षा संहर्तुमिच्छा संजिहीर्षा संहारेच्छा भवति तत्समकालं तदनन्तरं शरीरेन्द्रियमहाभूतोपनिबन्धकानां शरीरम् इन्द्रियं महाभूतानि चेति

शरीरेन्द्रियमहाभूतानि तेषां शरीरेन्द्रियमहाभूतानामुपनिबन्धकानामारम्भकाणां सर्वात्मगतानां सर्वेष्वात्मसु समवेतानामदृष्टानां धर्माधर्माणां वृत्तिनिरोधे वृत्तेर्निरोधो वृत्तिनिरोधः शक्तिप्रतिबन्धः तस्मिन् सति अनागतानां शरीरेन्द्रियमहाभूतानामनुत्पत्तिः उत्पन्नानां च विनाशार्थं महेश्वरेच्छाऽऽत्माणुसंयोगेभ्यः कर्माणि जायन्ते। महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः महेश्वरस्येच्छा च आत्माणुसंयोगाश्चेति महेश्वरेच्छात्माणुसंयोगाः तेभ्यो जातानि कर्माणीति महेश्वरेच्छात्माणुसंयोगजकर्माणि तेभ्यो महेश्वरेच्छाऽऽत्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यः शरीराणामिन्द्रियाणां ये पारम्पर्येण कारणभूता अणवस्तेषु विभागास्तेभ्यः तत्संयोगनिवृत्तौ तेषामणूनां संयोगनिवृत्तिः तस्यां सत्यां तेषां शरीरेन्द्रियाणाम् अणुसंयोगानां वा आपरमाण्वन्तः परमाणुपर्यन्तो विनाशः। शरीरेन्द्रियाणां द्व्यणुकादिविनाशक्रमेण तावद्विनाशो यावत्परमाणुरिति। तथैवं पृथिव्युदकज्वलनपवनानामपि

मू॰ -न्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतानामदृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः शरीरेन्द्रियकारणाणुविभागेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशस्तथा पृथिव्युदकज्वलनपवनानामपि महाभूतानामनेनैव क्रमेणोत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य पूर्वस्य विनाशः ततः प्रविभक्ताः परमाणवोऽवतिष्ठन्ते धर्माधर्मसंस्काराऽनुविद्धा आत्मानस्तावन्तमेव कालम्।

महाभूतानामनेनैव क्रमेणैवं विधानेन उत्तरस्मिन् उत्तरस्मिन् स्वस्मादुपर्युपरि पूर्वस्य पूर्वस्य विनाशः। यथाक्रमं पूर्वं पृथिव्याः विनाशो जले तिष्ठति। पृथिवीजलयोर्विनाशस्तेजसि, पृथ्वीजलतेजसां विनाशो वायौ, पृथ्वीजलतेजोवायूनामाकाशे विनाशः एवं क्रमः ततस्तदनन्तरं प्रविभक्ताः विभागं प्राप्ताः परमाणवः पृथिव्युदकतेजोवायूनां परमाणवोऽवतिष्ठन्ते स्थिता भवन्ति। धर्माधर्मसंस्कारानुविद्धा धर्माधर्मभावनाख्यसंस्कारैरनुविद्धा उपगृहीताश्च आत्मानस्तावन्तमेव कालं ब्रह्मणो वर्षशतमवतिष्ठन्ते, दिगादयोऽपि तिष्ठन्ति नित्यत्वात्। विभक्ताः परमाणवो भूयः कुतः स्वयमेव नारिप्स्यन्ते इत्यत आह, आत्मनामदृष्टवशात् परमाणवः पुनर्नारिप्स्यन्त इति प्राधान्याद् दृष्टवशात् आत्मपरमाण्ववस्थानसंकीर्तनम्। इति।

श्री: श्री: श्री:

एवं संहारक्रमं प्रतिपाद्य सृष्टिक्रमं प्रतिपादयन्नाह। यद्यपि भाष्यकर्त्रा श्रीप्रशस्तपादेन संहारो यथाशास्त्रमवर्णि परं सृष्टिक्रमः उपनिषद्वाक्याऽननुकूल एव समपादि यथा "आत्मनः आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः —,, इत्यादि विरोधात्

ततः पुनः प्राणिनाम् आत्मनां "यद्यपि तदाऽऽत्मनां प्राणसम्बन्धो नास्ति तथापि प्राणिन इत्युक्तं योग्यत्वात्। तेषां भोगभूतये सुखदुःखानुभवोत्पत्तये महेश्वरस्य परात्मनः सिसृक्षा सर्जनेच्छा जायते, अनन्तरं पश्चात् सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यः सर्वेषु आत्मसु गता अदृष्टा वृत्तिं लभन्ते वृत्तिर्लब्धा यैस्ते वृत्तिलब्धा इति पाठस्त्वार्ष एव। आहिताग्न्यादित्वान्निष्ठायाः पूर्वनिपातो दन्तजात इति यथा। सर्वात्मगताश्च वृत्तिलब्धाश्चादृष्टाश्च सर्वात्मगतवृत्तिलब्धादृष्टास्तान् अपेक्षन्ते इति सर्वात्मगतवृत्तिलब्धादृष्टापेक्षास्तेभ्यः सर्वात्मगतवृत्तिलब्धापेक्षेभ्यस्तत्संयोगेभ्यः तत्संयोगा आत्माणुसंयोगास्तेभ्यः पवनपरमाणुषु वायुपरमाणुषु कर्मोत्पत्तौ (कर्माण्युत्पद्यन्ते) अत्र पवनपरमाणवः समवायिकारणं लब्धवृत्त्यदृष्टवदात्मपरमाणुसंयोगोऽसमवायिकारणम्, अदृष्टं निमित्तकारणम्। एवं कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगेभ्यः परस्परं संयोगा जायन्ते संयोगेभ्यश्च द्व्यणुकादिक्रमेण द्व्यणुकान्युत्प [redacted] द्यन्ते तदनु त्र्यणुकानि इत्यनेनैव क्रमेण महान् वायुः समुत्पन्नः जातः नभसि

मू॰— ततः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यस्तत्संयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। तदनन्तरं तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पन्नः पोप्लूयमानस्तिष्ठति।

आकाशे दोधूयमानः क्वचिदप्रतिहतत्वाद्वेगातिशययुक्तस्तिष्ठति। तदनन्तरं तत्पश्चात् तस्मिन्नेव वायौ आप्येभ्यो जलीयेभ्यः परमाणुभ्यः [redacted] तेनैव क्रमेण द्व्यणुकत्र्यणुकादिक्रमेण महान् सलिलनिधिः समुद्रः उत्पन्नः पोप्लूयमानः प्रतिरोधाकाऽभावात् सर्वत्र पोप्लूयमानः प्लवमानः तिष्ठति। श्री: श्री: श्री:

तदनन्तरमिति= तदनन्तरं तदनु तस्मिन्नेव जलनिधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहता स्थिरस्वभावाऽवतिष्ठते। तदनन्तरं भूमिस्थित्यनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महान् तेजोराशिः केनचिदनभिभूतत्वाद प्रतिहतप्रभावत्वात् देदीप्यमानोऽतिशयेन प्रकाशमानस्तिष्ठति। इत्यत्र यद्यपि जलपावकयोः स्वाभाविको विरोधः तथाऽप्यदृष्टवशेनाधाराधेयभावो नानुपपन्नः। एवमनन्तरोक्तेन प्रकारेण उत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्य परमात्मनोऽभिध्यानमात्रात् संकल्पमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डं महद्बिम्बमारभ्यते। इदमण्डं वह्निपुञ्जप्रायमेवेत्यत्र कथं ब्रह्मणः

मू= तदनन्तरं तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहताऽवतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिप्रक्रमेणोत्पन्नो महांस्तेजोराशिः केनचिदनभिभूतत्वाद्देदीप्यमानस्तिष्ठति। एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्याभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यते। तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते।

स्थितिरित्यत आह। "बिम्बमारभ्यते पार्थिवा अवयवा उपष्टम्भकास्तेनेदं वह्निपुञ्जप्रायं नाऽभूत्। तस्मिन् अण्डे स महेश्वरः चतुर्वदनकमलं चत्वारि वदनकमलानि यस्य तं सर्वलोकपितामहं सर्वेषामेव लोकानामाद्यं पुरुषं ब्रह्माणं सकलभुवनसहितं सकलैर्भुवनैः सहोत्पाद्य प्रकटीकृत्य प्रजासर्गे प्रजानां सर्गे जनने विनियुङ्क्ते त्वमिदं कुरु त्वमिदं कुरु इति सर्वान् प्राणिनः स्वस्वकर्माणि स्थापयति॥ श्रीः

श्रीः श्रीः

प्रश॰ भा॰
स्टी॰

अधुना ब्रह्मकृत्यमाह = स चेति स च ब्रह्मा महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्यसम्पन्नः ज्ञानञ्च वैराग्यञ्चैश्वर्यञ्च ज्ञान वैराग्यैश्वर्याणि अतिशयेन ज्ञानवैराग्यैश्वर्याणि तैः सम्पन्नः उपचितः प्राणिनां कर्मविपाकं "विविधेन प्रकारेण पाको विपाकः कर्मणां विपाकः कर्मविपाकस्तं कर्मविपाकं कर्मफलं विदित्वा तावदस्य कर्मफलं भविष्यतीति ज्ञात्वा कर्मानुरूपभोगायुषः कर्माऽनुरूपाणि कर्मयोग्यानि ज्ञानभोगायूंषि येषां तान् सुतान् पुत्रान् प्रजापतीन् दक्षादीन् मानसान् मनःसंकल्पप्रभवान् मनुदेवर्षिपितृगणान्

मू:— "स च महेश्वरेण विनियुक्तो ब्रह्मातिशयज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्माऽनुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादतश्चतुरो वर्णान् अन्यानि चोच्चावचानि भूतानि च सृष्ट्वाशयानुरूपैर्धर्मज्ञानवैराग्यैश्वर्यैः संयोजयतीति।

मनून् देवान् ऋषीन् पितृगणान् मुखबाहूरुपादतः चतुरो वर्णान् मुखाद् ब्राह्मणान् बाहुभ्यां क्षत्रियान् ऊरुभ्यां वैश्यान् पद्भ्यां शूद्रान् अन्यानि इतराणि उच्चावचानि क्षुद्रतराणि च भूतानि सृष्ट्वा विरच्य आशयाऽनुरूपैराशेते फलोपभोगकाले यावदात्मनि अवतिष्ठते इत्याशयः कर्म तदनुरूपैस्तद्योग्यैः धर्मज्ञानवैराग्यैश्वर्यैः धर्मश्च ज्ञानञ्च वैराग्यञ्चैश्वर्यञ्चेति धर्मज्ञानवैराग्यैश्वर्याणि तैः धर्मज्ञानवैराग्यैश्वर्यैः संयोजयति। यस्य यथाविधं कर्म, तत्तदनुरूपेण ज्ञानादिना सम्यग् योजयति मात्रयाऽप्यन्यथा न करोतीत्यर्थ इति॥ श्री:

श्री:

श्री:

आकाशादीनां त्रयाणां संक्षेपार्थमेकेन ग्रन्थेन वैधर्म्यं कथयति। आकाशेति = आकाशः कालश्च दिक् चाकाशकालदिश
स्तेषामाकाशकालदिशामेकैकत्वादपरजातिर्नास्ति तस्या व्यक्तिभेदाऽधिष्ठानत्वात्। अपरजात्यभावे चाकाश इति काल इति

मू:— आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्य
स्तिस्रः संज्ञा भवन्ति। आकाशः कालो दिगिति।

दिगिति तिस्रः संज्ञा पारिभाषिक्य भवन्ति न पृथिव्यादि संज्ञावदपरजातिनैमित्तिक्य इत्यर्थः। अधुना पारिभाषिकी नैमित्तिक्यो
र्लक्षणमाह। "यस्याः संज्ञायाः विना निमित्तेन शृंगग्राहिकतया संकेतः, सा पारिभाषिकी यथाऽयं देवदत्त इति॥
यस्याः संज्ञायाः निमित्तमुपादाय संकेतः सा नैमित्तिकीति॥ श्री: श्री: श्री:

सम्प्रत्याकाशं निरूपयति । तत्रेति = तत्र तेषां त्रयाणां मध्ये आकाशस्य गुणाः मूलस्थाः शब्दादिविभागान्ताः । शब्दो न स्पर्शवद्विशेषगुणः तत्र प्रथमं
हेतुमाह । प्रत्यक्षत्वे सति अकारणगुणपूर्वकत्वात् । प्रत्यक्षत्वे सति अतिगोचरत्वे सति स्वाश्रयस्य यत्समवायिकारणं तद्गुणपूर्वशब्दो न भवति
परं रूपादिवदाश्रयोत्पत्त्यनन्तरं मनुत्पादात् अतः सुखादिवत्स्पर्शवतां विशेषगुणो न भवति । तत्र विशेषगुणत्वप्रतिषेधे सति शब्दस्य सामान्य
गुणत्वमाकाशे भविष्यतीत्यपि नाशङ्कनीयं सामान्यविशेषवतस्तस्य बाह्यैकेन्द्रियग्राह्यत्वेन रूपादिवद्विशेषगुणत्वसिद्धेः । द्वितीयं
हेतुमाह । अयावद्द्रव्यभावित्वात् । यावद्द्रव्यं शब्दो न भवति सत्येवाश्रये शङ्खादौ तस्य विनाशात् । अतोऽपि सुखादिवत्स्पर्शवद्वि
शेषगुणो न भवति । तृतीयं हेतुमाह आश्रयादन्यत्रोपलब्धेश्च । स्पर्शवद्विशेषगुणत्वे शब्दस्य शंखादिराश्रयो वाच्यः । स च तस्मा
न्यत्र दूरे कर्णशष्कुलीदेशे समुपलभ्यते न चान्यगुणस्यान्यत्र ग्रहणमस्ति तस्मान्न स्पर्शवद्विशेषगुणः । अथ परकृतिमाह । पार्थिव
परमाणुरूपादयः स्पर्शवद्विशेषगुणाः अथ चाकारणगुणपूर्वकाः परमाणोरकार्यत्वात् तद्व्यवच्छेदार्थं प्रत्यक्षत्वे सतीत्युक्तम् । यवद्द्रव्या
दौ पार्थिवपरमाणुरूपादिभिरेव व्यभिचारस्तेषां सत्येवाश्रये परमाण्वग्निविनाशात्तदर्थं प्रत्यक्षत्वे सतीत्यनुवर्तनीयम् ।

मू = तत्राकाशस्य गुणाः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः । शब्दः प्रत्यक्षत्वे
सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्यत्रोपलब्धेश्च न स्पर्शवद्विशे
षगुणः । बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसमवायादहंकारेण विभक्त
ग्रहणाच्च नात्मगुणः ।

आत्मगुणनिषेधार्थमाह । बाह्येति = स च शब्दो नात्मगुणः आत्मनः जीवात्मनः गुणः सुखवन्नास्ति । प्रथमे हेतुमाह । बाह्येन्द्रियप्रत्यक्षत्वात्
श्रोत्रं तावद्बाह्येन्द्रियं नियमेन बाह्यार्थप्रकाशकत्वाच्चक्षुर्वत् । तद्ग्राह्यश्च शब्दः तत्प्रतीतेस्तद्भावभावित्वात् । न यश्च बाह्येन्द्रियग्राह्यः सो आ
त्मगुणो यथा रूपादि तस्मान्नात्मगुणः शब्दः । आत्मगुणाः सुखादयो बाह्येन्द्रियेण न गृह्यन्ते । द्वितीयं हेतुमाह । आत्मान्तरग्राह्यत्वात् । अनेक
प्रतिपत्तृसाधारणत्वात् इत्यर्थः । या वीणादिजा शब्दव्यक्तिः सन्ततिद्वारेणैकेन पुरुषेण प्रतीयते सैवापरेणापि तद्देशवर्तिना प्रतीयते
न त्वेवं सुखादि पंच आत्मगुणा गृह्यन्ते ते च ग्राहकस्यात्मन एव गृह्यन्ते गृह्यमाणाः शब्दो न तथा । तृतीयं हेतुमाह । आत्मन्यसमवायात् ।
आत्मनि असमवायात् समवायसम्बन्धरहितात् शब्दो नात्मगुणः रूपादिवत् समवायः गुणगुणिनोः जातिव्यक्त्योर्भवति न तथात्मगुणः शब्दः । हेत्व
न्तरमाह चतुर्थम् । अहंकारेण विभक्तग्रहणात् । अहंकारेणाहमिति प्रत्ययेन विभक्तस्य विभागं प्राप्तस्य व्यधिकरणस्येति यावत् ग्रहणात्स्वीकारात् । यः
खल्वात्मगुणः सोऽहङ्कारसमानाधिकरणो गृह्यते । यथा सुख्यहं दुःख्यहमिति न त्वेवं शब्दस्य ग्रहणमतो नात्मगुणः शब्दः । चः समुच्चयेऽस्ति ।

अस्तु तर्हि अयं गुणः दिशः कालस्य मनसो वेत्यत आह । श्रोत्रेति = ये दिक्कालमनसामुभयवादिसिद्धाः संयोगादयस्ते श्रोत्रग्राह्या न भवन्ति, अयं तु श्रोत्रग्राह्यस्तस्मान्न दिक्कालमनसां गुणः । दिक्कालमनसां विशेषगुणः शब्दः नास्ति, अयन्तु विशेषगुणः तस्माद्विशेषगुणत्वाभावाच्च तेषां गुणः । परिशेषादिति गुणः गुणिनमन्तरेण न भवति न चैषां पृथिव्यादीनां गुणः । द्रव्यान्तरञ्च नास्ति तस्माद् यस्यायं गुणः तदाकाशम् इति परिशेषात् शब्दो गुणो भूत्वाऽऽकाशस्याधिगमे प्रतिपत्तौ लिङ्गमित्यनेन निर्देशोऽनुमानमिति यावत् । तथा च सूत्रम् "परिशेषाल्लिङ्गमाकाशस्य" वै.द.२।१।२७ । यथा च द्रव्यान्तरगुणः शब्दः गुणत्वे सति पृथिव्याद्यष्ट द्रव्यानाश्रितो यथा रूपादिरिति । सम्प्रति संख्यादिगुणत्वप्रतिपादनार्थमाह । शब्देति । शब्दो लिङ्गमाकाशस्य शब्दश्च सर्वत्राविशिष्ट एक इत्येकरूपमेवाकाशं सिद्ध्यति भेदप्रतिपादकप्रमाणाभावात् इत्यर्थः । तदनुविधानादेकत्वविधानादेकपृथक्त्वमस्ति । आकाशे भेदप्रतिपादकप्रमाणाभावात् सर्वसिद्धमेकत्वं

मू = श्रोत्रग्राह्यत्वाद्वैशेषिकगुणभावाच्च न दिक्कालमनसां परिशेषाद्गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् । शब्दलिङ्गाविशेषादेकत्वं सिद्धम् । तदनुविधानादेकपृथक्त्वम् । विभववचनात् परममहत्परिमाणम् । शब्दकारणत्ववचनात्संयोगविभागाविति । अतो गुणवत्त्वादनाश्रितत्वाच्च द्रव्यम् । समानाऽसमानजातीयकारणाभावाच्च नित्यम् । सर्वप्राणिनाञ्च शब्दोपलब्धौ निमित्तं श्रोत्रभावेन ।

तेन पृथक्त्वमपि सिद्धमित्यर्थः । विभवेति = द्रव्यत्वादाकाशस्य परिमाणयोगित्वे सिद्धे "विभववान् महानाकाशस्तथा चात्मा" वै.द.७।१।२२ इति वचनात्परममहत्त्वमाकाशे विभुत्वं सर्वैः मूर्तिमद्भिः सह संयोगः यद्विभु तत्परममहत्, यथात्मा विभु चाकाशं तस्मादेतदपि परममहत् । शब्देति संयोगविभागाद्धब्दाच्च शब्दस्यानिष्पत्तिरिति "आकाशगुणं शब्दं प्रति संयोगविभागौ कारणम्" वै.२।२।३१ तेनाकाशे संयोगविभागौ सिद्धौ । द्रव्यमेवाकाशमिति निरूपयति । अत इति यत आकाशं गुणवत् अतोऽस्माद्धेतोर्गुणवत्त्वादित्यर्थः द्रव्यं घटादिवत् । अनाश्रितत्वात् आश्रयान्तराऽभावात् । यश्चाश्रयमान् स च गुणो यदाश्रयं तद् द्रव्यं तथाऽऽकाशम् । तदाकाशं समानाऽसमानजातीयकारणाऽभावात् समानजातीयं समवायिकारणम् असमानजातीयमसमवायिकारणं निमित्तकारणञ्च तेषामभावात् नित्यं सर्वदा स्थायि । सर्वप्राणिनां सर्वेषां प्राणिनां शब्दोपलब्धौ शब्दस्योपलब्धिः प्राप्तिः शब्दोपलब्धिः तस्मिन् शब्दोपलब्धौ श्रोत्रभावेन निमित्तम् ।

पं ४ संयोगादिभागाच्च शब्दाच्च शब्दनिष्पत्तेः

किं नाम श्रोत्रमित्युपदिशति 'श्रोत्रमिति। श्रूयतेऽनेनेति श्रवणं श्रवणञ्च तद्विवरञ्च श्रवणविवरं तदेव संज्ञा यस्येति श्रवणविवरसंज्ञकस्तादृशो नभोदेशः, शब्दनिमित्त उपभोगः सुखदुःखोऽनुभवः, तस्य प्रापकौ यौ धर्माधर्मौ ताभ्यामुपनिबद्धः सहकृत इति तत् श्रोत्रं श्रोत्रेन्द्रियं भवति, इत्यत्र विशेषणस्थं शब्दपदं पृथिव्यादिकार्येभ्यो व्यवच्छिनत्ति। बाह्यैकैकेन्द्रियं स्वविशेषगुणम्

(मू:) श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः। शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धस्तस्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद्बाधिर्यमिति।

एकादते। यथा चक्षुः गृह्णाति रूपम्, रसं च रसना, स्पर्शं त्वक् च, घ्राणञ्च गन्धम्, श्रोत्रं शब्दमेवेति। एवं सति सर्वे शब्दं गृह्णन्तु न कस्यापि बाधिर्यं प्रतिपद्येत, तत्राह। तस्य आकाशस्य नित्यत्वे सति अपि उपनिबन्धकवैकल्यात् उपनिबन्धकौ सहकारिभूतौ यौ धर्माधर्मौ तयोर्वैकल्याद सत्त्वात् विकलतायुतत्वादित्यर्थः बाधिर्यमेव जायते नान्यथा।
इतिः आकाशप्रकरणसमाप्तिकः। समाप्तमाकाशनिरूपणम्।

(अथ कालनिरूपण प्रकरणम्)

काल इति। बहुतरतपनपरिस्पन्दान्तरितजन्मनि स्थविरे युवानमवधिं कृत्वा परत्वमिति प्रत्ययः। अल्पतरसूर्यपरिस्पन्दांतरितजन्मनि यूर्वि स्थविरं मर्यादीकृत्य अपरत्वमिति प्रत्ययः। तयोः यो व्यतिकरः व्यत्ययः, तथा च युगपत्प्रत्ययः युगपत्सहन्ति, युगपद्गच्छन्ति, युगपद्भुञ्जते इति युगपज्ज्ञानं तस्य प्रत्ययः युगपत्प्रत्ययः। तद्भिन्नः प्रत्ययोऽयुगपत्प्रत्ययः। बहुकालसम्बन्धिनी क्रिया चिरप्रत्ययः, चिरं जीवति चिरं जातमित्यादि। अल्पतरकालसम्बन्धिनी क्रिया क्षिप्रप्रत्ययः, यथा क्षिप्रं भुनक्ति, क्षिप्रं तरतीत्यादिषु इमे प्रत्ययाः लिङ्गानि अनुमापकानि यस्य स काल इत्याहूयते। तथा च "अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति

मू= कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम्।
तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमित्ताऽभावाद् यत्र
निमित्तं स कालः।

काललिङ्गानि, वै॰ २.२.६। तेषां युगपदादिप्रत्ययानां विषयेषु द्रव्यादिषु पूर्वप्रत्ययविलक्षणानां द्रव्यादिप्रत्ययविभिन्नानाम् उत्पत्तौ प्रादुर्भावे अन्यस्य निमित्तस्याऽभावात्। एतादृशप्रत्याविशिष्टनिमित्तान्तराऽनुपपत्तेरित्यर्थः। कार्यद्रव्याणां परत्वयो निमित्तकारणमिति राद्धान्तः। अतो यत्र कार्यद्रव्याणामुत्पत्तौ निमित्तं सामान्यनिमित्तकारणं स काल इति।

श्री: श्री: श्री:

प्रश·भा·
सटी·

कार्यद्रव्याणां कालस्य कारणत्वं निष्पाद्यते,,। सर्वेति = सर्वकार्याणां सर्वेषामुत्पत्तिमतां द्रव्याणामुत्पत्तिः जन्म स्थितिः विद्यमानता विनाशो ध्वंसश्च एषां हेतुः कारणं स कालः। कस्मात् तद्व्यपदेशात् निमित्तसंज्ञाकाद्विशिष्टोऽपदेशः मुख्यो व्यवहारः व्यपदेशः, तेन कालेन व्यपदेशः तद्व्यपदेशः तस्मादिति। तथा च "नित्येष्वभावात् अनित्येषु भावात्कारणे कालाख्येति,, वै·द·२।२।९ स· कालः क्षणादि महाप्रलयान्तानां व्यवहारहेतुः व्यवहारस्य कारणम् इति। क्षणः सामग्री कार्यरहिता, क्षणद्वये, लवः। लवद्वयं निमेषः अक्षि पक्ष्मकर्मैकं वा। यामः सार्द्धसप्तघट्यः। ऋतुत्रयमयनम्, दक्षिणायनोत्तरायणभेदादयनद्वयं भवति। युगः सत्ययुगादयः, कल्पः वाराहादिः। मन्वन्तरं स्वयंभ्वादि, प्रलयः साधारणसृष्टिविनाशः, महाप्रलयः निःशेषद्रव्यविशेष इति। तस्य कालस्य संख्यादिविभागान्ता गुणाः सन्ति। तत्र काले कालस्य लिङ्गानामनुमापकानां युगपदादिप्रत्ययानामविशेषादभिन्नत्वात् एकत्वं सिद्धम्।

मू= सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुस्तद्व्यपदेशात्। क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाऽहोरात्रार्द्धमासमासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्रलयव्यवहारहेतुः। तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः। काललिङ्गाविशेषादेकत्वं सिद्धम्। तदनुविधानात्पृथक्त्वं सिद्धम्। कारणे काल इति वचनात् परममहत्परिमाणम्। कारणपरत्वादिवचनात्संयोगः। तद्विनाशकत्वाद्विभाग इति।

तद्भेदा अपरेऽनुपलभ्यन्ते इति भावः। तथा च "तत्त्वं भावेन,, वै·द·२।२।८। तदनुविधानात् तस्यैकत्वस्याऽनुविधानात् अनुगमनादेकपृथक्त्वं तत्र काले सिद्धम्। यत्रैकत्वं तत्रैकपृथक्त्वम् इति नियमः। तथा च "तदनुविधानादेकपृथक्त्वम्,, वै·द· २।१।२१ "कारणे कालः,, वै·द·७।१।२५ इति कणाद कथनात्तत्र काले परममहत्परिमाणं सिद्धम्। यत्र कुत्रापि सर्वोत्पत्तिमत्सु भूतभविष्यद्वर्तमानकालव्यवहारः सार्वत्रिकः उपलभ्यते न तु क्वाचित्कः, अतः परममहत्परिमाणं तत्र सिद्धमिति बोध्यम्। आयमस्मात्परोऽस्मादस्मादयमपर इति परापरत्वयोः कारणं कालः। तस्मात्संयोगो विद्यते काले तथा च "कारणपरत्वात्कारणापरत्वाच्च,, वै·द·७।१।२२

३२
प्रश-भा
स्टी

तद्विनाशकत्वात्। तस्य संयोगस्य विनाशकः अपहृतो तस्माद्विभागः काले वर्तते "उत्पन्नस्य सति आश्रये विनाशको विभागः तद्विनाशादेव दृष्टः इति। कालस्य नित्यत्वादिकं प्रतिपाद्यते। तस्येति = यथाऽऽकाशस्य द्रव्यत्वं नित्यत्वं सिद्धं तथा तस्याकाशस्यापि द्वे एते सिद्धे इति तथा च "द्रव्यत्वनित्यत्वे वायुना व्याख्याते,, वै. द. २।२।६ काललिङ्गानि यानि परापरादीनि तेषामविशेषादेकत्वादञ्जसा मुख्यया वृत्त्या कालस्यैकत्वे सिद्धेऽपि भूतभविष्यद्वर्तमानकालाः उपाधिभेदात् मणिपाचकवदुपचरन्ति तत्र, यतः काललवादयः काला उपलभ्यन्ते, यथैकः मणिः लोहितपुष्पसन्निधानाल्लोहितः, स एव पीतपुष्पोपाधितः पीतः मणिः। हरितवस्त्रासङ्गेन हरितो मणिरुपचर्य्यते च। अथ च यदैकः पुरुषः पाठयति तदा पाठकः, यदा च पचनक्रियां स एव पुरुषो विधत्ते तदा पाचकः

मू- तस्याकाशवद्द्रव्यत्वनित्यत्वे सिद्धे काललिङ्गाविशेषादञ्जसैकत्वेऽपि सर्वकार्याणामारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचार इति।

वस्तुतस्तु एक एव पुरुषः नानाकर्मोपचारात् पाचकः पाठको वाऽऽहूयते। एवं कालोऽप्येक एवोपाधिभेदाद्भूतकालः, भविष्यत्कालः वर्तमानकाल इति व्यपदिश्यते। सर्वकार्याणां सर्वेषां कार्याणाम् उत्पत्तिमतां पदार्थानाम् आरम्भः उपक्रमः, क्रियाभिनिर्वृत्तिः क्रियाव्यापारः तस्याः अभिनिर्वृत्तिः फलसिद्धिः। स्थितिः स्वरूपाऽवस्थानं निरोधो विनाशः, एषामुपाधीनां भेदाद्द्वेति भक्तस्यापचनकालः वर्तमानकालः, प्रध्वंसेन यः कालोऽवच्छिद्यते स तत्रातीतः कालः, अनारब्धफलाऽवच्छिन्ना, या क्रिया, तदधीनः यः कालः सः भविष्यत्कालः इतिभेदः। तथा च "तत्त्वं भावेन,, वै. द. २।२।८ इति समाप्तौ।

इतिकालनिरूपणप्रकरणम्। श्रीः श्रीः

(अथ दिङ्निरूपणप्रकरणम्) दिशं लक्षयति । दिगिति- इदं पूर्वमिदमपरमित्यादिप्रत्ययो लिङ्गं ज्ञापकं यस्याः सा दिगित्युच्यते। मूर्तं द्रव्यं परिच्छिन्नद्रव्यम् अवधिं कृत्वा सीमीकृत्य मूर्तेष्वेव द्रव्येषु परिच्छिन्नेषु द्रव्येषु एव एतस्मात् स्थानादिदं स्थानं पूर्वेण दक्षिणेन वा भवितव्यमित्यादि दशप्रत्ययाः दशविधा निश्चयाः यतः यस्मात् परत्वापरत्वाद्वाविषयभूता निमित्तात् भवन्ति जायन्ते सा दिगिति। यथा मूलत्राणस्थस्य नरस्य लवपुरमपेक्ष्य काशी परं स्थानं, काशीमपेक्ष्य लवपुरमपरं

मू- दिक् पूर्वापरादिप्रत्ययलिङ्गा। मूर्तं द्रव्यमवधिं कृत्वा मूर्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेण दक्षिणपूर्वेण दक्षिणापरेण अपरोत्तरेण उत्तरपूर्वेण चाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति। अन्यनिमित्ताऽसम्भवात्। तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालवदेते सिद्धाः।

स्थानमिति विवेकः। तथा च "इत इदमिति यतस्तद्दिश्यं लिङ्गम्" वै० द० २।२।१० अनियतोपाध्युपाधिका दिक्, यः जनः कदाचित् यां प्राचीं दिशं स्वीकुरुते, तामेव जातु अन्यापेक्षया प्रतीचीति वदति अतोऽनियमोऽत्र ज्ञाने इति भावः कस्मात् सा दिगित्याह, अन्यनिमित्ताऽसम्भवात्, पूर्वोक्तानाम् एषां प्रत्ययानां निमित्तान्तरस्याऽभावो दृष्टः तस्मात्। तस्या दिशः संख्यादिविभागान्ताः गुणाः सन्ति। एते गुणाः कालवत् यथा काले इमे पञ्च गुणाः सन्ति तथाऽत्रापि सिद्धाः।

श्रीः श्रीः श्रीः श्रीः

दिशामेकत्वेऽप्युपाधिभेदात् भेदानाह । दिग्लिङ्गेति = दिशः यानि लिङ्गानि तेषामविशेषात् । यथा काललिङ्गाऽविशेषात्कालस्यैकत्वं सिद्धं तथा दिक्लिङ्गाऽविशेषाद्दिशः, लिङ्गानां प्राच्यादिप्रत्ययानामविशेषादतादात्म्यात् दिशोऽप्येकत्वं निष्पन्नम् । यत्रैकत्वं तत्रैकपृथक्त्वमिति नियमाद्दिशि एकपृथक्त्वमपि सिद्धम् । "कारणे कालः" वै.द. ७।१।२५ इति वचनात् यथा कालस्य परममहत्त्वे सिद्धं तथा च "गुणैर्दिग्व्याख्याता" वै.द. ७।१।२४ इति कणादवचनाद्दिशः परममहत्त्वे परिमाणे सिद्धम् (वै.द. ७।२।२२) सूत्रात्कालस्य संयोगगुणत्वं तद्विनाशकत्वाद्विभागत्वं प्रतिपादितं तथा दिश्यपि बोध्यम् । दिग्लिङ्गाऽविशेषाद्दिग्लिङ्गानां प्राच्यादिप्रत्ययानामभेदात् दिशः अञ्जसा मुख्यया वृत्त्या एकत्वे सिद्धेऽपि परममहत्परिमाणादेकैव दिक् इति भावः । तथा च "तत्त्वं भावेन" वै.द. २।२।१२ "परममहर्षिभिः" ऋषयो मंत्रद्रष्टारः, महान्श्चासौ ऋषिः महर्षिः, परमश्चासौ महर्षिः परममहर्षिः तैः परममहर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं यथा श्रौतो व्यवहारः "न प्रतीचीशिरः शयीतेति" स्मार्तो व्यवहारः "आयुष्यं प्राङ्मुखो भुङ्क्ते" लोकव्यवहारः

मू = दिग्लिङ्गाऽविशेषादञ्जसैकत्वेऽपि दिशः परममहर्षिभिः श्रुतिस्मृतिलोकसंव्यवहारार्थं मेरुं प्रदक्षिणमावर्तमानस्य भगवतः सवितुर्ये संयोगविशेषाः लोकपालपरिगृहीतदिक्प्रदेशानामन्वर्थाः प्राच्यादिभेदेन दशविधाः संज्ञाः कृताः । अतो भक्त्या दश दिशः सिद्धाः, । तासामेव देवतापरिग्रहात्पुनर्दश संज्ञाः भवन्ति माहेन्द्री वैश्वानरी याम्या नैरृती वारुणी वायव्या कौबेरी ऐशानी ब्राह्मी नागी चेति ।

"मेरुं गच्छ दक्षिणमवलोकयेति" मेरुः भूमध्यपर्वतविशेषः प्रदक्षिणमावर्तमानस्य परिभ्रमतः भगवतः सर्वप्रकाशयुतस्य सवितुः 'भग ऐश्वर्ये' इति धात्वर्थगुणविशिष्टस्येति यावत् सवितुः सूर्यस्य ये संयोगविशेषाः संयोगभेदाः लोकपालाः लोकान् पालयन्तीति लोकपालास्तैरिन्द्रादिभिः परिगृहीतानां स्वाधिकारे प्रापितानां दिक्प्रदेशानां सूर्यसंयोगविभागाः ये सन्ति तेषामिति शेषः । अन्वर्थाः अनुगतोऽर्थो यासामिति अन्वर्थाः यथार्थाः प्राच्यादिभेदेन प्राची आदि परात् "प्राची-

प्रश॰ भा॰
टी॰

अवाची-उदीची-~~प्राची~~ प्रतीची-प्रागवाची-अवाक्प्रतीची-प्रत्युगुदीची-उदक्प्राची-अधः-ऊर्ध्वा इत्येताः परिगण्यन्ते इतिभेदेन दशविधाः संज्ञाः कृता इति तथा च "**आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची**,, वै॰ द॰ २।२।१४,, "**तथा दक्षिणा प्रतीच्युदीची च**,, वै॰ द॰ २।२।१५ "**एतेन दिगन्तरालानि व्याख्यातानि**,, वै॰ द॰ २।२।१६ यथा अन्वर्थास्तथा प्रदर्श्यन्ते सूर्योदयसन्निहिता या दिक् सा प्राची,, सूर्यास्ताचलसन्निहिता या दिक् सा प्रतीची,, पूर्वाभिमुखपुरुषस्य वामभागवती या दिक् सा उदीची, तदवस्थित दक्षिणभागवती या दिक् सा अवाची। प्राच्यवाचीमध्या प्रागवाची, अवाचीप्रतीचीमध्यस्था दिक् अवाक्प्रतीची, प्रतीच्युदीचीमध्यस्था दिक् प्रत्यगुदीची, उदीचीप्राचीमध्यस्था दिक् उदक्प्राची, यतः गुरुत्वात्पतति वस्तु सा दिगूर्ध्वा, यत्र पतति साऽधो दिक् इति। अतोऽस्माद्धेतोर्भक्त्या उपचारेण उपाधिमात्रेणेति यावत् प्राच्यादिका दश दिशाः सिद्धाः। तथा च "**कार्यविशेषेण नानात्वम्**,, वै॰ द॰ २।२।१३ तासामेव दिशां देवतापरिग्रहात् देवतास्वीकारात् पुनर्दश संज्ञा भवन्ति। यथा माहेन्द्री महेन्द्रस्य इयं दिक् माहेन्द्री, वैश्वानरी वैश्वानरस्येयं दिक् वैश्वानरी, याम्या यमो देवताऽस्या इति याम्या, नैर्ऋतिः निर्ऋतिर्देवता अस्या इति नैर्ऋतिः, वायव्या वायुर्देवता अस्या इति वायव्या, कौबेरी कुबेरो देवता अस्या इति कौबेरी दिक्। ऐशानी ईशानो देवता अस्या इत्यैशानी, ब्राह्मी ब्रह्मा देवता अस्या इति ब्राह्मी, नागी नागो देवता अस्या इति नागी दिक् इति।

इति दिक्निरूपणप्रकरणम् ॥

३८
प्रश. भा.
सटी.

पं. २
× यद्यप्यात्मा अहं ममेति स्वकर्मोपार्जितकायकरणसम्बन्धोपाधिकृतकर्तृत्वस्वामित्वरूपसम्भिन्नो मनसा संवेद्यते तत्राऽप्यत्रा प्रत्यक्षत्वमिति बौधो युक्तिबौधे न्द्रियाभिप्रायेण प्रत्यक्षत्वमित्युक्तम् ।

(अथात्मनिरूपणम्) *ं २ प्रत्यक्षोपलब्धि योग्यताविरहः

आत्मेति = आत्मत्वं नाम सामान्यं तदभिसम्बन्धः आत्मत्वाभिसम्बन्धस्तस्मादात्मत्वाभिसम्बन्धात् आत्मा इति व्यवहारः । तस्य आत्मनः सौक्ष्म्यात् अव्यक्तेः यद्वा चक्षुरादिपञ्चेन्द्रियागोचरत्वं सौक्ष्म्यं तस्मात्, अप्रत्यक्षत्वे सति पञ्चेन्द्रियाविषयीभूते सति, तथा च " तत्रात्मा मनश्चाप्रत्यक्षे ,, वै. द. ८।१।२ शब्दाद्यनुपलब्ध्यनुमितैः शब्दः, रूपम्, रसः, गन्धः, स्पर्शः, शब्दादय इमे, तेषामुपलब्धिः प्राप्तिः तयाऽनुमितैरनुमानं प्राप्तैः श्रोत्रादिभिरिन्द्रियैः समधिगमः प्रत्यक्षत्वं क्रियते । यथाऽनुमानम् " शब्दाद्युपलब्धयः करणसाध्याः, क्रियात्वात्, छिदिक्रियावत् इति तथा च "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः ,, वै. द. ३।१।२ वास्यादीनां कुठारादीनां करणानां साधकभूतानां कर्तृप्रयोज्यदर्शनात् कर्तृप्रयोजनं यत्र तस्याऽवलोकनात्

मू = आत्मत्वाऽभिसम्बन्धादात्मा । तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते । वास्यादीनां करणानां कर्तृप्रयोज्यत्वदर्शनात् । शब्दादिषु च प्रसिद्ध्या च प्रसाधकोऽनुमीयते ।

यद्वा यत्करणं तत् केनचित् प्रयोक्त्रा प्रयुज्यते यथा कुठारं निरीक्ष्यानुमीयतेऽस्ति अस्य प्रयोक्ता वर्धकिः, तथा करणञ्च श्रोत्रादिकं दृष्टं "करणं श्रोत्रादीन्द्रियं कर्तृप्रयोज्यं करणत्वात् वास्यादिवत् । अतोऽस्य यः प्रयोक्ता स आत्मा इत्यध्यवसेयम् । शब्दादिषु शब्द आदिपदात् स्पर्शादयो गृह्यन्ते तेषु शब्दादिषु विषयेषु प्रसिद्ध्या प्रसिद्धिः ज्ञानं तया प्रसिद्ध्या च प्रसाधकः तज्ज्ञानसाधकः ज्ञातेति यावदनुमीयते स आत्मेति यथा चाऽनुमानम् " ज्ञानं क्वचिदाश्रितं क्रियात्वात् छिदिक्रियावत् यत्र इदमाश्रितं स आत्मा इति । श्री: श्री:

सटी.
३८

यदि परात्रितं ज्ञानं तर्हि देहादीनां तद्रूपादिति । नेति शरीरस्य इन्द्रियाणां मनसश्च न चैतन्यं जायते। कस्मात्। अज्ञत्वात् तेषां ज्ञानं प्रति न समवायिकारणत्वं सिद्धं तस्मात्। शरीरस्य चैतन्यं न सिद्ध्यति घटादिवद्भूतकार्यत्वात् घटवच्छरीरस्य भूतकार्यं दृष्टं यद्यद्भूतकार्यं न तत्तच्चेतनं यथा घटः, भूतकार्यश्च शरीरं तस्मादचैतन्यं तस्य सिद्धम्। तथा च "सोऽनपदेशः" वै.द. ३।१।२ मृते पञ्चत्वं गते देहे चैतन्यस्याभावो दृष्टः तत्र तथाविधोपकरणवति अपि न चैतन्यमुपलभ्यते "मृते चासम्भवात्" इत्यनेन चैतन्यस्यायावद्द्रव्यभावित्वं विवक्षितं तत्र चाऽनुमानमेतत् "चैतन्यं शरीरस्य विशेषगुणो न भवति अयावद्द्रव्यभावित्वात् संयोगवत्", अतः न शरीरमात्मा। इन्द्रियाणामपि न चेतनत्वं सिद्ध्यति करणत्वाद्दण्डवत् यथा घटं प्रति दण्डः कारणं तथा ज्ञाने प्रतीन्द्रियाणि करणानि उपपन्नानि यथाऽनुमानम् "इन्द्रियाणि अचेतनानि करणत्वाद्दण्डवत् यद्यत्करणं दृष्टं तत्तन्न चेतनं यथा दण्डः तस्मादिमानि न चेतनानि।" हेत्वन्तरमाह। उपहतेषु विनष्टेषु अपीन्द्रियेषु विषयाऽसान्निध्ये पूर्वाऽनुभूतवस्तुनि असमीपस्थे चानुस्मृतिरनुस्मरणमप्यनुज्ञान

मू॰— न शरीरेन्द्रियमनसामज्ञत्वात्। न शरीरस्य चैतन्यं घटादिवद्भूतकार्यत्वात् मृते चाऽसम्भवात्। नेन्द्रियाणां करणत्वात् उपहतेषु विषयाऽसांनिध्ये चाऽनुस्मृतिदर्शनात्। नापि मनसः करणान्तराऽनपेक्षत्वे युगपदालोचनस्मृतिप्रसंगात्। स्वयं करणभावाच्च।

मिति यावत्। तद्दर्शनात्तदवलोकनात्। इन्द्रियहतेऽपि स्मृतिर्दृष्टा यथा च "चक्षुषा दृष्टचरस्य विषयस्येदानीं सति सांनिध्ये चक्षुषि च नष्टे सति तस्य विषयस्य स्मृतिर्न स्यात्। किन्तु स्मृतिर्दृष्टा, तथा हि "यः कश्चिच्चक्षुष्मान् मानवः ये पुरुषं मूलत्राणेऽद्राक्षीत्, स एव पुनः प्रज्ञानेत्रः सन् पूर्वदृष्टस्य पुरुषस्यान्यत्र वचनमाकर्ण्य स्मरति स एवाऽयं मानवो यः मया मूलत्राणे पुराऽवालोकि। अत्रेति स्मरणं न स्याच्चक्षुर्विरहितत्वात् तस्मान्नेन्द्रियाण्यात्मा इति। मनोऽपि नात्मा, यदि मनसि आत्मत्वमुपपद्येत तर्हि सर्वेषामिन्द्रियाणां ज्ञानं युगपदेव स्यात् परञ्च नैवं भवति मनसोऽणुत्वात्। तत्र प्रथमं हेतुमाह "करणान्तरानपेक्षत्वे युगपदालोचनस्मृतिप्रसंगात्। अन्यत्करणं करणान्तरं तस्यानपेक्षत्वेऽपेक्षारहितत्वे सति युगपत्समकालमेव आलोचनस्मृत्योः प्रसङ्गः स्तस्मात्। यदि मनस आत्मत्वं स्यात्तदा मनसश्च विभुत्वं सिद्धं तत्सिद्धे सर्वेन्द्रियैः सह तत्सम्बन्धः, तत्सत्वे सर्वाणि ज्ञानानि युगपत्सेत्स्यन्ति परञ्च नैतद्भूतं दृष्टञ्च। मनसः करणत्वेऽणुत्वे च सिद्धे सर्वेन्द्रियैरसम्बन्धाद्युगपज्ज्ञानानुत्पत्तिः सिद्धा। यथा चाह गौतमः "युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगम्" न्या. २।१।१।१६ तत्र द्वितीयहेतुमाह। स्वयं करणभावाच्च, मनः स्वयमेव करणं हेतुः तस्य भावात्, मनसश्च न चैतन्यं करणत्वाद् घटादिवदिति सिद्धम्।

ज्ञानाधिष्ठानं तर्हि किं तत्राह । परिशेषेति = ज्ञानं यथा न मनसः, न वा शरीरादेः कार्यं तत्तु प्रतिषिद्धमेव पूर्वम् । यदाऽन्यत्र न कार्यत्वं सिद्धं ज्ञानस्य तदा परिशेषात् ज्ञानमात्मकार्यमेव सिद्ध्यति, तेन कार्येण ज्ञानेनात्मा समधिगम्यते । प्रायतो यथा चाऽनुमीयते " ज्ञानं क्वचिदाश्रितं कार्यत्वात् रूपादिवत् ,, तथा च " आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् ,, वै० द० ३।१।१९ शरीरे आत्मसिद्धौ प्रमाणान्तरमाह ॥ शरीरेति । शरीरसमवायिनीभ्यां समवायो विद्यतेऽत्रेति समवायी शरीरे समवायी शरीरसमवायी स्त्रीवत् शरीरसमवायिनी ताभ्यां शरीरसमवायिनीभ्यां देहसमवायसम्बन्धवतीभ्यां तथाभूताभ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यां हितं सुखम् अहितं दुःखं ते हिताहिते तयोः प्राप्तिश्च परिहारश्च प्राप्तिपरिहारौ हितस्य प्राप्तिः अहितस्य परिहारः इत्यर्थः । तत्र योग्याभ्यां समर्थाभ्यां प्रवृत्तिनिवृत्तिभ्यां हिते प्रवृत्तिः अहितान्निवृत्तिः ताभ्यां प्रयत्नवान् प्रयत्नगुणविशिष्टो विग्रहस्य शरीरस्याधिष्ठाता स्वामी

मू० = परिशेषादात्मकार्यत्वात् । तेनात्मा समधिगम्यते । शरीरसमवायिनीभ्यां च हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् प्रयत्नवान् विग्रहस्याधिष्ठाताऽनुमीयते । प्राणादिभिश्च ।

अनुमीयते परिलिङ्ग्यते । तत्र दृष्टान्तः, रथकर्मणा सारथिवदनुमीयते । यथा रथस्य प्रचलनद्वारेण ज्ञायते तत्रस्थः कश्चित् सारथिः, तथा देहस्य चलनादिप्रवृत्त्याऽऽत्माऽनुमीयते । तथा चाऽनुमानम् " साधनोपादानपरिवर्जनद्वारेण हिताहितप्राप्तिपरिहारसमर्था चेष्टा, प्रयत्नपूर्विका, विशिष्टक्रियात्वात्, रथक्रियावत् । यद्वा " शरीरं प्रयत्नवदधिष्ठितम् क्रियात्वात् रथवत् । अथ पदकृतिः । लतादिप्रवृत्तिव्यवच्छेदार्थं शरीरसमवायिनीभ्यामित्युपन्यस्तम् । स्रोतःपतितमृतशरीरप्रवृत्तिनिवृत्तिव्यवच्छेदार्थं हिताहितप्राप्तिपरिहारयोग्याभ्यामित्युक्तम् ॥ हेत्वन्तरं तत्राह । प्राणादिभिरिति- प्राणः आदिपदात् अपाननिमेषोन्मेषादीनां परिग्रहः । तैः प्राणादिभिः प्रयत्नवान् शरीराऽधिष्ठाताऽनुमीयते ।

प्राणादिभिरात्मा कथं निश्चीयते। कथमिति = कथमिति प्रश्ने, अस्ति किमु किञ्चिदुदाहरणं तत्रेति पृच्छति। तत्राह वायौ प्राणपानाख्येति यो गमनस्वभाववत्यपि वायौ शरीरपरिगृहीते देहस्वीकृते सति विकृतकर्मदर्शनात् विकृतं स्वभावविपरीतं यत्कर्म अधोगमनमूर्ध्वगमनञ्च तस्य दर्शनं भवति तत्र कदाचिद्वायुरूर्ध्वं गच्छति कदाचिदधो गच्छति च तदवलोकनादनुमीयते अस्ति तदधिष्ठाता कश्चित्। तथा च "प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि".. वै·द· ३।२।४.. तत्र दृष्टान्तः भस्त्राध्मायितेव "भस्त्रं निर्मोसाजादिचर्म तदेवाग्निप्रज्वालनाय सञ्चालकैः सञ्चाल्यते। तदेव मुहुर्मुहुः श्वसिति तच्छ्वासयिता तत्रान्यो भवति। एवं शरीरे वायुप्रचारकोऽन्यः। योऽस्ति स एवात्मेत्युच्यते। तथा चाऽनुमानम् "शरीरं प्रयत्नवदधिष्ठितम्, इच्छापूर्वकविकृतवाय्वाश्रयत्वात्, भस्त्रावत् इति।

मू = **कथम्। शरीरपरिगृहीते वायौ विकृतकर्मदर्शनाद् भस्त्राध्मायितेव। निमेषोन्मेषकर्मणा नियतेन दारुयंत्रप्रयोक्तेव।**

निमेषेति = नियतेन सर्वदा स्थायिना निमेषोन्मेषकर्मणा "अक्षिपक्ष्मणोः संयोगजनकं कर्म निमेषः, तयोर्विभागनिमित्तं कर्म उन्मेषः, निमेषश्चोन्मेषश्च निमेषोन्मेषौ तयोर्यत्कर्म तेन निमेषोन्मेषकर्मणा प्रयत्नवान् शरीराऽधिष्ठाताऽऽत्माऽनुमीयते, दृष्टान्तो यथा दारुयंत्रप्रयोक्तेव। यथा दारुयंत्रं पुरुषः प्रयुनक्ति, न च दारुयंत्रं स्वयमेव युज्यतेऽतो निमेषोन्मेषकर्मणः कर्ताऽप्यन्यः योऽस्ति स एव प्रयत्नवान् देहस्वामी आत्मा इत्यनुमीयते। इत्यत्र वायुवशेनापि दारुयंत्रस्य निमेषोन्मेषौ स्यातां तन्निवृत्यर्थं नियतेनेति।

जीवनमप्यात्मनो लिङ्गं यथैवास्ति तथा निर्दिशति । देहस्येति = देहस्य शरीरस्य वृद्धिः प्रतिक्षणमङ्गानामुपचयः, क्षतस्य कृत
श्छेदस्खलितस्य भग्नस्य त्रुटितस्य संरोहणं पुनरुत्पत्तिः तयोर्निमित्तत्वात् कारणत्वात् देहाधिष्ठाता प्रयत्नवान् पृथगनुमीयते
तत्र दृष्टान्तः। गृहपतिरिव गृहस्वामीव, यथा गृहपतिः स्वगृहं वर्द्धयति क्षतं भग्नं वा संयोजयति, न च गृहं स्वयमेव वर्द्ध
ते. नहि पुनः स्वयमेव तत्संधानं दृष्टम्। एवं शरीरस्यापि निश्चेतव्यम्। यः शरीरस्य वृद्ध्यादिकर्ता स एवात्माऽनुमीयते।
यथाऽनुमानम् "शरीरस्य वृद्धिक्षतभग्नसंरोहणं प्रयत्नवता कृतम्, वृद्धिक्षतभग्नसंरोहणत्वात्, गृहवृद्धिक्षतभग्नसंरोहण-
वत्। यथा मनोगतिरप्यात्मलिङ्गं तथाऽऽचष्टे। अभिमतेति = अभिमतः स्वत्वस्यानाधिकृतत्वेनाभिलषितो यो विषयोऽर्थः तस्य

मू = देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वाद् गृहपतिरिव। अभिमतवि-
षयग्राहककरणसम्बन्धनिमित्तेन मनःकर्मणा गृहकोणोपलप्रेर
कदारक इव।

यद्ग्राहकं घ्राणादिकं करणमिन्द्रियं तेन सम्बन्धः मनोयोगः तस्य निमित्तेन निमित्तभूतेन मनःकर्मणा मनोगत्या प्रय
त्नवान् मनःप्रेरक आत्माऽनुमीयते। तत्र दृष्टान्तः गृहकोणोपलप्रेरकदारक इव गृहकोणे उपलः पाषाणं तस्य प्रेरकः
परिक्षेपकः यः दारकः बाल इव, नहि पाषाणं गृहकोणे प्रेरकमन्तरेण गन्तुमर्हति तत्राऽनुमीयते तत्प्रक्षेपकः।
एवं गन्धादिदाने कुत्रचित्कर्मणि मनः प्रेरयतो यस्येच्छा प्रतीयते स आत्मा इत्यध्यवसेयम्। तत्राऽनुमानम् यथा।
प्रयत्नवता प्रेर्यं मनः अभिमतविषयसम्बन्धनिमित्तक्रियाश्रयत्वात् दारकहस्तस्थोपलवत्। श्रीः
श्रीः श्रीः श्रीः

इन्द्रियान्तरविकारेण आत्मानं साधयति। नयनेति= नयनविषयालोचनानन्तरं नयनस्य नेत्रस्य विषयो रूपं तस्य यदा लोचनं अवलोकनं तदनन्तरं रूपाऽवलोकानन्तरं रसाऽनुस्मृतिक्रमेण तत्सहचरितमधुरादिरसानुस्मरणक्रमेण रसनविक्रियाद र्शनात् रसनेन्द्रियस्य [redacted] या विक्रिया विकारः तद्दर्शनं तस्मात् प्रयत्नवान्। कश्चिदुभयदर्शी रूपरसाऽनुभवकर्ता एकः हृदयाकाशवर्ती आत्मा एव विज्ञायते। तत्र दृष्टान्तः "यथा कश्चिन्मानवः गवाक्षमध्यगः गृहान्तर्वस्तूनि गृहात् बहिःस्थितवस्तूनि च पश्यति तथैवात्माऽसहायः द्वाभ्यामिन्द्रियाभ्यां रूपरसयोर्दर्शी चेतनः कश्चित्, स एवात्मेति निश्चीयते। न च शरीरमेव स्मर्तृ भवति भविष्यतीति वाच्यम् बाल्यावस्थाऽनुभूतस्य पदार्थस्य स्थविरे स्मरणं नोपपद्यते

मू= नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियादर्शनाद नेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी कश्चिदेको विज्ञायते। सुखदुः-खेच्छाद्वेषप्रयत्नैश्च गुणैर्गुणी अनुमीयते।

परिणामित्वात्। किन्तु स्मरणं दृष्टम्। नान्यदृष्टं स्मरत्यन्यः,, इति न्यायात् स्मर्ता कोऽन्यः कश्चित् आत्मेत्याध्येयम्। हेत्वन्तरेणात्मानं समाधत्ते। सुखेति= सुखादयो गुणाः प्रतिपादिताः, गुणानां गुणाश्रयत्वं दृष्टं यथा रूपादि, इमे सुखादयः अहंप्रत्ययसमानाधिकरणा बाह्येन्द्रियैरप्रत्यक्षाः न पृथिव्यादिषु द्रव्येषु समाश्रयन्ते, तदाश्रयेण द्रव्येणैव भवितव्यम्। अतस्तेषामाश्रयो यद्द्रव्यं स एवात्मा सुखादिगुणविशिष्टः गुणी अनुमीयते। तथा च सूत्रम् "प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिङ्गानि,, वै॰ द॰ ३।२।४ ,,। श्री:

श्री:

श्री:

सुखादीनामात्मगुणत्वं शरीरेन्द्रियप्रतिषेधान् निर्दिशति। नेति= सुखादयः पञ्च गुणाः न शरीरस्य न वा इन्द्रियाणामिति। कस्मात् कारणान्न सन्ति ते गुणाः इति प्रश्ने जाते पञ्चभिर्हेतुभिरुत्तरयति। प्रथमं हेतुमाह "अहंकारेणैकवाक्यताभावात्। अहंकारेण "अहं सुखी अहं दुःखी अहं जाने इति प्रत्ययेन एकवाक्यत्वमेकाधिकरणत्वं सिद्धं तस्मान्न शरीरस्य गुणाः। यदि शरीर प्रत्यक्षाः सुखादयो भवेयुस्तर्हि एकस्मिन् देहे यदा सुखं तदा परत्रापि तदेवोपपद्येत, तद्व्यतिरेकात् परस्त्र नैषोऽवलोक्यते नियमः। तथाच "अहमिति प्रत्यगात्मनि भावात् परत्राभावाद् र्थान्तर प्रत्यक्षः" वै० द० ३।२।१४। द्वितीयं हेतुमाह। प्रदेशवृत्तित्वात्। कण्ठे मे पीडा, हस्ते सुखं मे, सुखादीनामेकस्मिन् देशे वृत्तिस्त स्मान्न शरीरेन्द्रियगुणाः। यदि शरीरादीनां सुखादयः प्रतिपद्येयुर्गुणास्तर्हि मे कण्ठः मे हस्त इति न व्यवह्रियेत कदापि। परञ्च व्यवह्रियते एतत् "षष्ठी शेषे" अष्टा० २।३।५० इत्युक्तेः, सम्बन्धः सम्बन्धिनः पृथक् अतः आत्मा शरीरात्पृथक् ते सुखादयस्तद्गुणा एव न तु शरीरादीनाम्। तृतीयं हेतुमाह। अयावद्द्रव्यभावित्वात् यावत्स्वाश्रयद्रव्यं भवितुं वर्तितुं शीलं यस्येति यावद्द्रव्यभावी, न ये तद्विधाः सन्ति तेऽयावद्द्रव्यभाविनः तेषां भावः अयावद्द्रव्यभावित्वं तस्मात् सुखादयो न शरीरादीनां गुणाः। यथा रूपादयो जलादीनां यावद्द्रव्यभाविनो दृष्टाः

मू०= न शरीरेन्द्रियगुणाः। कस्मात्। अहंकारेणैकवाक्यताभावात्, प्रदेशवृत्तित्वात्। अयावद्द्रव्यभावित्वात्। बाह्येन्द्रियाऽप्रत्यक्षत्वाच्च। तथाऽहंशब्देनापि पृथिव्यादिशब्दव्यतिरेकादिति।

तथा नैवोपलभ्यते सुखादिषु। तस्मात्सिद्धं समीहितं सुखादयः सिद्ध्यन्ति आत्मगुणाः न तु शरीरादीनाम्। यथा च प्रत्यपादि भगवता गोतमेन "यावच्छरीरभावित्वात् रूपादीनाम्" न्या० द० ३।२।५१ चतुर्थं हेतुमाह बाह्येन्द्रियाऽप्रत्यक्षत्वात्। बाह्येन्द्रियैश्चक्षुरादिभिः अप्रत्यक्षाः सुखादयः तस्मादात्मगुणाः, शरीरगुणाः रूपादयः बाह्येन्द्रियैः प्रत्यक्षीभवन्ति। यदि सुखादयः शरीर गुणाः सिद्ध्येयुस्तर्हि तेऽपि बाह्येन्द्रियैः स्वीक्रियेरन्। तत्र वैधर्म्यान्न सुखादयः शरीरगुणाः किन्तु आत्मन एव सिद्धाः। यथाह भगवान् गोतमः "ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः" न्या० द० ३।२।५९ तथाऽहं शब्देनाप्यात्माऽनुमीयते ऽहमेवास्मीति प्रतीतेः। तस्मात् यः अहं शब्द प्रयोक्ता स आत्मेति बोध्यम्। कस्मात्। पृथिव्यादिशब्दव्यतिरेकात्। तत्राहं शब्दस्य पृथिव्यादिभिः सह व्यतिरेको दृष्टः। न कोऽपि मानवः अहं पृथिवी अहमुदकमिति प्रत्येति। परन्तु पार्थिवं मे शरीरमिति व्यवहरति। तस्मान्नायमहंशब्दः पृथिव्यादिविषयः। तथा च सूत्रम् "अहमिति मुख्ययोग्याभ्यां शब्दव्यतिरेकाव्यभिचाराद्विशेषसिद्धेर्नागमिकः" वै० द० ३।२।१८।

प्रश॰भा॰
सरी॰

आत्मगुणानाह । तस्येति = तस्यात्मनो बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः,

मू॰ = तस्य गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कार
संख्यापरिमाणपृथक्त्वसंयोगविभागाः ।

संख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, इति चतुर्दश गुणाः सन्तीति । श्रीः

आत्मगुणा बुद्ध्यादयः सन्तीत्यत्र कणादसम्मतिं दर्शयति। आत्मेति = आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धा निरूपिताः सन्ति यथा च "प्राणापाननिमेषोन्मेष —,, वै० द० ३।२।४ धर्माधर्मावपि आत्मगुणौ स्तः। तथा च "आत्मान्तरगुणानामकारणत्वात्,, वै० द० ६।१।५,, इति वचनादिति कणादमुनिकथनात् धर्माधर्मौ तत्र निश्चयौ। आत्मान्तरगुणानां येनात्मना कृतानां यागहिंसादिपुण्यपापानां मात्मान्तरेऽन्यस्मिन्नात्मनि सुखदुःखानां फले नोपपद्यते किन्तु येनैव यत्पुण्यं पापं वा कृतं तेनैव तत्फलमुपभुज्यते इति निष्कर्षः। यथा भगवान् जैमिनिरप्याह पूर्वमीमांसायाम् "शास्त्रफलं प्रयोक्तरि,, पू० मी० ३।७।१५। तत्रात्मनि संस्कारो भावनाख्य उपलभ्यते। स्मृत्युत्पत्तौ दृष्टं दृश्यते एव स्मृत्युद्बोधकः संस्कारः,, आत्मनि समवायिकारणे पूर्वोऽनुभवजनितभावनाख्यः संस्कारः उत्पद्यते, यः स्मृत्याविष्करणे कारणीभूतः संतिष्ठते। तथा च "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः,, वै० ९।२।६ संख्यापृथक्त्वेऽपि तत्रात्मनि विद्येते, कस्मात्। व्यवस्थावचनात् "बहुविधविभक्तानां सुखदुःखादीनां प्रत्यात्मममनुसन्धानं व्यवस्था,, यथा च दृश्यते संसारे कश्चिद् धनः कश्चित्कालः, कश्चिद्रूपलावण्यपरिभूषितः, कश्चिन्मूर्खः, कश्चित्पण्डितः, इति तत्रानुमीयते सन्ति नानात्मानः, नैकः। यदि प्रतिपद्येतैकः, तदा बाल्याद् अनुभूतस्य स्थविरे स्मृतिरनुसन्धीयते, इति वदेकस्याः स्मृतेः सर्वत्रैकस्मिन्नेवानेहसि जायेत, एकस्मिन् जीवे सुखिनि सर्वे सुखिनः

मू० आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः। धर्माधर्मौ वात्मान्तरगुणानामकारणत्ववचनात्। संस्कारः स्मृत्युत्पत्तौ कारणवचनात्। व्यवस्थावचनात् संख्यापृथक्त्वमप्यत एव, तथा चात्मेति वचनात् परममहत्परिमाणं सन्निकर्षजत्वात् सुखादीनां संयोगः। तद्विनाशकत्वाद्वि

एकस्मिन् दुःखिनि च सर्वे दुःखिनो भवेयुरित्यपि नियमः सिद्ध्येत, परन्त्व नैतदवलोक्यतेऽतः परिमीयते, बहवः भाग इति।

आत्मानो न एकः इति तथा च "व्यवस्थातो नाना,, वै० द० ३।२।२० इति वचनात् पृथक्त्वमपि सिद्धम्। तत्र संख्यानुविधायित्वात् पृथक्त्वस्येति। परममहत्परिमाणमप्यात्मनि विद्यते "यस्य सर्वत्र व्यापकत्वं परिसमूह्यते तस्यैव परममहत्परिमाणं सेद्धुं पार्यते नान्यस्येति भावः। आत्मा सर्वत्र व्यापको दृष्टः, परमात्मनित्वेवंविधं लक्षणं युक्तं परन्त्व जीवात्मनि नैतद्युज्यते "आकेशान्नखाग्रेभ्यः इत्युक्तेः। परमात्मा तु सर्वत्र सर्वत्वेन परममहत्परिमाणवान्" तत्तु समन्वयात्,, वे० द० १।१।४,, इति प्रमाणात्। जीवात्मा तु शरीरावच्छेदेन न महत्परिमाणवान् ज्ञायते इति "अणोरणीयान् महतो महीयान्, अतः आत्मशब्दगतं तद्वृत्ति दृष्टान्तोऽवबुध्यते जीवात्मा स्वशरीरसम्बन्धेन विभुरिति विवेकः तथा च "विभवान्महानाकाशस्तथा चात्मा,, वै० द० ७।१।२२" संयोगगुणोऽप्यात्मनि विद्यते। सुखादीनामात्मगुणानां सन्निकर्षजत्वात् सन्निकर्षः इन्द्रियार्थानामर्थे यो मनःसंयोगः, तस्य यः आत्मना सह सन्निकर्षः संयोगस्तस्मात् जायते इति सन्निकर्षजः तस्य भावः सन्निकर्षजत्वम्, तस्मात् सन्निकर्षजत्वात् आत्मनि संयोगः सिद्धः। तत्रात्मनि विभागोऽपि प्रतिपद्यते। तद्वि संयोगस्य विनाशकत्वाद्विभागः सिद्ध इति। आत्ममनःसंयोगो ज्ञानकारणं तदभावे ज्ञानं नोत्पद्यतेऽत आत्मनि विभागोऽपि सिद्धः, तथा च "आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्

"वै० द० ३।२।१,, इत्यात्मनि पतनम्॥

*स्वाधिष्ठितैः *सन्निविष्टैः

प्रधानत्वात् प्रथममात्मानम् आख्याय मनोनिरूपणार्थमाह ॥ **मनस्त्वेति** = मनस्त्वं नाम सामान्यं तद्योगः संश्लेषः तस्मात् मनस्त्व संयोगात् मनः सिद्धम्। आत्मेन्द्रियार्थसान्निध्ये आत्मनः *इन्द्रियैः सह सम्बन्धः, इन्द्रियाणाञ्चार्थैः *सान्निध्यं सन्निकर्षः तस्मिन्नात्मेन्द्रियार्थसान्निध्ये सति अपि सुखादीनां *भूत्वोत्पत्तिदर्शनात् इति। एकस्मिन् विषये प्रतीयमाने विषयान्तरे ज्ञानसुखादयो न न भवन्ति, तदुपरमाच्च भवन्तीति दृश्यते। तद्दर्शनादिन्द्रियार्थसन्निकर्षेभ्यः करणान्तरं हेत्वन्तरम् अनुमीयते अनुमानविषयीक्रियते। यस्य सान्निध्यात् ज्ञानसुखादीनामुत्पत्तिः असन्निधानाच्च अनुत्पत्तिः, तत्रानुमानम् यथा "आत्मेन्द्रियार्थसन्निकर्षः कार्योत्पत्तौ करणान्तरसापेक्षः, सत्यपि आत्मेन्द्रियार्थसन्निकर्षे कार्यानुत्पादत्वात् तन्त्वादिवत् यच्च तदपेक्षणीयं तन्मनः *प्रमाणान्तरमप्याह। **श्रोत्रेति** = श्रोत्राद्यव्यापारे श्रोत्रादीनामिन्द्रियाणाम व्यापारेऽप्रवृत्तौ स्मृत्युत्पत्तिदर्शनात् स्मृत्युत्पत्तेः स्मरणप्रादुर्भावस्य दर्शनात् यत् स्मरणोत्पत्तिं विदधाति तन्मनः। यथाऽनुमानम् "स्मृतिरिन्द्रियजा, ज्ञानत्वात् गन्धादिज्ञानवत्। यतो नास्याः स्मृतेः श्रोत्रादीनि इन्द्रियाणि करणानि श्रोत्रादिव्यापाराऽभावेऽपि बधिरादीनां स्मृतिदर्शनात् तस्माद् यदस्या

सू = मनस्त्वयोगान्मनः। सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूत्वोत्पत्ति-दर्शनात् करणान्तरमनुमीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनात्। बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरभावाच्चान्तःकरणम्। तस्य गुणाः, संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः।

करणमिन्द्रियं तत् मनः। बाह्येन्द्रियैः बाह्येन्द्रियाणि चक्षुरादीनि तैः अगृहीतसुखादिग्राह्यान्तरभावात्। अगृहीताः अस्वीकृताः ये सुखादयः तेषां ग्राह्यान्तरभावात् अन्येन स्वीकृतत्वात् *अन्तःकरणं मनः, तत्रानुमानम् यथा "सुखादिप्रतीतिरिन्द्रियजा अपरोक्षप्रतीतत्वात् रूपादिप्रतीतिवत् यच्च तदिन्द्रियं तत् मनः, चक्षुरादीनां तत्र व्यापाराऽभावात्। **तदेवं सिद्धे मनसि तस्य गुणान् प्रतिपादयति। तस्येति** = तस्य मनसः संख्यादिविभागान्ता गुणाः पञ्च, परत्वम् अपरत्वम् संस्काराः, मिलित्वाऽष्टौ गुणाः सन्ति ॥

*पं. २ यत्सुखादिकं न चक्षुरादीनि इन्द्रियाणि स्वीकर्तुं समर्थानि परञ्च सुखादयः उपलभ्यन्ते, तत्र नियम्यते अस्ति तत्करणं किञ्चित् यतस्ते न चानिमित्ताः संभवितुमर्हन्ति तस्माद् यन्निमित्तं तेषां तदेव मन इति ध्येयम् अतः, तथा च सूत्रम् "आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे," वै. द. ५।२।१५

*पं. ३ यदा सुखादि ज्ञानं करणजन्यं ज्ञानत्वात् गन्धादिज्ञानवत्, अत्र घ्राणादि अन्यत्करणं तस्मादात्मनोऽतिरिक्तं करणं तन्मन इति तत्र प्रमाणम् ३।२।१

सर्वगुणेषु प्रमाणमात्रप्रे ॥ प्रयत्नेति = तस्य मनसः प्रतिशरीरं शरीरं शरीरं प्रति प्रतिशरीरं च एकत्वं सिद्धम्। यदि एकस्मिन् शरीरे बहूनि मनांसि सिद्ध्येयुः तर्हि प्रत्ययुं प्रतीन्द्रिये तत्सत्वे बहूनि ज्ञानानि बहवः प्रयत्नाः च उत्पद्येरन्, परञ्च प्रयत्नादीनां क्रमवर्तित्वमुपलभ्यम् अतः प्रतिपद्यते मनसि एकत्वम्। कस्मात् प्रयत्नज्ञानाऽयौगपद्यात् प्रयत्नायौगपद्ये यथा "भोऽयवस्तुन उपादाने भोजने ~~तस्मात् प्रयत्नज्ञानायौगपद्यात्~~ युगपन्न भवतः। ज्ञानाऽयौगपद्यं यथा 'पुष्पस्य दर्शनं स्पर्शनञ्चेति. युगपद्द्वे ज्ञाने न भवतः। तथा च सूत्रम् "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्" वै·द· ३।२।३ तत्र मनसि पृथक्त्वमप्यस्ति संख्याऽनुविधानादेव पृथक्त्वमपि सिद्धम्। अन्यदेव दर्शयति = तदिति = तदभाववचनात् तस्य विभवस्य मनसि अभावोऽस्ति भगवता कणादेन, तस्मात्तत्र मनसि अणुपरिमाणं सिद्धम्। सर्वमूर्तसंयोगित्वं मनसि यदि वर्तेत; तर्हि युगपदनेकेन्द्रियसंयोगे सति

मू·= **प्रयत्नज्ञानाऽयौगपद्यवचनात् प्रतिशरीरमेकत्वं सिद्धं पृथक्त्वमप्यत एव। तदभाववचनादणुपरिमाणम्। अपसर्पणोपसर्पणवचनात् संयोगविभागौ। मूर्तत्वात् परत्वाऽपरत्वे संस्कारश्च।**

ज्ञानयौगपद्यं स्यात् तत्र दृश्यतेऽतोऽणु मनः। तथा च सूत्रम् "तदभावादणु मनः" वै·द·७।१।२३ तत्र मनसि संयोगविभागौ गुणावपि स्तः, कस्मात् अपसर्पणोपसर्पणवचनात्। अपसर्पणोपसर्पणवचनात्। अपसर्पणं शरीरात् निःसृतिः, उपसर्पणं शरीरान्तरे प्रवेशः, ताभ्यां मनसि संयोगविभागौ सिद्धौ। यथा यदा मनः पूर्वदेहात् निःसरति तदा शरीराद्विभागः तस्यैव देहान्तरे प्रवेशादेव संयोगः। आत्मनो विभुत्वेनाऽपि शवे ज्ञानाऽभावात् शरीरसंयोग इत्युक्तम्। आत्ममनःसंयोगो ज्ञानकारणमिति नियमोऽस्ति तत्र मनःसंयोगोऽतो नास्ति शवे ज्ञानादिकमतः सिद्धमिदं मनसः संयोगविभागौ गुणौ स्तः। तथा च सूत्रम् "अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि" वै·द· ५।२।१७ तत्र मनसि परत्वमपरत्वञ्च वेगाख्यसंस्कारश्चास्ति कस्मात् मूर्तत्वात्। मूर्तत्वं नाम एकप्रदेशाऽवच्छिन्नत्वम् अतः यथा घटे मूर्तत्वं तथाऽत्रापि ७।१।२३ सूत्रात् कणादेन तस्य मूर्तत्वं प्रतिपादितमिति। तथा च सूत्रम् "एकदिक्काभ्यां एककालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च" वै·द·७।२।२१ ॥

मनसो यथा द्रव्यत्वं सिद्धं तथाऽऽत्रष्टे ॥ असस्पर्शवत्त्वादिति = स्पर्शो मनसि नोपलभ्यते, तस्मात्तत्र द्रव्यानारम्भकत्वं सजातीयद्रव्यार
म्भः तत्र नास्ति, यानि स्पर्शवन्ति द्रव्याणि, तत्र दृष्टं सजातीयद्रव्यारम्भकत्वं यथा पृथिव्यप्तेजोमरुतां सजातीयद्रव्यारम्भो दृष्टः
न च तथा मनसि उपलभ्यते, तत्राऽनुमानं यथा "मनः अस्पर्शवत्, शरीरान्यत्वे सति, सर्वविषयज्ञानोत्पादकत्वात्, आत्मवत्,
तस्मादात्मवदेव सजातीयद्रव्याऽनारम्भकत्वं तत्र मनसि सिद्धमिति। तस्य मनसः मूर्तत्वं सिद्धम्। कस्मात् क्रियावत्त्वात्. संयोग
विभागादि क्रिया तत्र मनसि दृष्टा तस्मात्, यत्र क्रिया तस्यैव मूर्तत्वं यथा घटादि द्रव्यं क्रियायामेवैकदेशसंयोगोऽपरदेशविभा
गश्च उपलभ्यते, तथैव मनोऽपि मूर्तं दृष्टम्। तत्राऽनुमानं यथा "मनः मूर्तं क्रियावत्त्वात् घटादिद्रव्यवत्। मनसि अज्ञत्वम
पि सिद्धं मनो न ज्ञातृ कस्मात् साधारणविग्रहवत्त्वप्रसंगात्। विग्रहो विद्यतेऽत्रेति विग्रहवत् तस्य भावो विग्रहवत्त्वं साधार
णश्च विग्रहवत्त्वश्चेति साधारणविग्रहवत्त्वं तस्य प्रसङ्गः प्राप्तिः इति साधारणविग्रहवत्त्वप्रसंगः तस्मात् साधारणविग्रहव

मू॰ = असस्पर्शवत्त्वाद्द्रव्यानाऽऽरम्भकत्वम्। क्रियावत्त्वान्मूर्तत्वम्। साधारणविग्रहवत्त्वप्रसंगा
दज्ञत्वं करणभावात्परार्थं गुणवत्त्वाद्द्रव्यं प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि
चेति॥ इति श्री प्रशस्तपादमुनिप्रणीते प्रशस्तपादभाष्ये द्रव्यपदार्थः समाप्तः॥

त्त्वप्रसंगात्। यदि मनसो ज्ञातृत्वमुपपद्येत, तर्हि शरीरस्यापि साधारणोपभोगायतनत्वं सिद्ध्येत, परन्तु नैवं दृष्टमेकाऽभिप्राया
नुरोधेन तस्य सर्वदा प्रवृत्तिनिवृत्ती उपलभ्येते। तस्मादज्ञं मनः इति। करणेति। तस्य मनसः करणत्वं पूर्वमुपपादितं तत्सत्त्वात्परार्थ
मेव तस्य, परस्योपभोगसाधनमित्यर्थः। तस्य मनसो द्रव्यत्वमपि सिद्धम् कस्मात् गुणवत्त्वात्। गुणा विद्यन्तेऽत्र इति गुणवान्
क्लीबे गुणवत् तस्य भावो गुणवत्त्वम् तस्माद्गुणवत्त्वाद्द्रव्यमेव मनः पृथिव्यादिवत्। यथा पृथिव्यां गन्धो गुणः तथा मनसि सुखादि
यः, यथा पृथिव्याः द्रव्यत्वं तथा मनसोऽपीति सिद्धम् गुणाश्रयत्वे द्रव्यत्वमिति नियमात्। यथाऽनुमानं "मनो द्रव्यं गुणवत्त्वात् पृ
थिवीवत्, यत्र यत्र गुणाः तत्र तत्र द्रव्यमिति। तथाच सूत्रम् "**तस्य द्रव्यत्वनित्यत्वे वायुना व्याख्याते**.. वै॰ द॰ ३।२।२ तदेवमत्र
आशुसञ्चारि शीघ्रतरवेगवत् मनः एव, कस्मात् प्रयत्नादृष्टपरिग्रहवशात् प्रयत्नादृष्टगुणस्वीकृतिवशात् तत्र प्रयत्नगुणेन यथा –
सञ्चरति मनः तथा निर्दिश्यते वनादौ सिंहादिभयं दृष्ट्वा तस्मात् पलायितुकामस्य जनस्य मनः जिजीविषया प्रयत्नेन परिगृहीतं निर्भीति
स्थाने समागत्य प्रशाम्यति। तथाऽदृष्टपरिगृहीतं तदेव मरणानन्तरमेकस्माद्देहात् देहान्तरमाशु सञ्चरतीति मन्तव्यम्। इति **श्रीतेया**
वासतव्य जगन्नाथशास्त्रिकृते भाष्यप्रकाशे द्रव्यपदार्थः समाप्तः १।

"येन व्याप्तं जगत् सर्वं स्वस्वरूपप्रकाशतः। तस्मै ज्ञानस्वरूपाय नमोऽस्तु परमात्मने॥१॥"

रूपेति- सर्वेषां चतुर्विंशतिरूपादीनां गुणानां गुणत्वाभिसम्बन्धो गुणत्वं नाम सामान्यं तेन अभिसम्बन्धः गुणत्वाऽभिसम्बन्धः सिद्धः। द्रव्याश्रितत्वं द्रव्योपसर्जनत्वं, निर्गुणत्वं द्रव्यं गुणेन कर्मणा वा अनुसन्धातुं पार्यते, न गुणः न कर्म च, तस्य हि विरोधकत्वोऽनुपपत्तेः। तस्मात् सिध्यते गुणवत्ता गुणाः गृह्यन्ते न गुणेन। गुणे गुणाऽनङ्गीकारात्। तथा च सूत्रम् "कर्मभिः कर्माणि गुणैश्च गुणाः व्याख्याताः" वै॰ द॰ ७।१।१९ निष्क्रियत्वं क्रियारहितत्वं रूपादिषु या क्रियाप्रतीतिः सा द्रव्याश्रितत्वेन ज्ञायते, न च सा क्रिया रूपादेः। किन्तु सा द्रव्यस्यैव क्रियेयाऽतो गुणानां निष्क्रियत्वं सिद्धम्।

मू॰ = अथ गुणपदार्थनिरूपणम्।

रूपादीनां गुणानां सर्वेषां गुणत्वाऽभिसम्बन्धो द्रव्याश्रितत्वं निर्गुणत्वं निष्क्रियत्वम्। रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगाः मूर्तगुणाः। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दाः अमूर्तगुणाः।

मूर्तगुणानाह॥ रूपेति = रूपादिवेगान्ताः गुणाः मूर्तगुणाः। मूर्तानां क्षितिजलाग्निवायुमनसां गुणाः। तत्र क्रमः। पृथिव्यप्तेजःसु रूपस्पर्शपरत्वापरत्ववेगाः। वायौ स्पर्शपरत्वापरत्ववेगाः। मनसि परत्वापरत्ववेगाः। पृथिव्युदकयोः रसगुरुत्वे। पृथिव्युदकतेजस्सु द्रवत्वम्। जले स्नेहः। पृथिव्यां गन्धः इति। अमूर्तगुणानाह। बुद्धीति = बुद्ध्यादिशब्दान्ताः गुणाः अमूर्तगुणाः अमूर्तानाम् आकाशात्मनां गुणाः। बुद्ध्यादयो भावनान्ताः गुणाः आत्मगुणाः। शब्दः आकाशस्येति।

मूर्तामूर्तगुणानाह। संख्येति = संख्यादिविभागान्ताः गुणाः उभयगुणाः मूर्तानामपि गुणाः अमूर्तानामपि चेति।
अनेकाश्रितगुणान् व्याचष्टे = संयोगेति = संयोगादयो गुणाः अनेकाश्रिताः, न एकः अनेकः द्वित्वबहुत्वादय इत्यर्थः। एकव्यतिरिक्ता द्वित्वादयः परार्द्धपर्यन्ताः संख्या अत्र बोध्याः। संयोगविभागाश्च द्वाभ्यां बहुभिर्वा द्रव्यैः समान्वय्यन्ते, न एकेन द्रव्येण। एवं द्वित्वं द्विपृथक्त्वादिकमपि बहुषु द्रव्येषु भवति नान्यत्र, तस्मादनेकवृत्तित्वमेषाम्। तथा च सूत्रम् "द्वित्वप्रभृतयः संख्याः पृथक्त्वसंयोगविभागाश्च" वै. द. १।१।२५ एकैकाश्रितगुणान् निर्दिशति॥ शेषा इति = शेषाणां रूपरसगन्धस्पर्शैकसंख्यापरिमाणैकपृथक्त्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः एकैकद्रव्यवृत्तयः, एकैकस्मिन् द्रव्ये वृत्तिर्वर्तनं येषां तथाभूता इमे सन्ति। इमे सर्वे एकस्यामेव व्यक्तौ वर्तन्ते, न पुनरेका

मू = संख्यापरिमाणपृथक्त्वसंयोगविभागा उभयगुणाः। संयोगविभागद्वित्वद्विपृथक्त्वादयोऽनेकाश्रिताः। शेषास्त्वेकैकद्रव्यवृत्तयः। रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा वैशेषिकगुणाः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगाः सामान्यगुणाः।

रूपशक्तिः संयोगवदुभयत्र व्यासज्य वर्तते। विशेषगुणानाह। रूपेति = रूपादयः शब्दान्ता गुणाः वैशेषिकगुणाः। विशेषणं विशेषः व्यवच्छेद इति भावः। तद्वन्तो ये गुणास्ते वैशेषिका गुणाः रूपादयः सन्ति। त एव स्वाधिकरणं परस्माद् व्यवच्छिन्दन्ति अतो विशेषाऽभावाश्च तथैव संख्यादयः। यथा च क्रमः। तेजसो रूपम्, जलस्य रसस्नेहसांसिद्धिकद्रवत्वानि, आत्मनो बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाः। आकाशस्य शब्द इति। सामान्यगुणानाह। संख्येति = संख्यादिवेगान्तानां दशानां सामान्यगुणत्वं साधर्म्यम्। सामान्यगुणाः स्वाश्रयसाधर्म्यकृत इति। सांसिद्धिकद्रवत्वमपामेव विशेषगुणोऽतः नैमित्तिकपदोपग्रहः इति॥

बाह्यैकैकेन्द्रियग्राह्यगुणान् आचष्टे। शब्देति= बाह्यैकैकेन्द्रियग्राह्याः, बाह्यानि चक्षुरादीनि यानीन्द्रियाणि तैरेकैकेन्द्रियैः शब्दादयो ग्राह्याः पञ्चं इमे गुणाः सन्ति, तत्र क्रमोऽयम्। शब्दः श्रोत्रेण, स्पर्शस्त्वचा, रूपं चक्षुषा, रसो रसनया गन्धश्च पृथिव्या गृह्यते। तथा च सूत्रम् "भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः" तथाऽऽपस्तेजो वायुश्च रसरूपस्पर्शज्ञाने अविशेषात्" वै॰द॰ ८।२।सूत्रे ५।६ "श्रोत्रग्रहणो योऽर्थः स शब्दः" वै॰द॰ २।२।२१ द्वीन्द्रियग्राह्याः गुणाः के सन्तीत्याह। संख्येति= संख्यादयो वेगान्ताः गुणा द्वीन्द्रियग्राह्या इन्द्रियद्वयेन गृह्यन्ते इत्यर्थः। किमिन्द्रियद्वयमिति चेत्तत्राह चक्षुस्त्वक् च, यदेव चक्षुषा ज्ञायते संख्यादिकं तदेव स्पर्शनेनापीति सिद्धं तथा च सूत्रम् "संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायात् चाक्षुषाणि" वै॰द॰ ४।१।११ अन्तःकरणग्राह्यान् गुणान् आचष्टे। बुद्धीते= बुद्ध्यादयः प्रयत्नान्ताः गुणाः अन्तःकरण

मू॰= शब्दस्पर्शरूपरसगंधाः बाह्यैकैकेन्द्रियग्राह्याः। संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहवेगा द्वीन्द्रियग्राह्याः। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्त्वन्तःकरणग्राह्याः। गुरुत्वधर्माधर्मभावना ह्यतीन्द्रियाः।

ग्राह्याः सन्ति, सर्वदा इमे गुणा अन्तःकरणेन अन्तरिन्द्रियेण मनसा इति यावत् गृह्यन्ते नान्येनेत्यर्थः। अतीन्द्रियगुणान् प्रतिपादयति। गुरुत्वेति= गुरुत्वादयो भावनान्ताः गुणा अतीन्द्रियाः, इन्द्रियाणि अतिक्रम्य वर्तन्ते इत्यतीन्द्रियाः। न केनचिदिन्द्रियेण गृह्यन्ते इत्यर्थः। तथा च सूत्रम् "तस्याऽभावादव्यभिचारः" वै॰द॰ ४।१।१० तत्र गुरुत्वं स्पार्शनप्रत्यक्षमिति श्रीवल्लभाचार्याः संगिरन्ते इति ॥

कारणगुणपूर्वकान् गुणान् निर्दिशति । अपाकजेति = अपाकजरूपम्, अपाकजरसः, अपाकजगन्धः, अपाकजस्पर्शः, परिमाणम्, एकत्वम्, एकपृथक्त्वम्, गुरुत्वं द्रवत्वं, स्नेहः, वेगः, इमे गुणाः कारणगुणपूर्वकाः, स्वस्य यत्कारणं तत्र यो गुणः तत्पूर्वकाः पूर्वं गुणस्तामेषां कारणे विद्यमानता दृष्टा । यथा तन्तुषु यदि श्वेतरूपं तदा पटेऽपि श्वेतरूपं जायते । कारणगुणपूर्वका अवयविनः कारणसमवायाः तेषां गुणाः पूर्वं कारणं येषां ते तथा भवन्तीति स्वकारणगुणाऽसमवायिकारणकाः प्रादुर्भवन्तीत्यर्थः । पार्थिवपरमाणुरूपादयः पाका जायन्ते न तु परमाणुसमवायिकारणाश्रितरूपादिपूर्वकाः सन्ति । अत तन्निरासाय अपाकजपदोपस्थितिः । तथा च सूत्रम् "कारणगुणपूर्वकाः पृथिव्यां पाकजाः" वै. द. ७।१।६ । अकारणगुणपूर्वकान् आह ॥ बुद्धीति = बुद्ध्यादयः शब्दान्ताः गुणा अकारणगुणपूर्वकाः, स्वाश्रयस्य यत्समवायिकारणं तद्गुणपूर्वका न भवन्ति नित्यगुणत्वादिति । संयोगजान् गुणान् आह । बुद्धीति = बुद्ध्यादय इमे गुणाः संयोगजाः –

मू = अपाकजरूपरसगन्धस्पर्शपरिमाणैकपृथक्त्वैकत्वगुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा अकारणगुणपूर्वकाः । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दतूलपरिमाणोत्तरसंयोगनैमित्तिकद्रवत्वपरत्वापरत्वपाकजाः संयोगजाः ।

संयोगाज्जायन्ते इति संयोगजाः सन्ति । यथा च "बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना एते गुणा आत्ममनःसंयोगात् जायन्तेऽतः संयोगजाः सन्ति । तथा च सूत्रम् "आत्मेन्द्रियार्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत" वै. द. ३।१।१८ आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे, वै. द. ५।२।१५ शब्दः भेरीदण्डसंयोगाज्जायतेऽतः संयोगजः, तथा च सूत्रम् "संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः" वै. द. २।२।३१ तूलपरिमाणं प्रचयाख्यसंयोगाज्जायतेऽतः संयोगजं परिमाणम् । उत्तरसंयोगः पूर्वसंयोगात् जायतेऽत उत्तरसंयोगः संयोगजोऽभिमतः । तथा च "अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः" वै. द. ७।२।९ नैमित्तिकद्रवत्वं वह्निसंयोगाज्जायतेऽतः संयोगजं नैमित्तिकद्रवत्वम् । परत्वापरत्वे दिक्कालपिण्डसंयोगाज्जायेतेऽतः संयोगजे एते द्वे । पाकजोऽपि संयोगजः रूपादिपरावृत्तिहेतुस्तेजःसंयोगविशेषः पाकः तस्मात् परावृत्तिं प्राप्ताः पार्थिवपरमाणुरूपरसगन्धस्पर्शा अग्निसंयोगाज्जायन्तेऽतः पाकजाः संयोगजाः सन्तीति ॥

कर्मजान् गुणानाह । संयोगेति = संयोगविभागवेगाः कर्मजाः कर्मणा जायन्ते । आद्यौ संयोगविभागौ कर्मजौ । वेगश्च सर्वदा कर्मज इति । तथा च सूत्रम् "संयोगविभागवेगानां कर्म समानम्" वै॰ द॰ १।१।२० तत्र बाणे उत्पद्यमानं कर्म चापाद्विभागस्योत्तरदेशेन च तत्संयोगस्य स्वाश्रये च वेगस्य कारणमित्युदाहरणम् । विभागजगुणानाह । शब्देति = शब्द आद्यः शब्दः विभागाज्जायते, यथा वेणुपर्वविभागाच्छब्द उत्पद्यते । तथा च सूत्रम् "संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः" वै॰ द॰ २।२।३१ उत्तरविभागोऽपि विभागादेव जायतेऽतो विभागोऽपि विभागजः । यथा वृक्षतरुविभागाच्छरीरतरुविभागो जायते । तथा च सूत्रम् "एतेन विभागो व्याख्यातः" वै॰ द॰ ७।२।१ । बुद्ध्यपेक्षान् गुणानाह । परत्वेति = परत्वमपरत्वं द्वित्वं द्विपृथक्त्वश्चादिपदात् त्रित्वत्रिपृथक्त्वादयः गृह्यन्ते । इमे परत्वादयः बुद्ध्यपेक्षाः बुद्ध्याऽपेक्षन्तेऽर्थात् एषां ज्ञाने बुद्धिरेव निमित्तकारणं नान्यत् । तथा च सूत्रम् "एकदिक्कालाभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरञ्च" वै॰ द॰ ७।२।२१

मू॰ = संयोगविभागवेगाः कर्मजाः । शब्दोत्तरविभागौ विभागजौ । परत्वापरत्वद्वित्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः । सुखदुःखेच्छाद्वेषप्रयत्नाश्चासमानजात्यारम्भकाः । रूपरसगन्धानुष्णस्पर्शशब्दपरिमाणैकत्वैकपृथक्त्वस्नेहाः समानजात्यारम्भकाः ।

असमानजात्यारम्भकान् गुणानाह । सुखेति = सुखादयोऽसमानजात्यारम्भकाः न समानजातिम् आरभन्ते इत्यर्थः । यथा सुखमिच्छायाः कारणं दुःखं द्वेषस्य, इच्छाद्वेषौ प्रयत्नस्य, प्रयत्नः कर्मणः कारणमिति निष्कर्षः । समानजात्यारम्भकान् गुणान् आह । रूपेति = रूपादयः स्नेहान्ताः गुणाः समानजात्यारम्भकाः । समानानां जातीनां कारणपूर्वकस्वरूपाणाम् आरम्भकाः । यथा कारणरूपात्कार्यरूपम् । यद्रूपं कारणे वर्तते तदेव कार्ये प्रादुर्भवति नान्यथा, यथा कृष्णेषु तन्तुषु सत्सु मधुरे रसे उत्कटे गन्धे सति कृष्णं वस्त्रं मधुरो रसः उत्कटो गन्ध एव भविष्यति । तथा च सूत्रम् "रूपाणां रूपम्" वै॰ द॰ १।१।२८ "कारणगुणपूर्वकाः पृथिव्यां पाकजाः" वै॰ द॰ ७।१।६ ।

समानाऽसमानजात्यारम्भकान् गुणानाह । संयोगेति = संयोगादयः संस्कारान्ताः गुणाः समानाऽसमानजात्यारम्भकाः । समाना चाऽसमाना च समानाऽसमाने समानासमाने जाती इति समानाऽसमानजाती । द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते । तयोरारम्भकाः यथा संयोगात् समानजातीय उत्तरसंयोगः विजातीयं द्वित्र्यणुके महत्परिमाणम् । विभागात् विभागः शब्दश्च । कारणगतैकत्वसंख्यातः कार्यवर्तिन्येकत्वसंख्या, द्वित्वबहुत्वसंख्याभ्याश्च अणुत्वमहत्वे । गुरुत्वाद् गुरुत्वान्तरं पतनञ्च । द्रवत्वाद् द्रवत्वान्तरं स्यन्दनक्रिया च । उष्णस्पर्शात् उष्णस्पर्शः पार्थिवपरमाणुरूपादयश्च । ज्ञानात् ज्ञानं संस्कारश्च । धर्मात् धर्मः सुखञ्च । अधर्मात् अधर्मं दुःखञ्च । संस्कारात् संस्कारः स्मरणञ्च । स्वाश्रयसमवेतारम्भकगुणानाह । बुद्धीति = बुद्ध्यादयः शब्दान्ताः गुणाः स्वाश्रयसमवेतारम्भकाः, स्वस्य यः आश्रयः तत्र समवेताः समवायगुणविशिष्टाः, तत्रारम्भकाः । यथा सुखादयो यत्र स्वयं वर्तन्ते तत्रैव कार्यं जनयन्ति । बुद्धिस्तु द्वित्वादिं परत्रारभमाणाऽपि आत्मविशेषगुणानुत्पादयन्ती स्वा-

मू = संयोगविभागसंख्यागुरुत्वद्रवत्वोष्णस्पर्शज्ञानधर्माधर्मसंस्काराः समानाऽसमानजात्यारम्भकाः । बुद्धिसुखदुःखेच्छाद्वेषभावनाशब्दाः स्वाश्रयसमवेताऽऽरम्भकाः । रूपरसगन्धस्पर्शपरिमाणस्नेहप्रयत्नाः परत्रारम्भकाः । संयोगविभागसंख्यैकपृथक्त्वगुरुत्वद्रवत्ववेगधर्माधर्मास्तूभयत्रारम्भकाः ।

श्रयसमवेतमेव जनयति नान्यत्रेति । परत्राऽऽरम्भकान् गुणानाह । रूपेति = रूपादयः प्रयत्नान्ता गुणाः परत्र आरम्भकाः । परत्र परदेशे आरम्भकाः जायन्ते । यथा कपालादिषु वर्तमाना रूपादयः घटादिषु घटादिषु रूपादिकं प्रारभन्ते । आत्मनिष्ठः प्रयत्नः हस्तादिषु क्रियोत्पादकः तु दृष्टः । उभयत्रारम्भकान् गुणानाह । संयोगेति = संयोगादयोऽधर्मान्ताः गुणा उभयत्रारम्भकाः, स्वाश्रये अन्यत्र चारम्भकाः । यथा संयोगः कपाले वर्तमानः कपालेष्वेव घटं विधत्ते, इन्द्रियार्थसंयोग आत्मज्ञाने जनयति । विभागः वेणुपर्वविभागः स्वस्मिन् आकाशात् विभागं जनयति परत्र आकाशे च शब्दमारभते । एकत्वसंख्या स्वाश्रये आकाशे अवयववर्तिनी अवयविनि एकत्वमारभते स्वाश्रये द्वित्वादिसंख्याम् । अवयवेषु एकपृथक्त्वम् अवयविनि एकपृथक्त्वं स्वाश्रये द्विपृथक्त्वादिकम् आरभते । कारणगताः गुरुत्वद्रववत्ववेगाः कार्ये तान् आरभन्ते स्वाश्रयेषु क्रियाम् । धर्माधर्मौ आत्मनि सुखदुःखे परत्र अग्न्यादौ ज्वलनादिक्रियाम् आरभते ।

क्रियाहेतून् गुणान् आह। गुरुत्वेति = गुरुत्वादयः क्रियाहेतवः गुणाः। क्रिया विद्यते हेतुभूता कारणं यत्रेति क्रियाहेतवः। यथा गुरुत्वात्पतने द्रवत्वात् स्यन्दने वेगात् बाणस्योत्तर [illegible] व तीनि कर्माणि, प्रयत्नात् हस्तादि क्रिया, धर्माऽधर्माभ्याम् अग्न्यादि क्रियासंयोगविशेषः। विशिष्यते इति विशेषः संयोग एव विशेषः संयोगविशेषः विशिष्टः संयोगः नोदनाभिघातलक्षणः सोऽपि क्रियाहेतुः। समवायिकारणगुणान् आह। रूपेति = रूपादि शब्दान्तानां गुणानाम् असमवायिकारणत्वम्। किं नाम असमवायिकारणत्वम्? समवायिकारणवृत्तित्वे सति कारणत्वम् असमवायिकारणत्वम्। यथा रूपरसादयः समवायिकारणवृत्तित्वात् असमवायिकारणवन्तः। यतः कारणवर्तिन इमे रूपादयः कार्यसजातीयारम्भका दृष्टाः। शब्दः स्वसमवायिकारणाकाशस्थः एवो त्पद्यते आकाशादेव अपरः शब्दः प्रादुर्भवति। एवं यथाक्रमम्। अतः शब्दस्यासमवायिकारणत्वं सिद्धम्। संख्यापृथक्त्वयोः उभयविधत्वे कारणत्वम् अवालोकि। कारणस्थे इमे संख्यापृथक्त्वे कार्येऽपि यथानियममिमे द्वे एवोपलभ्येते स्वाश्रये एकत्वैकपृथक्त्वादयः उत्पद्यन्ते। द्वित्वद्विपृथक्त्वादीनामप्येवं परिग्रहः। यत उष्णस्पर्शः पाकजारम्भे निमित्तकारणतां विदधाति

मू = गुरुत्वद्रवत्ववेगप्रयत्नधर्माधर्मसंयोगविशेषाः क्रियाहेतवः। रूपरसगन्धाऽनुष्णस्पर्शसंख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायिकारणत्वम्। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानां निमित्तकारणत्वम्।

तदपसारणाय अनुष्णस्पर्श उपन्यस्तः। पटरूपं स्वसमवायिकारणे पटे तिष्ठत् तन्तुसमवायवत् अपमति। अतस्तन्तुरूपं पटरूपस्यासमवायिकारणं सिद्धं न रसादयः। रसादीनाम् अपि असमवायिकारणत्वं स्वस्वकार्येषु अध्यवसेयम्। निमित्तकारणगुणान् आह। बुद्धीति = बुद्धिप्रभृतीनां गुणानां निमित्तकारणत्वं साधर्म्यम्। यथा बुद्धिः वस्त्वाकारज्ञानोत्पत्तौ, सुखदुःखे शान्तिक्लेशयोः। इच्छा हिताऽहितविधाने। द्वेषोऽरिष्टप्राप्तौ, प्रयत्नः दुष्करकर्मणि। धर्माऽधर्मौ मोक्षादिकामनायाम्। भावना च स्मरणे निमित्तकारणम्।

असमवायिनिमित्तकारणगुणानाह । संयोगेति = संयोगादिवेगान्तानां गुणानाम् असमवायिकारणत्वं निमित्तकारणत्वञ्च सिद्धम्। यथा शब्दोत्पत्तौ भेर्याकाशसंयोगोऽसमवायिकारणम् भेरीदण्डसंयोगो निमित्तकारणम् । विभागः वेणुपर्वगमनविभागोऽसमवायिकारणं वेणुपर्वविभागो निमित्तकारणम् । उष्णस्पर्शः उष्णस्पर्शस्याऽसमवायिकारणम् पाकजानां निमित्तकारणम् । गुरुत्वं स्वाश्रये पतनस्याऽसमवायिकारणम् नोदनाऽभिघातौ क्रियोत्पत्तौ निमित्तकारणम् । द्रवत्वं स्वाश्रयद्रवत्वेऽसमवायिकारणं द्रवत्वान्तरे निमित्तकारणम् । वेगः स्वाश्रयवेगत्वेऽसमवायिकारणं परवेगविधाने निमित्तकारणम् ।

अकारणगुणानाह । परत्वेति = परत्वादीनामकारणत्वं साधर्म्यं न चैते गुणाः केषांचिदसमवायिकारणं न च निमित्तकारणं द्विपृथक्त्वादीनामादिपदात् इत्यत्र त्रिपृथक्त्वीनां परमाणुपरिमाणपरममहत्परिमाणयोश्च ग्रहणं कर्तव्यम् ॥

मू॰ = संयोगविभागोष्णस्पर्शगुरुत्वद्रवत्ववेगानामुभयथाकारणत्वम् । परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वम् । संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तित्वम् । शेषाणामाश्रयव्यापित्वम् ।

प्रदेशवृत्तिवतो गुणानाह । संयोगेति = संयोगविभागशब्दबुद्धिसुखदुःखेच्छाद्वेषाद्यात्मविशेषगुणानां प्रदेशवृत्तित्वं साधर्म्यं बोध्यम् । प्रदेशवृत्तित्वं नामाव्याप्यवृत्तित्वं तानि स्वाश्रये वर्तन्ते न वर्तन्ते चेत्यर्थः । यथा संयोगः वृक्षमूलाऽवच्छेदेन संयुक्तस्य नरस्य मूलाऽवच्छिन्नः संयोगः न च शाखाऽवच्छिन्नः अतः संयोगः प्रदेशवृत्तिः । विभागः, घटपटयोर्विभागस्तत्रस्थ एवोपलभ्यते नान्यत्र घटपटादिस्थतः विभागोऽपि प्रदेशवृत्तिः । शब्दः एकस्मिन् भेर्यादिवाद्ये प्रादुर्भूतः शब्दो नहि सर्वत्र प्रदेशे व्याप्नोति अतः शब्दोऽप्येकदेशभाक् । बुद्धिः, एकस्य वस्तुनो ज्ञाने जाते नहि तदानीं सर्वाणि ज्ञानानि उत्पद्यन्ते बुद्धीनां क्रमवृत्तित्वनियमात् बुद्धिरप्येकदेशवासिनी । एवं सुखदुःखादयः एकस्मिन्नात्मनि वर्तमानाः नहि सर्वात्मसु वर्तन्ते इति । अतः एषां प्रदेशवृत्तित्वं साधर्म्यम् । आश्रयव्यापिगुणानाह । शेषाणामिति = शेषाणां रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वद्रवत्वस्नेहानामाश्रयव्यापित्वं साधर्म्यम् । इमे सर्वे गुणाः आश्रयव्यापिनः आश्रये एव वर्तन्ते नान्यत्रेति भावः ।

यावद्द्रव्यभाविगुणानाह । अपाकजेति = अपाकजा न पाकाज्जायन्ते इत्यपाकजाः "स्वाभाविकाः" इति भावः । ये रूपादयस्तेषां यावद्द्रव्यभावित्वे यावदाश्रयद्रव्यं भवितं शीलमेषामिति यावद्द्रव्यभाविनः तेषां भावो यावद्द्रव्यभावित्वम् । आश्रयद्रव्याऽवधिर्वर्तमाना इति भावः । सति द्रव्ये पाकजरूपादीनां विनाशः उपलभ्यतेऽतः अपाकजपदमाह । अयावद्द्रव्यभाविगुणानाह । शेषाणामिति = शेषाणां पाकजरूपरसादीनां गुणानामयावद्द्रव्यभावित्वम् । अपाकजरूपादयः यावद्द्रव्यवर्तिनः, परन्तु पाकजरूपादयश्च यावद्द्रव्यं न वर्तन्ते, किन्तु विद्यमानेऽपि द्रव्ये तेषामभावो दृष्ट इति ।

मू = अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वसांसिद्धिकद्रवत्वगुरुत्वस्नेहानां यावद्द्रव्यभावित्वम् । शेषाणामयावद्द्रव्यभावित्वम् । रूपादीनां सर्वेषां गुणानां प्रत्येकमपरसामान्यसम्बन्धात् रूपादिसंज्ञाः भवन्ति ।

सम्प्रति प्रत्येकवैधर्म्यं निर्दिशति । रूपादीनामिति = रूपम् आदि येषां तेषां सर्वेषां गुणानां प्रत्येकं एकैकं प्रति अपरसामान्यसम्बन्धात् अपरजातेः रूपत्वादिकायाः सम्बन्धात् रूपादिसंज्ञा रूपमिति रस इति गन्ध इति संज्ञाः भवन्ति । श्रीः

श्रीः

श्रीः

सर्वपदार्थाभिव्यक्तिनिमित्ते पूर्वं रूपं निरूपयति। तत्रेति = तत्र तेषां गुणानां मध्ये रूपं चक्षुर्ग्राह्यम् चक्षुषैव गृह्यते न घ्राणादिपरेणेन्द्रियेण। तदेव रूपं पृथिव्यां जलेऽग्नौ च वर्तते न मरुदादिषु, तेषां नीरूपत्वात्। तदेव द्रव्याद्युपलम्भकं यस्मिन्नेव द्रव्ये तद्वर्तते तस्य द्रव्यस्य तद्वृत्तिगुणकर्मसामान्यानामुपलम्भकं ज्ञापकं भवति। तथा च सूत्रम् "अनेकद्र[illegible]समवायात् रूपविशेषाच्च रूपोपलब्धिः" वै. द. ४।१।८ तदेव नयनसहकारि स्वगतं रूपं चक्षुषो विषयग्रहणे सहकारि सहायतावत्। तदेव रूपं शुक्लाद्यनेकप्रकारं शुक्लादयः आदिपदात् नीलपीतरक्तहरितकपिशचित्राणामुपग्रहो बोध्यः। शुक्लादयोऽनेके प्रकाराः यस्य तत्तथाविधम्। तदेव रूपं सलिलादिपरमाणुषु जलाग्निपरमाणुषु नित्यं सर्वदा स्थायि, पार्थिवपर-

मू = तत्र रूपं चक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति द्रव्याद्युपलम्भकं नयनसहकारि शुक्लाद्यनेकप्रकारं सलिलादिपरमाणुषु नित्यं पार्थिवपरमाणुष्वग्निसंयोगविरोधि, सर्वकार्यद्रव्येषु कारण-गुणपूर्वकमाश्रयविनाशादेव विनश्यतीति।

माणुषु अग्निसंयोगविरोधि, अग्निसंयोगात् पार्थिवपरमाणूनां रूपं परावर्तते विनश्यतीत्यर्थः। तदेव रूपं सर्वकार्यद्रव्येषु निखिलकार्यद्रव्यं घटादिद्रव्यं तेषु कारणगुणपूर्वकं स्वाश्रयसमवायिकारणरूपपूर्वकं यथा यदि तन्तुरूपं शुक्लं तदा पटरूपमपि शुक्लं भविष्यति नान्यविधम्। एवमन्यत्राप्यूह्यम्। तदेव रूपम् आश्रयविनाशात् आधारविनाशाद् विनश्यति विनाशं प्राप्नोति। कपाले विनश्यति यदा, तदा कपालरूपम् अपि विनश्यतीति भावः।

अधुना रसं व्याचष्टे। रस इति = रसो गुणो रसनाग्राह्यः रसनेन्द्रियेण गृह्यते, तथा च सूत्रम् "तेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम्" वै. द. ४।२।६ स च पृथिव्युदकवृत्तिः, पृथिव्याम् उदके च वृत्तिर्वर्तनं यस्य तथाभूतः। जीवनपुष्टिबलारोग्यनिमित्तम् जीवनं प्राणधारणं, पुष्टिरवयवानामुपचयः, बलम् उत्साहविशेषः, आरोग्यं रोगाऽभाव एषां रसो निमित्तं निमित्तकारणमेव। यथा मानवस्तृषार्तो निर्जलदेशे जलमुपलभ्य प्राणान् धारयति अन्यथा स च विनश्यति, यथा वत्सः पानमात्रेण पुष्यति च। निद्रातन्द्रायुक्तस्य मानवस्य जलस्पर्शमात्रतो बलमुत्साहश्च भवति, यथा सन्ध्यादिकर्मसु आचमनादिक्रियया जनो निस्तन्द्रो भवति, प्रातराचमनमात्रेण नीरोगो जायते, स एव रसनसहकारी बाह्यरसोपलम्भसहायकः। मधुरादिभेदेन विभिन्नः षट्प्रकारः; अस्य रसस्य नित्यत्वं परमाणुषु कार्यद्रव्येषु चानित्यत्वं दृष्टम्। कारणगुणपूर्वकोऽयं रसः। आश्रयविनाशात् एव अयं रसो विनश्यति तथा च सूत्रम् "पृथिव्यादिरूपरसगन्धस्पर्शाः द्रव्यानित्यत्वादनित्याश्च" वै. द. ७।१।२ गन्धं निरूपयति गन्ध इति = गन्धो गुणः घ्राणेन्द्रियेणैव गृह्यते, स च पृथिवीवृत्तिः, पृथिव्यां वृत्तिर्वर्तनं यस्य तथाभूतः घ्राणसहायवान्। स

मू = रसो रसनग्राह्यः। पृथिव्युदकवृत्तिः। जीवनपुष्टिबलारोग्यनिमित्तम्। रसनसहकारी। मधुराम्ललवणतिक्तकटुकषायभेदभिन्नः। अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत्। गन्धो घ्राणग्राह्यः। पृथिवीवृत्तिः। घ्राणसहकारी, सुरभिरसुरभिश्च। अस्यापि पूर्ववदुत्पत्त्यादयो व्याख्याताः। स्पर्शस्त्वगिन्द्रियग्राह्यः। क्षित्युदकज्वलनपवनवृत्तिः। त्वक्सहकारी, रूपानुविधायी। शीतोष्णानुष्णाशीतभेदात् त्रिविधः। अस्यापि नित्यानित्यत्वनिष्पत्तयः पूर्ववत्।

चैकोऽपि सुरभ्यसुरभिभेदात् द्विविधः। अस्य गन्धस्य उत्पत्त्यादयः पूर्ववद् व्याख्याताः कथिताः। गन्धोऽयं पृथिवीपरमाणुषु नित्यः। कार्यद्रव्यघटपटादिषु अनित्यः। कारणगुणपूर्वकोऽयमस्ति, आश्रयविनाशात् अयं गन्धोऽपि रूपवद्विनश्यतीति। स्पर्शमाह। स्पर्श इति = स्पर्शः त्वगिन्द्रियग्राह्यः, त्वगिन्द्रियेणैव गृह्यते इत्यर्थः। त्वचि स्थितमिन्द्रियं त्वगिन्द्रियमिति विग्रहः। क्षित्याम् उदके ऽग्नौ वायौ च वृत्तिर्वर्तनं यस्य स तथाभूतः। त्वक्सहकारी त्वगिन्द्रियस्य विषयग्रहणसहकारी। स च स्पर्शः रूपाऽनुविधायी रूपमेवानुविधातुम् अनुगन्तुं शीलमस्य तथाभूतः, यत्र रूपं तत्रैव स्पर्शः इति स्थिरो नियमः रूपाऽसमानाऽधिकरणत्वान्ताभावाप्रतियोगीत्यर्थः। परञ्च वायौ नोपलभ्यते रूपं तत्र कथमयं नियमः प्रचरेदित्युच्यते, वायौ रूपाऽनुद्भूतताऽवबोध्या। शीतः स्पर्शः, उष्णः स्पर्शः, अनुष्णाशीतः स्पर्शः इति भेदादयं स्पर्शस्त्रिप्रकारकः। अस्य स्पर्शस्य नित्यता पृथिव्यप्तेजोवायूनां परमाणौ, अनित्यता च कार्यद्रव्यघटपटादिषु। कारणगुणपूर्वकोऽप्ययमस्ति। आश्रयविनाशादयं स्पर्शोऽपि रूपवद्विनश्यतीति।

अथ परमाणुपाकविधिमभिधत्ते। पार्थिवेति। यद्यपि परमाणव पृथिवी, तथा कार्यरूपपृथिव्यपेक्षया पार्थिवा उच्यन्ते। पृथिव्याः कारणं परमाणव इमे पार्थिवपरमाणवस्तेषां ये रूपादयः तेषां पाकजानाम् उत्पत्तेर्विधानं कथ्यते इति शेषः। आमद्रव्यस्य अपक्वद्रव्यस्याग्निना सम्बद्धस्य अग्निना संयुक्तस्य घटादेः घटपटप्रभृतिकार्यद्रव्यस्य अग्न्यभिघातात् अग्नेर्योऽभिघातः ताडनं तस्माद्वा, नोदनं संयोगविशेषः तस्मात्। तदारम्भकेषु तस्य घटादि[redacted]कार्यजातद्रव्यस्य आरम्भकेषु अणुषु परमाणुषु कर्माणि क्रिया उत्पद्यन्ते, तेभ्यः कर्मभ्यः विभागाः परमाणूनां मिथो विभागा जायन्ते, विभागेभ्यः परमाणुविभागेभ्यः संयोगविनाशः तेभ्यः संयोगविनाशेभ्यः द्व्यणुकलक्षणं सर्वं कार्यद्रव्यं विनश्यतीति भावः। तस्मिन् घटादिकार्यद्रव्ये विनष्टे सति स्वतन्त्रेषु परमाणुषु पृथग्भूतैकैकपरमाणुषु अग्निसंयोगात् अग्निगतौ[redacted] ष्ण्यापेक्षात् श्यामादीनां पूर्वरूपरसगन्धस्य र्शानां विनाशः। पुनरन्यस्मात् अग्निसंयोगात् औष्ण्यापेक्षात् पाकजा जायन्ते। आमद्रव्यसंयोगिनः उदकपरमाणवो

मू= पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानम्। घटादेरामद्रव्यस्याग्निना
सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते,
तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यश्च कार्यद्र
व्यं विनश्यति। तस्मिन् विनष्टे स्वतन्त्रेषु परमाणुष्वग्निनासंयोगादौ
ष्ण्यापेक्षाच्छ्यामादीनां विनाशः, पुनरन्यस्मादग्निसंयोगादौष्ण्याप
क्षात्पाकजा जायन्ते।

अपि सन्ति. तस्मि[redacted]वृत्तये तदारम्भकेषु इत्युपन्यस्तम्। परमाणुस्थरूपादीनाम् अन्यस्माद् अग्निसंयोगात् उत्पत्तिः अन्यस्मात् अग्निसंयोगात् विनाशः इति निश्चीयते।

घ

अवशिष्टं पाकविधानमुच्यते। तदिति= तदनन्तरं तत्पश्चात् भोगिनां घटादिकार्यद्रव्येषु येषां सुखदुःखानुभवो भोगो भविष्यति, ते भोगिनस्तेषां भोगिनाम् अदृष्टापेक्षात् अदृष्टं धर्माधर्मौ तयोः (तस्य) अपेक्ष्यमाणात्। आत्मपरमाणुसंयोगात् उत्पन्नपाकजरूपरसगन्धस्पर्शेषु परमाणुषु कर्माणि उत्पद्यन्ते तेभ्यः ~~आत्मपरमाणुसंयोगात् उत्पन्न पाकजरूप...~~ तेषां परमाणूनां परस्परसंयोगास्ततश्च ताभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकमित्यनेनैव क्रमेण घटादिकार्यद्रव्यमुत्पद्यते। पुनरप्याह। तत्रेति= तत्र पाके कारणगुणक्रमेण परमाणुद्वयरूपाभ्यां द्व्यणुके रूपं द्व्यणुकरूपेभ्यश्च त्र्यणुकरूपमित्यनेनैव क्रमेण घटादिकार्यद्रव्ये रूपादीनामुत्पत्तिरुत्पद्यते। तत्राक्षेपपुरःसरं स्वसिद्धान्तं साधयति। न चेति= कार्यद्रव्ये एव घटादिकार्यद्रव्ये एव रूपाद्युत्पत्तिः रूपादिविनाशो वा सम्भवति न च परमाणुषु, यथा प्रत्यक्षमालोक्यते, यदि अग्नौ घटस्थापनकाले घटादिछिद्रदर्शनं तद् छिद्रदर्शनः आपाकमालोचयेद् दृष्टं तदा यथाभूतम् आमघटमपश्यत् तथाविधं पाकारम्भकाले पाकान्ते च पश्यति न च कश्चित्परावृत्तिमीक्षते, तदा पूर्वदृष्टं छिद्रम् आमकालादारभ्य पाककालं यावत् तथाविधं

मू= तदनन्तरं भोगिनामदृष्टापेक्षात् आत्माणुसंयोगात् उत्पन्नपाकजेष्वणुषु कर्माणि ततो तेषां परस्परसंयोगाद् द्व्यणुकादिक्रमेण कार्यद्रव्यमुत्पद्यते। तत्र च कारणगुणक्रमेण रूपाद्युत्पत्तिः। न च कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति। सर्वावयवेषु अन्तर्बहिश्च वर्तमानस्याग्निना व्याप्त्यभावात्। अणुप्रवेशादपि च व्याप्तिर्न सम्भवति कार्यद्रव्यविनाशादिति।

प्रत्यक्षीकृते नान्यविधमतः सिद्धमिदं कार्यद्रव्ये पाकः न च परमाणुषु इति। एतन्मतं निराकरोति। नेति, यदुक्तं कार्यद्रव्ये पाकः न परमाणौ तन्न भवति। तत्र हेतुमाह। सर्वावयवेषु कार्यद्रव्यस्य सर्वेषु अवयवेषु अन्तर्बहिर्वर्तमानस्याग्निना व्याप्त्यभावात्। अन्तर्बहिश्च सर्वेषु अवयवेषु वर्तमानस्य समवेतस्यावयविनो द्रव्यस्य बाह्ये वर्तमानेन अग्निना वह्निना व्याप्तेर्यापकस्य परमाणुषु संयोगस्याऽभावात्। यदि कार्यद्रव्ये एव पाकः स्यात्तदानीं मध्यवर्तिनामङ्गानां पाको न उत्पद्येत, परञ्च पाक उत्पद्यतेऽतः सिद्धं परमाणुषु पाको जायते न तु कार्यद्रव्ये। तत्र मध्येऽणुप्रवेशादपि च वह्नेर्व्याप्तिर्न संभवति, घटादयः न सान्तरा अतस्तत्र न भविष्यति प्रवेशोऽग्निपरमाणूनां यावत्सार्थिवाऽवयवानां व्यक्तिभेदो न स्यात्। अतः सिद्धं कार्यरूपे द्रव्ये उत्पत्तिविनाशौ न स्तः। अणुप्रवेशादपि अग्नेर्व्याप्तिर्न सम्भवति कार्यद्रव्यविनाशात् घटरूपादयः आश्रयविनाशात् विनंक्ष्यन्तीति सिद्धान्तः।

संख्यागुणम् आचष्टे । एकादीति = एकः द्वौ त्रयः इत्यादीनां व्यवहारः व्यवह्रियते व्यवहारो ज्ञेयज्ञानं व्यवह्रियतेऽनेनेति व्यवहारः तस्य हेतुः कारणं संख्या, यथा च सूत्रम् **रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् वै० द० ७।२।१** सा संख्या पुनः एकद्रव्या एकं द्रव्यमाश्रयो यस्याः सा एकद्रव्या । अनेकद्रव्या च, अनेकं द्रव्यमाश्रयो यस्याः साऽनेकद्रव्या, एकद्रव्याऽनेकद्रव्याऽन्योन्यसमुच्चयपरौ चकारौ स्तः । तत्र एकद्रव्याऽनेकद्रव्ययोर्मध्ये एकद्रव्यायाः संख्यायाः सलिलादिपरमाणुरूपादीनामिव जलतेजोमरुतानां परमाणूनां रूपरसस्पर्शानामिव नित्यत्वानित्यत्वयोर्निष्पत्तिः ज्ञेया, यथा जलादिपरमाणौ रूपरसस्पर्शा नित्याः कार्यसलिलादि रूपरसस्पर्शाः अनित्याः । इयं संख्याऽपि आश्रयविनाशाद्विनश्यति । कारणगुणपूर्विकेयं संख्याऽपि । अनेकद्रव्या संख्या तु द्वित्वादिकाः द्वित्वमादिर्यस्याः सा परार्द्धान्ता, परार्द्धोऽन्तो यस्याः सा परार्द्धान्ता " यस्मिन् क्रियते व्यवहारः समाप्यते स परार्द्धः । एकद्रव्यस्थाया एकत्वसंख्यायाः सकाशाद्द्वित्वादेः अनेकवृत्तित्वविशेषप्रतिपादनार्थस्तु शब्दः ।

मू० = एकादिव्यवहारहेतुः संख्या, सा पुनरेकद्रव्या चाऽनेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणुरूपादीनामिव नित्यानित्यनिष्पत्तयः । अनेकद्रव्या तु द्वित्वादिका परार्धान्ता । तस्याः खलु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः । अपेक्षाबुद्धिविनाशाद्विनाशः ।

एकादिपरार्धान्ता संख्या यथा ग्रन्थान्तरे प्रतिपादिता " एकं दश शतं चैव सहस्रमयुतं तथा । लक्षञ्च नियुतं चैव कोटिरर्बुदमेव च ॥ १ ॥ वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः । अन्त्यं मध्यं परार्द्धञ्च दशवृद्ध्या यथाक्रमम् ॥ २ ॥ तस्याः संख्यायाः अनेकविषयबुद्धिसहितेभ्यः, न एकः अनेकः अयमनेकशब्दः द्वयोर्बहुषु च प्रचलितः । अनेकेषु विषयेषु या बुद्धिस्तत्सहितेभ्यः एकत्वेभ्यः एकत्वे चैकत्वानि चेति समासः । तद्द्विरुद्धे द्वित्वोत्पत्तिकारणं न कथितं स्यात् । अत एकत्वेभ्यो निष्पत्तिरेव न तु एकैकगुणसमुच्चयमात्रत्वमित्यर्थः । खलु अवधारणे । तस्याः संख्यायाः अपेक्षाबुद्धिविनाशात् " अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते ,, इति लक्षणवत्या विनाशात्तस्या विनाश इति ॥

६२

एतदेव प्रश्नपूर्वकं प्रतिपादयति । कथमिति = यदा यस्मिन् काले बोद्धुः ज्ञातुः चक्षुषा नेत्रेण समानासमानजातीययोः समानजातीयः पटः असमानजातीयौ घटपटौ तयोः सन्निकर्षे सति संयोगे सति तत्संयुक्तसमवेतैकत्वसामान्यज्ञानोत्पत्तौ तत्संयुक्तयोश्चक्षुःसंयुक्तयोर्द्रव्ययोः प्रत्येकं समवेतौ यौ एकगुणौ तयोः समवेते यदेकत्वं सामान्यं एकत्वनिष्ठम् एकत्वरूपमपरसामान्यं तस्मिन् यत् ज्ञानं निर्विकल्पात्मकं उत्पद्यते । विशेष्यज्ञानहेतुर्विशेषणज्ञानमतः एकगुणयोः विशेष्ययोः एकत्वसामान्यविशेषणं तेनादौ तत्रैव ज्ञानं विद्यते, न च प्रत्यासत्तिमन्तरेण चाक्षुषं ज्ञानमुत्पद्यते इत्येकत्वसामान्यस्येन्द्रियेण संयुक्तसमवेतसमवायलक्षणः सम्बन्धो दर्शितः । एवं ज्ञानोत्पत्तौ सत्याम् एकत्वसामान्यतत्सम्बन्धज्ञानेभ्यः एकत्वसामान्यात् तस्यैकत्वस्यैकगुणाभ्यां सम्बन्धात् ज्ञानात् तेभ्य एकत्वसामान्यतत्सम्बन्धज्ञानेभ्यः एकगुणयोः एकगुणविशिष्टयोः अनेकविषयिणी उभयैकगुणालम्बिनी एका बुद्धिः, एकत्वसामान्यविशिष्टैकत्वगुणसमूहालम्बिन्येका बुद्धिरित्यर्थः । उत्पद्यते । इतीयमेवापेक्षा

मू = कथं, यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे तत्संयुक्तसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्सम्बन्धज्ञानेभ्य एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते । तदा तामपेक्ष्यैकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते, ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते ।

बुद्धिः, सविकल्पोत्पत्तिरपि युगपदभिव्यक्तेषु अनेकसंकेतविषयेषु संस्कारेषु स्मृतिहेतुषु आत्मान्तःकरणसंयोगस्य सामर्थ्यात् एकस्याऽनेकविषयस्मरणस्योत्पादात् । तदेति = तदा तस्मिन्नेव काले तामेतां बुद्धिमपेक्ष्य दृष्ट्वा एकत्वाभ्याम् एकगुणाभ्यां स्वाश्रययोः स्वाश्रयवतोः द्रव्ययोः द्वित्वमारभ्यते । इत्यत्र स्वाश्रययोः समवायिकारणत्वम् एकगुणयोः असमवायिकारणत्वम् । अनेकविषयायाः बुद्धेः निमित्तकारणम् । ततः द्वित्वोत्पादाऽनन्तरं तस्मिन् द्वित्वसामान्यज्ञानं द्वित्वसामान्यविषयकं विशेषणज्ञानमुत्पद्यते, इत्यत्रैकत्वसामान्यापेक्षया पुनरिति वाचोयुक्तिः ॥

तस्माद्द्वित्वसामान्यज्ञानात् "उभयैकत्वगुणालम्बना बुद्धिरपेक्षाबुद्धिरुच्यते" तस्या अपेक्षाबुद्धेः द्वित्वसामान्यज्ञानाद्विनश्यत्ता विनश्वरत्वं
यस्मिन् क्षणे यस्य यस्माद्विनश्यत्ता उत्पद्यमानता वा तदुत्तरक्षणे तस्य तस्माद्विनाश उत्पत्तिर्वा। एवं यस्य यस्माद्यदा विनाश उत्प
त्तिर्वा तत्पूर्वक्षणे तस्य तस्माद्विनश्यत्ता उत्पद्यमानता वेति बोध्यं सर्वत्र। द्वित्वसामान्यतत्सम्बन्धतज्ज्ञानेभ्यो द्वित्वसामान्यात् यः
द्वित्वगुणेन सह सम्बन्धः तस्मात्तस्य यद् ज्ञानं तस्मात् तेभ्यः द्वित्वगुणबुद्धेरुत्पद्यमानता उत्पत्तिकारणसांनिध्ये सामान्य
ज्ञानमपेक्षाबुद्धेर्विनाशकं गुणबुद्धेश्चोत्पादकं तेन तदुत्पत्तिरेवैकस्य विनश्यत्ताऽपरस्य चोत्पद्यमानता इत्युपपद्यते विनश्यत्तो
त्पद्यमानतयोरेककालत्वं सिद्धम्। तत इति = ततस्तदनन्तरमिदानीमधुनाऽपेक्षाबुद्धिविनाशात् अपेक्षाबुद्धिविनाशाभावे च द्वित्वगु
णस्य विनश्यत्ता, द्वित्वगुणस्य ज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणं बुद्धेर्बुद्ध्यन्तरविरोधात् द्वित्वगुणतज्ज्ञानसम्बन्धेभ्यः
द्वित्वगुणश्च तज्ज्ञानं च तत्सम्बन्धश्चेति द्वित्वगुणतज्ज्ञानतत्सम्बन्धास्तेभ्यः इति द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः।

मू- तस्माद्द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता द्वित्वसामान्यतत्सम्बन्धतज्ज्ञा
नेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः। तत इदानीमपेक्षाबुद्धिविनाशा
द्द्वित्वगुणस्य विनश्यत्ता द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणं
द्वित्वगुणतज्ज्ञानसम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः
कालः। तदनन्तरं द्वे द्रव्ये इति द्रव्यज्ञानस्योत्पादो द्वित्वस्य विनाशो द्वित्वगुणबुद्धे
र्विनश्यत्ता द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः। तदनन्तरं द्रव्यज्ञाना
द्द्वित्वगुणबुद्धेर्विनाशो द्रव्यबुद्धेरपि संस्कारात्। एतेन त्रित्वाद्युत्पत्तिरपि व्याख्याता।

तदिति = संस्कारात् द्रव्यबुद्धेर्विनाशः इत्यर्थः। द्रव्यबुद्धिविनाशकारणत्वञ्च संस्कारस्य द्रव्यज्ञानसंस्कारस्य तद्भावभावित्वात्
अन्यथाऽसम्भवाच्च, इति द्वित्वोत्पादविनाशक्रमे। इन्द्रियसंनिकर्षत आरभ्य द्रव्यज्ञाननाशान्तं नव क्षणा इति सिद्धम्।
एतेन द्वित्वोत्पत्तिविनाशनिरूपणक्रमेण त्रित्वादीनामुत्पत्तिरपि व्याख्याता [illegible]।

प्रश॰ भा॰
भा॰ प्र॰
६५

सूयत्वमेव प्रकारं दर्शयति। एकत्वेभ्य इति = प्रत्येकमनुभूतेषु एकैकगुणेषु क्रमभाविनां संस्काराणामन्त्यगुणाऽनुभवाऽनन्तरं शतव्यवहारसंप्रवर्तकात् अदृष्टात् युगपदभिव्यक्तौ संयोगैकत्वात् अनेकविषये कृस्मरणोत्पादे सति अनुभवस्मरणाभ्यां अपेक्षाबुद्धिभ्यां स्वाश्रयेषु शतसंख्या जन्यते सा च सर्वद्रव्यसंस्कारसन्निवान्त्य द्रव्यसंयुक्तेन्द्रियज्ञानविषयत्वात् प्रत्यक्षा एव। अपेक्षाबुद्धिविनाशाद्विनाश इति। विनष्टेषु संख्येयेषु अन्ते संकलनात्मकः प्रत्ययो जायते "शतं पिपीलिकानां मया निहतमिति तत्र आश्रयाऽभावात् अपेक्षाबुद्धेर्विनाश इति। कथमाश्रयविनाशाद्विनाश इति प्रकारमाह। क्वचिदिति क्वचित् कस्मिंश्चित् स्थाने आश्रयविनाशात् अपेक्षाबुद्धेर्विनाशः इत्यर्थः। कथमिति प्रश्ने। यदा यस्मिन् काले एकत्वाधारावयवे एकगुणाश्रयस्य द्रव्यस्यावयवे कर्म उत्पद्यते क्रिया प्रादुर्भवति, तदैव तस्मिन्नेव काले एकत्वसामान्यज्ञानमुत्पद्यते एकगुणवर्तिनि एकत्वसामान्ये ज्ञानं जायते तदनन्तरं कर्मणाऽवयवान्तरविभागः क्रियते एकत्वसामान्यज्ञानादपेक्षाबुद्ध्युत्पत्तिरिति। तत इति =

मू = एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिरपेक्षाबुद्धिविनाशाद्विनाशः
इति। क्वचिदाश्रयविनाशादिति। कथम् यदैकत्वाधाराऽवयवे कर्मोत्पद्यते। तदै
वैकत्वसामान्यज्ञानमुत्पद्यते। कर्मणा चाऽवयवान्तरविभागः क्रियते। अपेक्षा-
बुद्ध्युत्पत्तिः। ततो तस्मिन्नेव काले विभागात् संयोगविनाशस्तस्मिन्नेव काले
द्वित्वमुत्पद्यते संयोगविनाशाद्द्रव्यविनाशः सामान्यबुद्ध्युत्पत्तिः। ततो यस्मिन्नेव
काले सामान्यज्ञानादपेक्षाबुद्धेर्विनाशस्तस्मिन्नेव काले आश्रयविनाशाद्द्वित्वविना
श इति शोभनमेतद्विधानं बध्यघातकपक्षे।

तत स्तदनन्तरं यस्मिन्नेव काले विभागात् अवयवद्रव्यविभागात् संयोगविनाशो द्रव्यारम्भकसंयोगविनाशः तस्मिन्नेव काले तदाऽपेक्षाबुद्धे द्वित्वमुत्पद्यते। संयोगविनाशात् द्रव्यसंयोगविनाशात् द्रव्यविनाशो द्रव्यस्य विनाशः, सामान्यबुद्धेर्द्वित्वसामान्यबुद्ध्युत्पत्तिः प्रादुर्भावः ततः पश्चात् यस्मिन्नेव काले सामान्यज्ञानाद्द्वित्वसामान्यज्ञानात् अपेक्षाबुद्धेर्विनाशः। तस्मिन्नेव काले तदैवाश्रयविनाशात् द्वित्वविनाशः इति न त्वपेक्षाबुद्धेर्विनाशादिति, तत्कारणं सहभावित्वात्। बध्यघातकपक्षे एतद्विधानमेव द्वित्वप्रकारः शोभनं युक्तमेव। किं नाम बध्यघातकत्वमित्युच्यते। "द्वितीयज्ञानोत्पत्तिकारकत्वे सति पूर्वविज्ञानविनाशकत्वम्॥

सहाऽनवस्थानलक्षणेऽपि भूयादित्यत आह । सहेति = तुः इति पूर्वप्रकरणप्रतिपादनार्थः । सहाऽनवस्थानलक्षणे सहाऽनवस्थानपक्षे हि विरोधे तेजोऽन्धकारयोरिव एकस्य ज्ञानस्योत्पादोऽपरस्य विनाश इति पक्षे द्वे द्रव्ये इति ज्ञानाऽनुत्पत्तिप्रसङ्गः, तस्मात् सहाऽनवस्थानलक्षणे न युक्त आश्रयविनाद्द्वित्वविनाश इत्यभिप्रायः । कथमिति प्रश्ने । सहाऽनवस्थानपक्षे गुणबुद्धिसमकाले द्वित्वसामान्यबुद्धिकाले एवाऽपेक्षाबुद्धेर्विनाशात् द्वित्वविनाशे द्वित्वविनाशलक्षणे तदपेक्षस्य द्वित्वाऽपेक्षस्य द्वे द्रव्ये इति ज्ञानस्योत्पत्तिप्रसङ्गो न भूयादिति । तत्र आशङ्कते ॥ लैङ्गिकेति = लैङ्गिकवह्निङ्गविशिष्टवत् ज्ञानमात्रादेव द्वित्वज्ञानमिति चेत्तर्हि एवं ते मतं स्यादभिप्रेतं भवेत् । यथा ध्वनिविशेषेण पुरुषाऽनुमाने ज्ञातमेव ध्वनिलक्षणं लिङ्गमभूतम् अविद्यमानं विनष्टमेवेत्यर्थः । भूतस्य विद्यमानस्य पुरुषविशेषस्य लिङ्गं भवतीति लिङ्गस्याऽभावेऽपि ज्ञानमात्रात् तदवबोधनमात्रादेवानुमानं द्वे द्रव्ये इति ज्ञानं स्यादिति । तथा तेन प्रकारेण गुणविनाशेऽपि द्वित्वगुणविनाशेऽपि गुणबुद्धिमात्रात् द्वित्वगुणबुद्धिमात्रात् द्रव्यप्रत्ययो द्वित्वद्रव्यप्रत्ययः स्यात् । तथा च सूत्रम् "विरोध्यभूतं भूतस्य" वै. द. ३।१।११ तत्परिहारमाचष्टे । इतीति = ज्ञानमात्रादेव द्वे द्रव्ये इति ज्ञानोत्पत्तिरित्येत

मू = सहाऽनवस्थानलक्षणे तु विरोधे द्रव्यज्ञानाऽनुत्पत्तिप्रसंगः । कथम् । गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद्द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति द्रव्यज्ञानस्याऽनुत्पत्तिप्रसंगः इति । लैङ्गिकवज्ज्ञानमात्रात् इति चेत्स्यान्मतम् । यथाऽभूतं भूतस्येत्यत्र लिङ्गाऽभावेऽपि ज्ञानमात्रादनुमानम् । तथा गुणविनाशेऽपि गुणबुद्धिमात्राद्द्रव्यप्रत्ययः स्यात् । इति न विशेष्यज्ञानत्वात् ।

न, कस्मात् विशेष्यज्ञानत्वात् विशेष्यस्य पदार्थस्य ज्ञानत्वात् । इति ॥

श्रीः

भवतु विशेष्यज्ञानम् तथाऽपि कुतो ज्ञानमात्रात्मा सम्भवति तत्राह । नहीति = विशेषणं विशेष्यस्वरूपं विशेष्यस्याऽनुरञ्जके विशेष्ये स्वोप सर्जनताप्रतीतिहेतुरिति यावत् । अतो विशेष्यज्ञानं विशिष्टज्ञानं सारूप्यात् लैङ्गिकज्ञानसादृश्यात् विशेषणसम्बन्धमन्तरेण विशेषणस्य सम्बन्धो, विशेषणसम्बन्धः तं विशेषणसम्बन्धं विना भवितुं नार्हति । तथा चाह सूत्रकारः, सूत्रकारः भगवान् कणादोऽपि स्वोपदिष्टवैशेषिकदर्शनस्य ८।१।९ सूत्रेऽपि तथैवाह "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते,, वै॰ ८॰ ८।१।९ समवायिनः श्वैत्यात् समवायसम्बन्धविशिष्टं यत् द्रव्यं तथाभूतस्य श्वैत्यसमवायिनो द्रव्यस्य यत् श्वैत्यं गुणः तस्मात्, श्वैत्यबुद्धेश्च तज्ज्ञानं च श्वैत्यबुद्धेश्च हेतौ पञ्चमीयत्र, श्वेते श्वेतवति द्रव्ये दुग्धादौ या बुद्धिः श्वेतोऽयं शङ्खः इतिविशिष्टज्ञानमुत्पद्यते, तत्र ते पूर्वोक्ते एते श्वैत्यबुद्धिः श्वेतबुद्धिः श्वेतेति बुद्धिः

मू॰ = नहि विशेष्यज्ञानं सारूप्याद्विशेषणसम्बन्धमन्तरेण भवितुमर्हति । तथा चाह सूत्रकारः "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते इति,, न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यते । तस्माद्विषमोऽयमुपन्यासः ।

द्वे कार्यकारणभूते पूर्वा श्वैत्यबुद्धिः विशेषणबुद्धिः कारणम् । उत्तरा श्वेतबुद्धिश्च विशिष्टबुद्धिः कार्यमिति मिथः कार्यकारणभूते कार्यकारणस्वभावे विशेषणसम्बन्धविशेषणज्ञानानां विशिष्टप्रत्यक्षप्रमां प्रति कारणत्वमिति भावः । तुशब्दः लैङ्गिकज्ञानस्य विशेष्यज्ञानाद्वैशिष्ट्यं प्रदर्शयति । लैङ्गिके ज्ञाने लिङ्गोपजनिते ज्ञाने लिङ्गाऽभेदेन लिङ्गिनो लिङ्गोपसर्जनतागृहीतया नोपपद्यते, तस्माद्धेतोः विषमोऽयमुपन्यासः अकिञ्चित्करोऽयं स्थितिविधिः । लैङ्गिकवदुपन्यासो विषमो द्वे द्रव्ये इति ज्ञानेन सह तुल्यो न भवतीत्यर्थः । श्रीः श्रीः श्रीः

अविनष्टविशेष्यज्ञानालम्बनाऽवभासमानतालक्षणत्वात्तदालम्बनतायाः इत्यत आह नमेति = द्रव्याऽवबोधन समये द्वित्वं न विनश्यतीति यदुक्तं तन्न, कस्मात् आशूत्पत्तेः द्वित्वगुणज्ञानं द्रव्यज्ञानञ्च शीघ्रमुत्पद्यते तस्मात्। यथा नियमस्यास्वीकारे द्वित्वस्य द्रव्यस्य च एकस्मिन्नेव ज्ञाने प्रतिभास इत्यभिमानः। वस्तुवृत्त्या तु पूर्वं द्वित्वस्य प्रतिभासः ततो द्रव्यस्येति। तत्रोदाहरणमुदाहरति। यथा येन प्रकारेण शब्दवदाकाशमित्यत्र शब्दज्ञानमाकाशज्ञानं शब्दविशिष्टज्ञानञ्चेति त्रीणि ज्ञानानि आशु उत्पद्यन्ते। तथा द्वित्वादिविज्ञानोत्पत्तौ अपि द्वित्वज्ञानं द्रव्यज्ञानञ्च तयोरुत्पत्तौ अपि अदोषः दोषराहित्यम्। बध्यघातकपक्षेऽपि द्रव्यज्ञानानुत्पत्तिप्रसंग इति कस्यचिदुक्तिम् आशङ्कते। बाध्यघातकेति यदि गुणबुद्धिसमकालं द्वित्वविनाशे द्रव्यज्ञानं नोत्पद्यते। तर्हि बध्यघातकपक्षेऽपि तदनुत्पत्तिरिति समानो दोषः इति चेत्स्यात् मतं मे। ममाऽभीष्टमेतदिति। किं [illegible] श्रोत्रमित्युपदिशति। श्रोत्रमिति = श्रूयतेऽनेनेति श्रवणं श्रवणं च

मू= न आशूत्पत्तेर्यथा शब्दवदाकाशमित्यत्र त्रीणि ज्ञानान्युत्पद्यन्ते। तथा द्वित्वादिज्ञानोत्पत्तावप्यदोषः। बध्यघातकपक्षेऽपि समानो दोष इति चेत्स्यान्मतम्। श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धस्तस्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद्बाधिर्यमिति।

तद्विवरञ्च तदेव संज्ञा यस्येति श्रवणविवरसंज्ञकस्तादृशो नभोदेशः, शब्दनिमित्त उपभोगः सुखदुःखात्मकस्तस्य प्रापको यो धर्माधर्मौ ताभ्यामुपनिबद्धः सहकृत इति। तत् श्रोत्रं श्रोत्रेन्द्रियं भवति, इत्यत्र विशेषणस्य शरपदं पृथिव्यादिकार्येभ्यो घ्राणादिभ्यो व्यवच्छिनत्ति। जातिरेकैकेन्द्रियं स्वविशेषगुणमेवादत्ते। यथा चक्षुः गृह्णाति रूपम्, रसं च रसना, स्पर्शं त्वक् च, घ्राणं च गन्धं श्रोत्रं शब्दमेवेति। एवं सति सर्वे शब्दं गृह्णन्तु न केचिदपि बाधिर्यं प्रतिपद्येत, तत्राह तस्याकाशस्य नित्यत्वे सत्यपि उपनिबन्धकवैकल्यात उपनिबन्धकौ सहकारिभूतौ यौ धर्माधर्मौ तयोर्वैकल्याद्सत्ता बाधिर्यमेव जायते नान्यथा। इति: शब्दः आकाशप्रकरणसमाप्तिकः।

६८

तदुपपत्तिमाह। ननु इति = ननु इत्याशङ्कायाम् वध्यघातकपक्षेऽपि द्रव्यज्ञानस्य उत्पत्त्यभावप्रसङ्गः। कथमिति प्रश्ने। तत्प्रकारं दर्शयति। द्वित्वसामान्यबुद्धिसमकालमिति - यथाऽपेक्षाबुद्धिरुत्पन्ना द्वित्वं जनयति तथा संस्कारमपि। स च तस्या अपेक्षाबुद्धेः विनाशकः तेन संस्कारस्य द्वित्वस्य चोत्पादे द्वित्वसामान्यज्ञानस्य चोत्पद्यमानताऽपेक्षाबुद्धेर्विनश्यत्ता इत्येकः कालः। ततो द्वित्वसामान्यज्ञानस्य चोत्पादः, गुणबुद्धेश्चोत्पद्यमानताऽपेक्षाबुद्धेर्विनाशो द्वित्वस्य विनश्यत्ता इत्येकः कालः। ततो गुणबुद्धेरुत्पादो द्वित्वस्य विनाश इति तदनन्तरे तदपेक्षस्य द्रव्यज्ञानस्याऽनुत्पादः इति वध्यघातकपक्षेऽपि तुल्यो दोष इति अपूर्णतापूर्वपक्षं निराकृत्य समाधत्ते। नेति = समूहज्ञानस्य पृथग्ज्ञानस्य संस्कारहेतुत्वात् संस्कार एव हेतुर्यस्य तस्मान्न दोषः। समूहज्ञानमेव द्वित्वगुणविशिष्टद्रव्यज्ञानमेव संस्कारकारणं संस्कारं करोतीत्यर्थः। नालोचनज्ञानं न निर्विकल्पकमपेक्षाज्ञानमतो नाऽस्य संस्काराद्विनाश इत्यर्थः। इत्येवं चेत्तर्हि "ज्ञानायौगपद्यात्" इति सूत्रविरोध इति केनचिदुक्ते तदाशङ्कते।

मू० = ननु वध्यघातकपक्षेऽपि तर्हि द्रव्यज्ञानाऽनुत्पत्तिप्रसंगः कथम्। द्वित्वसामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिविनाशादिति। ननु समूहज्ञानस्य संस्कारहेतुत्वात्। समूहज्ञानमेव संस्कारकारणं नालोचनमित्यदोषः। ज्ञानयौगपद्यप्रसंगः इति चेत्स्यान्मतम्। ननु ज्ञानानां वध्यघातकविरोधे ज्ञानयौगपद्यप्रसंगः इति।

ज्ञानेति ज्ञानयौगपद्यप्रसङ्गः। चक्षुः त्वग्रसनादिज्ञानानि युगपदेव समकालमेव प्राप्स्यन्ति, इति चेन्मतं स्याद् भविष्यति स्यात्। ननु इत्याशङ्कायाम्। ज्ञानानां द्वित्वत्रित्वादिज्ञानानां वध्यघातकपक्षविरोधे सत्यपि ज्ञानानां युगपत्प्राप्तिप्रसङ्गो भविष्यति इति। एकस्मिन्नेव काले सर्वाणि इन्द्रियज्ञानानि भविष्यन्ति न कस्यचिद्विरोधो भविष्यति इति दिक्।

अधुनापूर्वपक्षं निराकरोति ॥ नेति = यत् पूर्वमुक्तं तन्नास्ति। एकस्मिन् क्षणे विनाश्यविनाशकज्ञानयोः सहाऽवस्थानं न दोषाय 'ज्ञानायौगपद्यादिति सूत्रेण। अविनश्यतोरवस्थानप्रतिषेधात्। ज्ञानायौगपद्यवचनेन ज्ञानयोर्युगपदुत्पत्तिः अविनश्यतोः ज्ञानयोः युगपदवस्थानं युगपत्स्थितिः प्रतिषिध्यते। परं बध्यघातकपक्षे न ज्ञानयोः

मू = न। अविनश्यतोरवस्थानप्रतिषेधात्। ज्ञानायौगपद्यवचनेन ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानं प्रतिषिध्यते। न हि बध्यघातकविरोधे ज्ञानयोर्युगपदुत्पत्तिरविनश्यतोश्च युगपदवस्थानमस्तीति।

युगपत् उत्पत्तिः युगपदुत्पादः अस्ति नाऽप्यविनश्यतोः युगपदवस्थानं सहाऽवस्थानम्, एकस्य उत्पादे द्वितीयस्य विनश्यद्रूपत्वात् इत्यत आह नहीति। इति शब्दः समाप्तौ।

सम्प्रति क्रमागतं निरूपयति परिमाणमिति = मानव्यवहारकारणं मानस्य दीर्घह्रस्वादिमानस्य व्यवहारः व्यवहृतिस्तत्र कारणं हेतुः परिमाणम्। अणु १ महत् २ दीर्घं ३ ह्रस्वम् ४ इति भेदात् चतुर्विधं परिमाणम्। चकारात् शब्दोऽपि कारणं परिमाणस्येति केचित्। तत्र तेषु चतुर्षु परिमाणेषु मध्ये महत्परिमाणं द्विविधम् नित्यानित्यभेदात्। तत्र नित्यं महत्परिमाणमाकाशे काले दिशि आत्मनि च। तच्च परममहत्त्वमित्युच्यते। अनित्यं महत्परिमाणं त्र्यणुकादौ एव नाकाशादि

मू = परिमाणं मानव्यवहारकारणम्। तच्चतुर्विधम्। अणु महद्दीर्घं ह्रस्वञ्चेति। तत्र महद्द्विविधं नित्यमनित्यञ्च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम्। अनित्यं त्र्यणुकादावेव। तथा चाणु अपि द्विविधं नित्यमनित्यञ्च। नित्यं परमाणुमनःसु तत्पारिमाण्डल्यम्।

षु इत्यर्थः। किं नाम त्र्यणुकम् इत्युच्यते "यस्य प्रत्यक्षस्य द्रव्यस्य अवयवा न प्रत्यक्षाः तदेव त्र्यणुकम्। तथा च अणुपरिमाणमपि नित्यानित्यभेदाद्द्विविधम्। नित्यम् अणु परिमाणं परमाणुषु मनःसु च। उत्पत्तिविनाशकारणाभावात्। तत्पारिमाण्डल्यम् सर्वापकृष्टं परिमाणम्॥

परिमाणभेदानामवान्तरभेदानाह । अनित्यमिति = अनित्यम् अणुपरिमाणं द्व्यणुक एव । कुवलयामलबिल्वादिषु कुवलयश्च आमलकश्च बिल्वश्च कुवलयामलबिल्वास्ते एव आदिर्येषु इति कुवलयामलकबिल्वादयः तेषु कुवलयामलबिल्वादिषु महत्सु महत्परिमाणवत्सु अपि तत्प्रकर्षभावाभावमपेक्ष्य तस्य बिल्वस्य प्रकर्षभावः आमलकात् , तस्य बिल्वस्य प्रकर्षोऽभावः कुवलयात् । तत्प्रकर्षभावश्च तत्प्रकर्षाभावश्च तत्प्रकर्षभावाभावौ तं तत्प्रकर्षभावाभावम् अपेक्ष्य दृष्ट्वा अणुव्यवहारो भाक्तः गौणः । उभाभ्यां भजते इति भक्तिः सादृश्यं तस्यामिति भाक्तः सादृश्यमात्रनिबन्धनो गौण इत्यर्थः । यथा बिल्वे यः प्रकर्षभावो महत्परिमाणाऽतिशययोगित्वं तस्यामलकेऽभावमपेक्ष्याणुव्यवहारो भाक्तः । एवमामलकपरिमाणातिशयाऽभावं कुवलयेऽणुव्यवहारः । यत्र हि मुख्यम् अणुत्वम् द्व्यणुके तत्र महत्परिमाणस्याऽभावो दृष्टः आमलकेऽपि यादृशं बिल्वे महत्परिमाणं तादृशं नास्तीत्येतावता साधर्म्योपचारप्रवृत्तिः । उत्पाद्य महदणुत्वे महत् च अणुत्वञ्च महदणुत्वे उत्पाद्येचते

मू = अनित्ये द्व्यणुक एव । कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावाऽभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः । दीर्घत्वह्रस्वत्वे चोत्पाद्य महदणुत्वैकार्थसमवेते समिदिक्षुवंशादिष्वञ्जसा दीर्घेष्वपि तत्प्रकर्षभावाऽभावमपेक्ष्य भाक्तो ह्रस्वत्वव्यवहारः ।

महदणुत्वे चेत्युत्पाद्य महदणुत्वे ताभ्यामेकस्मिन्नर्थे समवेते ह्रस्वत्वदीर्घत्वे । यत्रोत्पाद्यं महत्वं त्र्यणुकादौ तत्रोत्पाद्यं दीर्घत्वं यत्र चोत्पाद्यमणुत्वं द्व्यणुके तत्रोत्पाद्यं ह्रस्वत्वमित्यर्थः । समिदिक्षुवंशादिषु समिच्चेक्षुश्च वंशाश्च समिदिक्षुवंशाः त एवादिर्येषु इति समिदिक्षुवंशादिषु अञ्जसा परमार्थतो दीर्घेष्वपि वंशेषु यः परिमाणप्रकर्षभावो दीर्घातिशययोगित्वं तस्याऽभावम् [redacted] इक्षौ कोदण्डे अपेक्ष्य ह्रस्वव्यवहारः । यत् खलु परमार्थतो ह्रस्वे द्व्यणुके तत्र दैर्घ्योऽभावः । इक्षौ अपि वंशस्य यादृशे दैर्घ्ये तादृशं नास्तीत्युपचार इति । दीर्घह्रस्वत्वे तु अनित्ये एव ।

अथेदानीमुत्पाद्यस्य परिमाणस्य कारणनिरूपणार्थमाह। अनित्यमिति= दीर्घह्रस्वमहदणुभेदात् अनित्यं चतुर्विधमपि संख्यापरिमाणप्रचययोनि। संख्याकारणं परिमाणहेतुः प्रचयबीजम्। संख्यायाः तावत्कारणत्वमाह। तत्र तेषु परमाणुद्व्यणुकेषु परमाणुभ्याम् आरब्धं द्व्यणुकं परमाणुद्व्यणुकम् इत्युच्यते। तेषु परमाणुद्व्यणुकेषु त्रिषु एकैकगुणालम्बनानाम् ईश्वरबुद्धिं परमात्ममनीषाम् अपेक्ष्योत्पन्नाः प्रादुर्भूताः या बहुत्वसंख्या सा त्रित्वसंख्या तैः त्रिभिः द्व्यणुकैरारब्धे कार्यद्र[illegible]व्ये त्र्यणुकलक्षणे रूपाद्युत्पत्तिसमकालमेव रूपादिगुणप्रादुर्भावकाले महत्त्वं दीर्घत्वञ्च करोति। इत्यत्र तत्रेतिपदं महत्परिमाणनिवारणकारणार्थं त्र्यणुकादीत्यादिपदं चतुरणुकादिपरिग्रहार्थम्। सम्प्रति परिमाणस्य कारणत्वमाह॥ द्विबहुभिरिति= द्वौ च बहवश्च तैरारब्धे कार्यद्रव्ये कारणमहत्त्वानि एव महत्त्वमारभन्ते न च बहुत्वम्। यत्र च बहुभिर्महद्भिरवयवैः कार्यमारभ्यते, तत्रावयवमहत्त्वेभ्यो अवयविनि महत्त्वस्योत्पादो न बहुत्वसंख्यायाः समानसंख्यैः स्थूलैः सूक्ष्मैश्चारब्धयोः द्रव्ययोः स्थूलारब्धे महत्त्वातिशयदर्शनात् संख्यायाः कारणत्वे हि कार्यविशेषो न स्यात् तस्याः अविशेषात्। प्रचयमाह॥ प्रचय इति= द्रव्यारम्भकः प्रशिथिलः संयोगविशेषः प्रचय इति। स च तूलपिण्डयोः

मू०= अनित्यं चतुर्विधमपि संख्यापरिमाणप्रचययोनि। तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसंख्या तैरारब्धे कार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वञ्च करोति। द्विबहुभिर्महद्भिश्चारब्धे कार्यद्रव्ये कारणमहत्त्वान्येव महत्त्वमारभन्ते न बहुत्वं समानसंख्यैश्चारब्धेऽतिशयदर्शनात्। प्रचयस्तूलपिण्डयोर्वर्तमानः पिण्डारम्भकावयवप्रशिथिलसंयोगानपेक्षमाण इतरेतरपिण्डावयवसंयोगापेक्षो वा द्वितूलके महत्त्वमारभते न बहुत्वमहत्त्वानि। समानसंख्यापरिमाणैरारब्धेऽतिशयदर्शनात्।

द्वितूलकद्रव्यारम्भकयोस्तूलपिण्डयोर्वर्तमानः प्रत्येकं पिण्डयोरारम्भकान् प्रशिथिलान् अवयवसंयोगान् अपेक्षमाणोऽपेक्षां कुर्वन् इतरेतरपिण्डावयवसंयोगापेक्षः इतरेतरपिण्डयोः परस्परपिण्डयोरवयवानां संयोगापेक्षः संयोगाऽमिलाषो वा द्वितूलके महत्त्वमारभते यत्र तु पिण्डयोः प्रशिथिलः संयोगः, तत्र पिण्डारम्भकप्रशिथिलसंयोगापेक्षो महत्त्वस्य कारणम्। न बहुत्वमहत्त्वानि। यत्र प्रचयविशेषात् परिमाणविशेषप्रतीतिरुक्ता तत्र बहुत्वं महत्त्वं च न कारणम्। महत्त्वानीत्यत्र विषयभेदापेक्षया बहुवचनम्। समानसंख्यापरिमाणैः; संख्या च परिमाणञ्च संख्यापरिमाणानि समानानि संख्यापरिमाणानि येषां तानि समानसंख्यापरिमाणानि तैः समानसंख्यापरिमाणैः आरब्धे कार्यद्रव्येऽतिशयदर्शनात्, अतिशयदर्शनं बहुत्वदर्शनं भवति।

भूयस्तदेव प्रतिपादयति। द्वित्वसंख्येति = द्वाभ्यां यद्व्यणुकमारब्धं तत्रेश्वरबुद्ध्यपेक्षोत्पन्ना परमाणौ वर्तमाना द्वित्वसंख्याऽणुत्वमारभते।
यस्तु परमाणुपरिमाणस्यैव द्व्यणुके परिमाणोत्पत्तिं ब्रूयात्, तं प्रति द्व्यणुकस्यापि अणुतमत्वप्रसक्तिरिति पूर्वोक्तैव युक्तिरावर्तनीया।
कारणबहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो कारणबहुत्वं महत्त्वं समानजातीयः प्रचयश्चेति कारणबहुत्वमहत्त्वसमानजातीयप्रचयाः
तेभ्यस्त्र्यणुकादौ दीर्घत्वस्योत्पत्तिः दीर्घत्वस्य प्रादुर्भावः महत्त्ववत्। यथा महत्त्वस्य कारणबहुत्वात् समानजातीयात् कारणमहत्त्वात्
प्रचयाच्चोत्पत्तिरिति सर्वमस्य महत्त्वेन सह तुल्यम्। द्वित्वसंख्यातो द्व्यणुके ह्रस्वत्वस्योत्पत्तिरणुत्ववदिति। कथमेकस्मात् कार
णात् कार्यभेदः अदृष्टविशेषस्य सहकारिणो भेदात्, महत्त्वविशेष एव दीर्घत्वम् अणुत्वविशेषः एव ह्रस्वत्वमिति मन्यमान आह।
अथेति = त्र्यणुकादिषु वर्तमानयोर्महत्त्वदीर्घत्वयोः परस्परतः को विशेषः को भेदः अपि द्व्यणुकेषु चाणुत्वह्रस्वत्वयोः को भेदः

मू- द्वित्वसंख्या चाणौ वर्तमाना द्व्यणुकेऽणुत्वमारभते। महत्त्ववत् त्र्यणुकादौ कारण
बहुत्वमहत्त्वसमानजातीयप्रचयेभ्यो दीर्घत्वस्योत्पत्तिः। अणुत्ववत् द्व्यणुके द्वित्व
संख्यातो ह्रस्वत्वस्योत्पत्तिः। अथ त्र्यणुकादिषु वर्तमानयोर्महत्त्वदीर्घत्वयोः पर
स्परतः को विशेषः। द्व्यणुकेषु चाणुत्वह्रस्वत्वयोरिति। तत्रास्ति महत्त्वदीर्घत्वयोः
परस्परतो विशेषः महत्सु दीर्घमानीयतां दीर्घेषु च महदानीयतामिति विशिष्टव्य
वहारदर्शनात् इति। अणुत्वह्रस्वत्वयोस्तु परस्परतो विशेषस्तद्दर्शिनां प्रत्यक्ष इति।
तच्चतुर्विधमपि परिमाणमुत्पाद्यमाश्रयविनाशादेव विनश्यतीति।

इति प्रश्ने जाते निर्णयं लिखति। महत्त्वदीर्घत्वयोः परस्परतः मिथो विशेषो भेदोऽस्ति महत्सु दीर्घमानीयतां दीर्घेषु महत् आनीयतामिति विशिष्टस्य
व्यवहारस्य दर्शनात्। अणुत्वह्रस्वत्वयोः तु विशेषः भेदः तद्दर्शिनां तेषां अणुत्वह्रस्वादीनां दर्शिनः योगिनः तेषां योगिनां प्रत्यक्षो अक्षि
गोचर एवेति। तत् चतुर्विधम् अपि परिमाणम् उत्पाद्यं तत्संज्ञकम्। अत्र उत्पाद्यग्रहणेन परमाणुपरमह्रस्वपरममहत्परमदीर्घव्यवच्छेदः।
अत्र अणुत्वमहत्त्वयोः दीर्घह्रस्वत्वयोः च परस्परापेक्षाकृतत्वम्। तत्परिमाणम् आश्रयविनाशादेव विनश्यति, तस्य परिमाणस्याश्र
यविनाशादेव विनाश इति। यदा परिमाणधारस्य ध्वंसस्तदा परिमाणस्यापि विनाशो जायते इति तत्त्वम्। इति परिमाणम्।

पृथक्त्वं निरूपयति। पृथक्त्वमिति = अपोद्धारव्यवहारकारणम् "इदम् अस्मात् पृथक्" इति ~~[illegible]~~ ज्ञाने व्यपदेश आपोद्धारव्यवहारः, यद्वा अपरत्यावधिमपेक्ष्य य उद्धारो निर्धारणं सोऽपोद्धारस्तस्य व्यवहारः तस्य कारणं पृथक्त्वमिति। तत्पुनः तत् पृथक्त्वं पुनः एकद्रव्यमेकं द्रव्यम् आश्रयो यस्य तदेकद्रव्यम्। न एकद्रव्यमनेकद्रव्यम् अनेकं द्रव्यमाश्रयो यस्येति तदनेकद्रव्यम्। अत्र "पुनः शब्दः" एकद्रव्यवृत्तेः परिमाणात् पृथक्त्वस्यैकाऽनेकद्रव्यवृत्तित्वविशेषाऽवद्योतनार्थः। तस्य द्विविधस्यापि पृथक्त्वस्य नित्यत्वञ्चानित्यत्वञ्च निष्पत्तिश्च संख्यया व्याख्याताः संख्याव्याख्याने लिखिताः। यथैकद्रव्यैकत्वसंख्या परमाणुषु नित्या कार्ये कारणगुणपूर्विका आश्रयविनाशाच्च विनश्यति तथैकद्रव्यमेकपृथक्त्वम्। यथाऽनेकद्रव्या द्वित्वादिका संख्याऽनेकगुणाऽलम्बनायाः अपेक्षाबुद्धेरुत्पद्यते, तद्विनाशाच्च विनश्यति। तथाऽनेकद्रव्यद्विपृथक्त्वादिकमपि इत्यतिदेशार्थः। नित्यञ्चानित्यञ्च नित्यानित्ये तयोर्भावः नित्याऽनित्यत्वम् इति द्वन्द्वात्परं श्रूयमाणस्य त्वप्रत्ययस्य प्रत्येकमभिसम्बन्धः।

मू=पृथक्त्वमपोद्धारव्यवहारकारणम्। तत्पुनरेकद्रव्यमनेकद्रव्यञ्च। तस्य तु नित्यानित्यत्वनिष्पत्तयः संख्यया व्याख्याताः। एतावांस्तु विशेषः। एकत्वादिवदेकपृथक्त्वादिष्वपरसामान्याऽभावः। संख्यया तु विशिष्यते तद्विशिष्टव्यवहारदर्शनादिति।

अत्रापि वाक्ये तुशब्दो विशेषाऽवद्योतनार्थः। एतावान् तु विशेषः इयदाधिक्यम्। संख्यायाः सकाशात् तस्य पृथक्त्वस्य एतावान् एतत्परिमितः भेदो यथा संख्या तु अपरसामान्यापेक्षया एकत्वद्वित्वादिकम् अपरसामान्यम् अस्ति तथा एकपृथक्त्वादिषु अपरसामान्याऽभावः। पृथक्त्वपरसामान्यापेक्षया एकपृथक्त्वादिकम् अपरसामान्यं नास्ति इतिभावः। संख्यया तु विशिष्यते, अयमेकः पृथक् द्वौ इमौ पृथक् इत्येकत्वादिसंख्याविशिष्टो व्यवहारः पृथक्त्वे दृश्यते। तत्र एकत्रद्रव्ये वर्तमानं पृथक्त्वम् एकार्थसमवेतया एकत्वसंख्यया विशिष्यते। तद्विशेषश्च अवयवान्तरव्यवहारविशेषः अनुवृत्तिप्रत्ययश्च पृथक्त्वसामान्यकृत एवेत्यभिप्रायः तस्य व्यवहारस्य दर्शनात्। इति पृथक्त्वम्।

संयोगं प्रतिपादयति स संयोग इति = संयुक्तप्रत्ययस्य "अस्ति तावदिदम् अनेन संयुक्तम्" इति प्रत्ययः लौकिकानां न चास्य रूपादयो निमित्तं तत्प्रत्ययविलक्षणत्वात्। अतोऽस्य संयुक्तप्रत्ययस्य यत् निमित्तं कारणं सः संयोग इति। स च संयोगः द्रव्यगुणकर्महेतुः। द्रव्यस्य यथा तन्तुसंयोगो द्रव्यस्य पटस्य हेतुः। गुणस्य यथा "आत्ममनःसंयोगो बुद्ध्यादीनां गुणानां भेर्याकाशसंयोगः शब्दस्य गुणस्य हेतुः। कर्मणो यथा "प्रयत्नवदात्महस्तसंयोगो हस्तकर्मणो हेतुः", तथा वेगवद्वायुसंयोगः तृणकर्मणो हेतुरित्यूह्यम्। स च संयोगो द्रव्यारम्भे द्रव्यस्यारम्भे कर्तव्ये संयोगः स्वाश्रयं स्वनिमित्तं च कारणमन्तरेण नान्यत् अपेक्षते ऽतो द्रव्यारम्भे संयोगो निरपेक्षः। तथा भवति "सापेक्षेभ्यो निरपेक्षेभ्यश्च वै. द. इति सूत्रवचनात्। अत्र सूत्रे वार्तमानिक प्रतीतिहेतुत्वेन अभिधीयमानेषु तन्तुषु संयुक्तेषु अनपेक्ष शब्द प्रयोगात् संयोगो द्रव्यारम्भे निरपेक्ष इति प्रतीयते तात्पर्यम्। गुणेति = सः संयोगः गुणकर्मारम्भे तु गुणश्च कर्म च गुणकर्मणी तयोर्गुणकर्मणोरारम्भे सापेक्षः अपेक्षया सह वर्तते इति सापेक्षः। संयुक्तसमवायात् अग्नेर्वैशेषिकमित्यग्निगतमुष्णत्वं विवक्षितं तत्पार्थिवपरमाणुसंयुक्ते वह्नौ समवायात्। संयोगः

मू- संयोगः संयुक्तप्रत्ययनिमित्तम्। स च द्रव्यगुणकर्महेतुः। द्रव्यारम्भे निरपेक्षस्तथा भवतीति सापेक्षेभ्यो निरपेक्षेभ्यश्चेति वचनात्। गुणकर्मारम्भे तु सापेक्षः संयुक्तसमवायादग्नेर्वैशेषिकमिति वचनात्। अथ कथं लक्षणः कतिविधश्चेति। अप्राप्तयोः प्राप्तिः संयोगः स च त्रिविधः। अन्यतरकर्मजः उभयकर्मजः संयोगजश्चेति।

संयुक्तप्रत्ययनिमित्तमित्यवगतं तावत्किं तस्य स्वरूपं भेदश्चेति नि विज्ञायते तदर्थं परिपृच्छति। अथेति = अथ शब्दः प्रश्नोपक्षेपे, कथं शब्दः किंशब्दार्थे यथा को धर्मः कथंलक्षण इति लक्षण शब्दश्च स्वरूपवचने इति किं स्वरूपः संयोग इति कतिविधश्च कतिप्रकारकः इत्यर्थः। लक्षणं यथा "अप्राप्तयोः प्राप्तिः संयोगः", पूर्वमप्राप्तयो द्रव्ययोः पश्चाद्या प्राप्तिः परस्परं संश्लेषः स संयोग इति। अप्राप्तयोः इति समवायव्यवच्छेदार्थम्। तस्य भेदास्त्रयः। च शब्दोऽवधारणार्थे संयोगः त्रिविध एव। अन्यतर कर्मजः द्वयोः संयोगिनोः मध्ये यदन्यतरद्द्रव्यं तत्र यत्कर्म तस्माज्जातोऽन्यतरकर्मजः। उभयकर्मजः उभयोः द्रव्ययोः कर्मणी उभयकर्मणी ताभ्यां जातः इत्युभयकर्मजः। संयोगजः संयोगादपि संयोगो जायतेऽतः संयोगजः॥

अन्यतरकर्मजमाह ॥ तत्रेति = तत्र तेषां त्रयाणां मध्ये क्रियावता द्रव्येण निष्क्रियस्य द्रव्यस्य संयोगोऽन्यतरकर्मजः। उदाहरणं यथा निष्क्रियस्य स्थाणोः क्रियावता श्येनेन सह संयोगः श्येनकर्मजः। एवमाकाशादीनां विभूनां निष्क्रियाणां क्रियावद्भिर्मूर्तैः अस्वेगतद्रव्यपरिमाणैः संयोगः मूर्तद्रव्यकर्मज इति। उभयकर्मजमाह ॥ उभयकर्मेति = याभ्यां द्विभ्यां द्रव्योः परस्परमागं[?]श्रुतोः अन्योन्यप्रतिघातो भवति ते विरुद्धे दिशौ यथा प्राचीप्रतीच्यौ, दक्षिणोदीच्यौ चेति। विरुद्धयोर्दिशोः क्रिया ययोः द्रव्ययोस्ते विरुद्धदिक्क्रिये तयोः सन्निपातः संश्लेषः उभयकर्मजः संयोगः। प्रत्येकमन्यत्र द्वयोरपि सामर्थ्यावधारणेन। यथा मल्लयोः मेषयोर्वा इत्युदाहरणम्। संयोगजमाह ॥ संयोगज इति = संयोगजः संयोगः उत्पन्नमात्रस्य उत्पत्तिसमागतस्य चिरोत्पन्नस्य वा बहुकालानन्तरप्रादुर्भूतस्य वा निष्क्रियस्य क्रियारहितस्य पदार्थस्य कारणसंयोगिभिः समवायिकारणभूतैः अकारणैः कारणाकारणसंयोगपूर्वकः कारणं समवायिकारणम् अकारणं तद्भिन्नं कारणं तयोः कारणाकारणयोः संयोगः कारणाकारणसंयोगः स एव पूर्वकः पूर्वो यस्येति कारणाकारणसंयोगपूर्वकः कार्याकार्यगतः कार्यञ्च अकार्यञ्चेति कार्याकार्ये तद्योर्गतः प्राप्तः संयोगः

मू॰= तत्रान्यतरकर्मजः क्रियावता निष्क्रियस्य। यथा स्थाणोः श्येनेन विभूनाञ्च मूर्तैः। उभय
कर्मजो विरुद्धदिक्क्रिययोः सन्निपातः। यथा मल्लयोर्मेषयोर्वा। संयोगजस्तूत्पन्नमा
त्रस्य चिरोत्पन्नस्य वा निष्क्रियस्य कारणसंयोगिभिरकारणैः कारणाकारणसंयोग
पूर्वकः कार्याकार्यगतः संयोगः। स चैकस्माद् द्वाभ्यां बहुभ्यश्च भवति। एकस्मात्ता
वत् तन्तुवीरणसंयोगात् द्वितन्तुकवीरणे संयोगः। द्वाभ्यां तन्त्वाकाशसंयोगाभ्यामेको द्वि
तन्तुकाकाशसंयोगः। बहुभ्यश्च तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः॥

संयोगजो भवति, स च संयोगः एकस्माद्भवति द्वाभ्यामपि भवति बहुभ्यश्चापि भवतीति। एकस्मात् संयोगजसंयोगो यथा भवति तथा दर्शयति ॥ एकस्मादिति = तन्तुवीरणसंयोगात् वीरणसंयुक्तस्य तन्तोः तन्त्वन्तरेण संयोगात् एकस्मात् द्वितन्तुकवीरणसंयोगः। द्वितन्तुकद्रव्यस्य निष्क्रियस्य समवायिकारणभूतैकतन्तुसंयोगिना वीरणेन संयोगः। प्राक्तनात् तन्तुवीरणसंयोगात् एकस्माद्भवति। द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकाकाशसंयोगः। आकाशं तावत् उत्पन्नमात्रेण द्वितन्तुकेन समं संयुज्यते, तत्कारणसंयोगित्वात् द्वितन्तुककारणसंयुक्तवीरणवत्। न च तस्य संयोगस्य कारणान्तरमस्ति, अतो द्वितन्तुककारणयोः तन्त्वोराकाशसंयोगाभ्यामेव तस्योत्पत्तिः। बहुभ्यश्चेति पटकारणानां तन्तूनां प्रत्येकं तुर्या सह संयोगाः, तेभ्यो बहुभ्य एकः पटतुर्योः संयोगजः संयोगः जायते ॥

एकस्माद्द्व्योरुत्पत्तिः कथमित्याह ॥ "एकस्मादित्यारभ्य रूपाद्युत्पत्तिरित्यन्तं सुगममेव भाष्यम् । ततस्तस्मिन्निति = ततस्तदनन्तरं तस्मिन्नेव काले इतरेतरे पार्थिवाप्यद्व्यणुके तयोः कारणकारणे परस्परसंयुक्तौ पार्थिवाप्यपरमाणू पार्थिवः परमाणुः इतरस्य पार्थिवद्व्यणुकस्य कारणम्, इतरस्याप्यस्य द्व्यणुकस्य कारणं तयोः संयोगात् इतरस्य पार्थिवपरमाणोः यत्कार्यं पार्थिवं द्व्यणुकं अकार्यश्चाप्यः परमाणुस्तयोः संयोगो भवति । एवमितरस्याप्यपरमाणोर्यत्कार्यमाप्यं द्व्यणुकम् अकार्यस्तु पार्थिवः परमाणुस्तयोरपि संयोगो भवतीत्येकस्माद्द्व्योरुत्पत्तिः । पार्थिवाप्ययोः द्व्यणुकयोर्विजातीयपरमाणुसंयोगे किं प्रमाणमिति पृष्टः सन् प्रमाणमाह । किं कारणमिति = कारणसंयोगिनाऽकारणेन कारणभिन्नेन कार्यमवश्यं संयुज्यते इति युक्तम् । अतोऽस्मात् कारणात् पार्थिवं द्व्यणुकं कारणसंयोगिनाऽऽप्येन परमाणुना जलीयपरमाणुना सम्बद्ध्यते । आप्यमपि द्व्यणुकं जलीयद्व्यणुकमपि कारणसंयोगिना पार्थिवेन द्व्यणुकेन सम्बद्ध्यते । अथ प्रश्नान्तरं विधत्ते ॥ अथेति = अथेति प्रश्ने, द्व्यणुकयोः पार्थिवाप्यद्व्यणुकयोः इतरेतरकारणसम्बद्धयोः पार्थिवद्व्यणुकस्य स्वकीयाकारणेन आप्यद्व्यणुककारणेन आप्यपरमाणुना सम्बद्धस्याप्यद्व्यणुकस्य अपि स्वकीयाऽकारणेन पार्थिव

मू॰ = एकस्माच्च द्व्योरुत्पत्तिः । कथम् । यदा पार्थिवाप्ययोरण्वोः संयोगे सत्यन्येन पार्थिवेन पार्थिवस्यान्येनाप्येन चाप्यस्य युगपत्संयोगौ भवतस्तदा ताभ्यां संयोगाभ्यां पार्थिवाप्ये द्व्यणुके युगपदारभ्येते । ततो यस्मिन्नेव काले द्व्यणुकयोः कारणगुणपूर्वक्रमेण रूपाद्युत्पत्तिः । तस्मिन्नेव काले इतरेतरकारणाकारणगतात् संयोगादितरेतरकार्याकार्यगतौ संयोगौ युगपदुत्पद्येते । किं कारणम् । कारणसंयोगिना ह्यकारणेन कार्यमवश्यं संयुज्यते इति न्यायः । अतः पार्थिवं द्व्यणुकं कारणसंयोगिनाऽऽप्येनाणुना सम्बद्ध्यते । आप्यमपि द्व्यणुकं कारणसंयोगिना पार्थिवेनेति । अथ द्व्यणुकयोरितरेतरकारणाकारणसम्बद्धयोः कथं परस्परतः सम्बन्ध इति ।

द्व्यणुककारणेन पार्थिवपरमाणुना सम्बद्धस्य कथं सम्बन्ध इति पृच्छति ।

तत्रोत्तरमाह ॥ तयोरिति = तयोः द्व्यणुकयोः पार्थिवद्व्यणुकस्य आप्येन परमाणुना यः संयोगजः संयोगः, यश्चाप्यद्व्यणुकस्य पार्थिवपरमाणुना संयोगजः संयोगः ताभ्यां पार्थिवाप्यपरमाणुसंयोगाभ्यां द्व्यणुकयोः परस्परसंयोगः। अत्रापि पूर्वोक्त एव न्यायः कारणसंयोगिना ऽकारणेन संयोगिकार्यमिति। नित्यः संयोग उत वाऽनित्य इति प्रतिपादयति। नास्तीति = संयोगगुणोऽजो नित्यः नास्ति परिमण्डलवत् पृथक् अकथनात्। सर्वज्ञेन महर्षिणा सर्वार्थोपदेशाय प्रवृत्तेन पृथगनभिधानात्। यथा परिमाणरूपगुणं चतुर्धा उत्पाद्यमभिधाय उक्तो यन्नित्यं परिमण्डलमित्येवममुना प्रकारेण अन्यतरकर्मजादिसंयोगमुत्पाद्यं कथयित्वा पृथक् एभ्यः चतुर्भ्यः संयोगेभ्यः पृथक् संयोगं नित्यं ब्रूयात् अभिभाषेत परं न कुत्रापि कणादर्षिरेवम् अब्रवीत् तस्मात् हेतोः संयोगो नित्यो नास्ति। परमाणुभिराकाशादीनामपि नित्यः संयोगो नास्तीत्यत आह ॥ परमाणुभिरिति = आकाशादीनां द्रव्याणां परमाणुभिः प्रदेशवृत्तिः एकदेशे वर्तनमन्यतरकर्मजः। द्वयोर्मध्ये एकस्य निश्चययोरन्यतर उच्यते तस्य कर्मजः संयोगः। यथा च दृष्टान्तः। महतो महत्त्वस्य

मू० = तयोरपि संयोगाभ्यां संयोगाभ्यां सम्भव इति। नास्त्यजः संयोगो नित्यपरिमण्डलवत् पृथगनभिधानात्। यथा चतुर्विधं परिमाणमुत्पाद्यमुक्त्वाह। नित्यं परिमण्डलमित्येवमन्यतरकर्मजादिसंयोगमुत्पाद्यमुक्त्वा पृथक् नित्यं ब्रूयात् न त्वेवमब्रवीत्। तस्मान्नास्त्यजः संयोगः। परमाणुभिराकाशादीनां प्रदेशवृत्तिरन्यतरकर्मजः संयोगः, विभूनां तु परस्परतः संयोगो नास्ति युतसिद्ध्यभावात्। सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं चेति ॥

मूलाग्राऽवयवव्यापिनः एकस्य मूलात् अग्रतस्त्यागात् च, मूले गच्छता पुरुषेण संयोगविभागौ अन्यतरकर्मजौ युगपत्प्रतीयेते तथा व्यापिनोऽप्याकाशस्य परमाणुना सह संयोगविभागौ परमाणुकर्मजौ भवतः, तयोरव्याप्यवृत्तित्वात्। अतो न परमाण्वाकाशसंयोगस्य नित्यता, विभूनां पदार्थानां तु परस्परतः मिथः संयोगो नास्ति युतसिद्ध्यभावात् युतसिद्धेर्न भवनात्। यत्र युतसिद्धिस्तत्रैव संयोगो दृष्टो युतसिद्धिश्चाकाशादिषु नास्ति, अतो व्याप्यकाऽभावात् संयोगोऽपि तेषु न भवति। यथा विभूनां संयोगो नास्ति तथा विभागोऽपि नास्ति। अथ केयं युतसिद्धिरित आह ॥ सेति = नित्यानां युतसिद्धिः द्वयोरन्यतरस्य वा पृथग् गमनम्। अनित्यानां युतसिद्धिः द्वयोरन्यतरस्य वा परस्परपरिहारेण पृथगाश्रयाश्रयित्वमिति। सेयं युतसिद्धिर्द्विधाऽप्याकाशादिषु नास्तीत्यभिप्रायः ॥

कथं संयोगस्य विनाश इत्याह॥ विनाश इति= सर्वस्य संयोगस्य अन्यतरकर्मजस्य उभयकर्मजस्य संयोगजस्यैकार्थसमवेताद्विभागात् ययोर्द्रव्ययोः संयोगो वर्तते तयोः परस्परं विभागादस्य विनाश इति। यद्यपि विभागकाले संयोगो विद्यते एव तथाऽपि तयोः सहभावो न लक्ष्यते विनाशस्य आशुभावात् विभागेन वा तदुपलम्भप्रतिबन्धात्। संयोगस्याश्रयविनाशादपि विनाश इत्यत आह। क्वचिदि= आश्रयविनाशात् संयोगस्य विनाश इति। विभागात् अंश्वोः संयोगविनाशात् तन्तुविनाशे उभयाश्रयस्य तस्यैकाश्रयावस्थाने ऽनुपलम्भादिति। विभागं निर्दिशति॥ विभाग इति= अस्ति तावत् अयम् अस्मात् विभक्त इति प्रत्ययो लौकिकानाम्, न चास्य रूपादयो निमित्तं तत्प्रत्ययविलक्षणत्वात्। अतो यदस्य निमित्तं स विभाग इति। तस्य कार्यं दर्शयति, शब्दविभागहेतुः शब्दविभाग एव कारणम्। यथा वंशदले पाट्यमाने योऽयमाद्यः शब्दः स तावत् गुणान्तरनिमित्तः शब्दत्वात् भेरीदण्डसंयोगजशब्दवत्। तस्य लक्षणं यथा प्राप्तिपूर्विकाऽप्राप्तिः पूर्वं प्राप्तिः विषयितायां याऽप्राप्तिः प्राप्तिविरोधी गुणविशेषः स विभाग इति। तस्य भेदान् कथयति। स चेति= अत्र चशब्दोऽवधारणे त्रिविध एव। अन्यतर

मू= विनाशस्तु संयोगस्य संयोगस्यैकार्थसमवेताद्विभागात्। क्वचिदाश्रयविनाशादपि। कथम्। यदा तन्त्वोः संयोगे सति अन्यतरतन्त्वारम्भके अंशौ कर्मोत्पद्यते तेन कर्मणा अंश्वन्तराद्विभागः क्रियते। विभागाच्च तन्त्वारम्भकसंयोगविनाशः संयोगविनाशात्तन्तुविनाशः तद्विनाशे तदाश्रितस्य तन्त्वन्तरसंयोगस्य विनाश इति॥ विभागो विभक्तप्रत्ययनिमित्तम्। शब्दविभागहेतुः प्राप्तिपूर्विकाऽप्राप्तिर्विभाग इति। स च त्रिविधः। अन्यतरकर्मज उभयकर्मजो विभागजश्च विभाग इति। तत्रान्यतरकर्मजोभयकर्मजौ संयोगवत्।

कर्मज उभयकर्मजः विभागज इति भेदात् त्रिविधो विभागः। तत्र तेषु मध्ये अन्यतरकर्मजोभयकर्मजौ संयोगवत्। यथा क्रियावता निष्क्रियस्य विभागोऽन्यतरकर्मजः। यथा श्येनशैलयोर्विभागः। उभयकर्मजो विभागः विरुद्धदिक्क्रिययोः सन्निपातः। यथा मल्लयोर्मेषयोर्वा विभागः।

तृतीये विभागजभेदमाह ।विभाग इति = विभागजो द्विविधस्तुशब्दे नास्य पूर्वाभ्यांम् अन्यतरकर्मजोभयकर्मजविभागाभ्यां विशेषकथनम् ।
एकः कारणविभागात् कारणयोर्विभागादेको विभागो भवति ।अपरस्तु कारणाकारणयोर्विभागात् इति ।तत्र द्वयोर्मध्ये तावदादौ कार
णविभागाद् विभागः [illegible] निरूप्यते ।कार्याविष्टे कार्येणाविष्टे व्याप्ते अवरुद्ध इत्यर्थः । कारणे कर्मोत्पन्ने कर्मोत्पत्तिः यदा तस्याऽवयव
स्याऽवयवान्तरात् अपराङ्गात् विभागं द्रव्यारम्भकसंयोगविनाशकं विभागं करोति, न तदाकाशादिदेशात्, न तदा द्रव्याऽवरुद्धा
त् आकाशादिदेशात् विभागं करोति ।यदा तु आकाशादिदेशाद्विभागं करोति तदा तस्मिन् काले न अवयवान्तराद्विभागं करोति
इति स्थितिर्नियमः । अत इति = यतः आकाशादिविभागकारणं कर्म अवयवान्तराद्विभागं न करोति इति नियमोऽतोऽवयवान्तविभागा
रम्भकं कर्म अवयवान्तरादेव विभागं करोति नाकाशादिदेशात् ।ततस्तदनन्तरं विभागात् द्रव्यारंभकसंयोगविनाशः, द्रव्यारम्भ
को यः संयोगः तस्य विनाशः ।तस्मिन् संयोगेऽसमवायिकारणे तस्मिन् विनष्टे कारणाऽभावात् कार्याभाव इतिन्यायात् अवय
विविनाशोऽवयविनो विनाशः इति ।तदा द्रव्ये विनष्टे कारणयोर्वर्तमानो विभागः तत्कारणयोरवयवयोर्वर्तमानो विभागः कार्यविना

मू = विभागस्तु द्विविधः कारणविभागात् ।कारणाकारणविभागाच्च ।तत्र कारणविभागात्ता
वत् कार्याविष्टे कारणे कर्मोत्पन्नं यदा तस्याऽवयवान्तराद्विभागं करोति न तदाऽऽ
काशादिदेशात् ।यदा त्वाकाशादिदेशाद्विभागं करोति न तदाऽवयवान्तरादिति स्थितिः ।
अतोऽवयवकर्माऽवयवान्तरादेव विभागमारभते ततो विभागाच्च द्रव्यारम्भकसंयोग
विनाशः, तस्मिन् विनष्टे कारणाऽभावात्कार्याऽभावः इत्यवयविविनाशः, तदा कारण
योर्वर्तमानो विभागः कार्यविनाशविशिष्टं कालं स्वतंत्रं वाऽवयवमपेक्ष्य सक्रियस्यैवा
वयवस्य कार्यसंयुक्तादाकाशादिदेशाद्विभागमारभते ॥

शविशिष्टं कार्यविनाशेन विशिष्टं युक्तं कालं समयं स्वतंत्रं वाऽवयवम् अपेक्ष्यावयवं दृष्ट्वा सक्रियस्यैवाऽवयवस्य क्रियया सह वर्तते इति सक्रि
यः तस्य सक्रियस्य अवयवस्य कार्यसंयुक्तात् कार्यविशिष्टात् आकाशादिदेशात् विभागम् आरभते ।यावत् कार्यद्रव्यं नविनश्यति
तावदवयवस्य स्वातंत्र्यं पृथग्देशगमने योग्यता नास्ति इत्यवयवदेशात् विभागो न घटते तदर्थमुक्तम् ।कार्यविनाश
विशिष्टं कालं स्वतंत्रं वाऽवयवम् अपेक्षते इति ॥

कारणयोर्वर्तमानो विभागः सक्रियस्यैव विभागं करोतीत्यत्र को हेतुरिति चेत् अत आह ॥ न निष्क्रियस्येति। कारणाऽभावात् विभागदि्वभागोत्पत्तौ कर्म अपि निमित्तकारणं तस्याऽभावान्न निष्क्रियस्य क्रियाविरहितस्य विभागः इति। तत्र युक्त्यन्तरमाह। उत्तरसंयोगानुत्पत्तौ अनुपभोग्यत्वप्रसंगः। क्रियाप्राधान्येन उत्तरसंयोगार्थमुपजाता देशान्तरप्राप्तेन द्रव्येण कस्यचित् पुरुषार्थस्य सम्पादनात् तत्र यदि सक्रियस्याऽवयवस्य कार्यसंयुक्तादाकाशादि देशात् विभागो न भवति। तथा पूर्वसंयोगस्य प्रतिबंधकस्य अनिवृत्तेः उत्तरसं-योगाऽनुत्पत्तौ साऽनुपभोग्या निष्प्रयोजना च स्यादिति, तस्मान्निष्क्रियस्य न विभागोऽपि तु सक्रियस्यैव विभाग इत्यर्थः। न तु तदवयवकर्म तदसमवायिकारणविशिष्टकर्म आकाशादिदेशात् विभागं न करोति। तदा तस्मिन् काले आरंभकालाऽतीतत्वात्, तस्य विभागाऽऽरंभकालोऽतीत इति। तस्मात् नाविभागस्योत्पत्तिः। प्रदेशान्तरसंयोगं तु करोत्येव अपरदेशसंयोगं तु करोत्येव। कस्माद् कृतसंयोगस्य कर्मणः कालात्ययाऽभावात्, न कृतः संयोगो येन तथाभूतस्य कृतसंयोगस्य कर्मणः कालस्य संयोगारंभ

मू = न निष्क्रियस्य कारणभावादुत्तरसंयोगानुत्पत्तावनुपभोग्यत्वप्रसंगः न तु तदवयवकर्माकाशादिदेशाद्विभागं करोति तदारम्भकालातीतत्वात्। प्रदे-शान्तरसंयोगं तु करोत्येव अकृतसंयोगस्य कर्मणः कालात्ययाऽभावादिति।

कालस्य अत्ययोऽतिक्रमो न भूतस्तस्य कालस्यात्ययाऽभावात्। तदानीं हि कालोऽयम् अतिक्रान्तः स्यात् यदि कर्मणा प्रदेशान्तरसंयोगः कृतो भवेत् न त्वेवम्, तस्माद कृतसंयोगस्य कर्मणो यः संयोगारंभकालः तस्यात्ययाऽभावात् कर्म संयोगं करोति न विभागं, तेन चेदयं न कृतोऽन्यस्याऽसम्भवात्। असमवायिकारणेन विना च वस्तुनोऽनुत्पादात् एकार्थसमवेतो विभागोऽस्य कारणमित्यवतिष्ठते। इति शब्दः प्रकरणसमाप्तौ।

कारणाकारणद्विभागाद्विभागः कथमित्यत आह। कारणेति= कथमिति प्रश्ने, यदा हस्ते कुतश्चित्कारणात्कर्म उत्पन्नं तस्य हस्तस्यावयवान्तराद्विभागम् अकुर्वत् अपि दधत्। आकाशादिदेशेभ्यो विभागान् आरभ्य प्रदेशान्तरैः सह यदा संयोगान् आरभते, तदा ते कारणाकारणविभागाः, शरीरकारणस्य हस्तस्य अकारणानाम् आकाशादिदेशानां विभागाः भवन्तीति शेषः। कर्म च यस्यां दिशि कार्यारंभाभिमुखं कर्मणा यत्र उत्तर संयोगो जनयितव्यः, तां दिशमपेक्ष्य कार्याकार्यविभागान् हस्ताकार्यस्य शरीरस्याकार्याणाम् आकाशादिदेशानां विभागान् आरभन्ते। यतः कुड्यादि देशात् हस्तस्य विभागः ततः शरीरस्यापि विभागो दृश्यते, न चायं विभागः शरीरक्रियाकार्यः तदानीं शरीरस्य निष्क्रियत्वात्। नापि हस्तक्रियाकार्यो भवितुमर्हति। व्यधिकरणस्य कर्मणो विभागहेतुत्वाऽदर्शनात्। अतः कारणाऽकारणविभागः तस्य कारणमिति कल्प्यते। आकाशादित्यादिपदं समस्तविभुद्रव्याऽवरोधकम्। अत एव विभागान् इति बहुवचनं तद्विभागानां बहुत्वात्। तदनन्तरं तस्माद्विभागजविभागादनन्तरं कारणाऽकारणसंयोगात् शरीरकारणस्य हस्तस्याकारणानाम् आकाशदिदेशानां संयोगात् कर्मजात् हस्तकार्यस्य शरीरस्य निष्क्रियस्य अकार्याणामाकाशादिदेशानां संयोगान् आरभन्ते। न हस्तक्रिया

मू= कारणाकारणविभागादपि कथम्। यदा हस्ते कर्मोत्पन्नमवयवान्तराद्विभागमकुर्वदाकाशादिदेशेभ्यो विभागानारभ्य प्रदेशान्तरे संयोगानारभते, तदा ते कारणाकारणविभागाः। कर्म यां दिशं प्रति कार्यारम्भाभिमुखं तामपेक्ष्य कार्याकार्यविभागानारभन्ते तदनन्तरं कारणाकारणसंयोगाच्च कार्याकार्यसंयोगानिति। यदि कारणविभागानन्तरं कार्यविभागोत्पत्तिः। कारणसंयोगानन्तरं कार्यसंयोगोत्पत्तिः॥ नन्वेवमवयवावयविनोर्युतसिद्धिदोषप्रसंग इति न; युतसिद्ध्यपरिज्ञानात्॥

तस्याः स्वाश्रयस्य देशान्तरप्राप्तिहेतुत्वात् इतिशब्दः क्रमसमाप्तौ। यदि चेत् कारणविभागानन्तरं कारणस्य हस्तस्य विभागानन्तरं यदि कार्यस्य शरीरस्य विभागस्तथा कारणस्य संयोगाऽनन्तरं कार्यस्य संयोगोत्पत्तिः। नन्विति। नन्वित्याशंकायाम् एवं सति अवयवाऽवयविनोः युतसिद्धिः परस्परं स्वातंत्र्यं स्यात्। यथा यदि हस्ताश्रितं शरीरं तदा हस्ते गच्छति तदपि सहैव गच्छेत्। तथा सति च संयोगविभागक्रमो न स्यात् क्रमेण चैतयोः संयोगविभागौ न, तदा हस्तगमने शरीरस्य गमनमिति तस्य स्वातंत्र्यप्रसक्तिरिति। युतसिद्धिस्तां परिहरति इति न कुतः, युतसिद्ध्यपरिज्ञानात् युतसिद्धेः अपरिज्ञानात्। यादृशी युतसिद्धेर्व्यक्तिः तादृशी त्वया नावबुद्धेत्यर्थः॥

कीदृशी तस्याः युतसिद्धेर्लक्षणम् ॥ सेति सा युतसिद्धि द्वयोरेकस्य वा, परस्पर संयोगविभागहेतुभूत कर्मसमवाययोग्यता युतसिद्धिः। द्वयोः परमाण्वोः पृथग् गमन माकाशपरमाण्वोश्च अन्यतरस्य पृथग् गमनं च द्वये तु नित्यानाम्। अनित्यानां तु युतेषु आश्रयेषु समवायो युतसिद्धिः। द्वयोः अन्यतरस्य वा परस्परपरिहारेण अन्यत्राश्रये समवायो युतसिद्धि रनित्यानां द्वयोः पृथगाश्रयाश्रयित्वे समवायः शङ्न्याकाशयोश्चान्यतरस्य शङ्कनेः पृथगाश्रयाश्रयित्वम्। अनित्यानामपि पृथग्गमनमेव युतसिद्धिः किं नोच्यते तदाह। त्वगिन्द्रियेति = अनित्यानां पृथग्गमनं युतसिद्धिर्नोच्यते यतस्त्वगिन्द्रियशरीरयोः पृथग् गतिमत्वं नास्ति, शरीरात् पृथक् त्वगिन्द्रियमुपलभ्येत। त्वगिन्द्रियात् पृथक् शरीरं वाऽधिगम्येत इति न कुत्रापि लोके लेभ्यते इतिभावः। युतेषु आश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः तस्मादनित्यानां पृथग् गमनं युतसिद्धिरित्यर्थः। अण्वाकाशयोः कथं संयोगविभागौ इष्यते आह ॥ अण्विति = अणूनामाकाशस्य चाश्रयान्तराऽभावेऽपि "अन्यः आश्रयः आश्रयान्तरं तस्याभावः तस्मिन् सत्यपि अन्यतरस्यैकस्य पृथग् गतिमत्वात् संयोगविभागौ अर्थात् अण्वाकाशयोः संयोगो विभागश्च सिद्धौ इति। तन्तुपटयोरिति॥ अनित्ययोः विनश्वरयोः तंतुपटयोः आश्रयान्तराऽभावात् अपराश्रयरहितत्वात्

मू॰= सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्वमियं तु नित्यानाम्। अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिरिति। त्वगिन्द्रियशरीरयोः पृथग्गतिमत्वं नास्ति युतेष्वाश्रयेषु समवायोऽस्तीति परस्परेण संयोगः सिद्धः। अण्वाकाशयोस्त्वाश्रयान्तराऽभावेऽप्यन्यतरस्य पृथग्गतिमत्वात् संयोगविभागौ सिद्धौ। तन्तुपटयोरनित्ययोराश्रयान्तराभावात् परस्परतः संयोगविभागाऽभाव इति। दिगादीनां तु पृथग्गतिमत्वाऽभावात् इति परस्परेण संयोगविभागाऽभावः इति॥

परस्परतः संयोगविभागाऽभावः इति। दिगादीनां तु दिक् आदिर्येषु ते दिगादयः, तेषां दिगादीनां पृथग् गतिमत्वात् दिगादिषु पृथग्गतिमत्वं नास्ति, तस्मात् पृथग् गतिमत्वाऽभावात् परस्परेण मिथः संयोगविभागाऽभाव इति। एतावता संदर्भेण एतदुपपादितम्। हस्ते चलति शरीरं न चलति, एतावता न युतसिद्धिः; यदि हस्तशरीरयोः पृथगाश्रयाश्रितं स्यात् तदा भवेदनयोः युतसिद्धता, तन्नास्ति शरीरस्य हस्ते समवेतत्वात्।

संयोगविभागयोः कथं क्षणिकत्वम् । विनाश इति = सर्वस्य विभागस्य कर्मजस्य, विभागजस्य, कारणकृतेः, कारणाकारणकृतेश्च, विभागस्य सर्वस्य विनाशः प्रणश्यता सिद्धा । कुतः क्षणिकत्वात् क्षणिकवृत्तित्वाविशेषात् आशुतरविनाशित्वादित्यर्थः । किं नाम क्षणिक मित्युच्यते, उत्तरसंयोगावधिसद्भावात् क्षणिक इति । उत्तरसंयोगोऽवधिः सीमा यस्य, तस्य सद्भावात् क्षणिको विभाग इति । न तु इति यथोरेव विभागः तयोरेव संयोगाद्विनाश इति संयोगवत् न भवति । यथा संयोगः स्वाश्रययोरेव परस्परविभागाद्विनश्यति, नैवं विभागः, स्वाश्रययोरेव परस्परसंयोगाद्विनश्यति, किन्तु स्वाश्रयस्य अन्येनापि संयोगात् । तथाहि द्वितन्तुस्य मूले पृथुत्वेन विभागः तयोः परस्परसंयोगात् विनश्यति पृथुत्वस्य प्रदेशान्तरसंयोगाद्वा, कस्मादिति हेतौ संयुक्तप्रत्ययवद्विभक्तप्रत्ययानुवृत्त्यभावात् । संयुक्तप्रत्यय इव विभक्तप्रत्ययेऽनुवृत्तिर्नास्ति तस्मात् । यथा संयुक्तप्रत्ययश्चिरमनुवर्तते, नैवं स्वाश्रयस्य देशान्तरसंयोगे भूते विभक्तप्रत्ययस्यानुवृत्तिः अनुवर्तनम् अस्ति, तस्या अनुवृत्तेः अभावस्तस्मात् । अतस्तस्य संयोगमात्रेणैव निवृत्तिः, तस्मा

मू= विनाशस्तु सर्वस्य विभागस्य क्षणिकत्वात् । उत्तरसंयोगावधिसद्भावात् क्षणिक इति ।
न तु संयोगवद् यथोरेव विभागस्तयोरेव संयोगाद्विनाशो भवति कस्मात् । संयुक्तप्रत्य
यवद्विभक्तप्रत्ययानुवृत्त्यभावात् । तस्मादुत्तरसंयोगावधिसद्भावात् क्षणिक इति ।
क्वचिदाश्रयविनाशादेव विनश्यतीति कथम् । यदा द्वितन्तुककारणावयवे अंशौ क
र्मोत्पन्नम् अंश्वन्तराद्विभागमारभते तदैव तन्त्वन्तरेऽपि कर्मोत्पद्यते विभागाच्च तन्त्वा
रम्भकसंयोगविनाशः तन्तुकर्मणा तन्त्वन्तराद्विभागः क्रियते इत्येकः कालः । ततो
यस्मिन्नेव काले विभागात्तन्तुसंयोगविनाशः । तस्मिन्नेव काले संयोगविनाशात् तन्तु-
विनाशस्तस्मिन् विनष्टे तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति ।

दुत्तरसंयोगावधिसद्भावात् क्षणिक इति । क्वचिदाश्रयविनाशाद्विनाश इत्यत आह । क्वचिदिति = द्वितन्तुककारणावयवे द्वितन्तुककारणस्य तंतोः अवयवे अंश्वन्तराद्विभागं अंश्वन्तरस्यांशोर्विभागम् । तस्मिन् एव काले तदानीं संयोगविनाशात् । तस्मिन् विनष्टे तस्मिन् तंतौ विनाशे सति तदाश्रितस्य तन्त्वन्तरविभागस्य विनाश इति । तदाश्रयविनाशः कारणमन्यस्य विनाशहेतोः अभावात् ।

अत्र पुनः प्रसक्तिश्चेत्त एवं तर्हीति = एवमित्थं प्रकारेण तर्हि तदा द्वितन्तुकविनाशसमकालमेव तन्तुविभागस्य विनाशः उत्तरविभागः सक्रियस्य तन्तोः आकाशादिदेशेन समं विभागजविभागो न जायते। यदा उत्तरविभागस्य तन्त्वाकाशविभागस्याऽनुपपत्तिप्रसंग इति। कारणविभागाऽभावात् कारणविभागस्य तं त्वन्तरविभागस्य अभावात्। यदि उत्तरो विभागो न संवृत्तः ततः किम् तत्राह। ततः उत्तरविभागजन्यत्वात् प्रदेशान्तरसंयोगवति अपरदेशसंयोगवति द्वयोः संयोगाऽभावः प्रदेशान्तरेण सह संयोगो न भवति, अतोऽस्मात् कारणात् विरोधिगुणाऽसम्भवात् विरोधिनो गुणस्योत्तरसंयोगाऽसम्भवः उत्तरसंयोगाऽभावः तस्मात्। कर्मणः चिरकालाऽवस्थायित्वं कालान्तराऽवस्थायित्वं स्यात्। यावदाश्रयविनोशस्य विनाशहेतुः न पतति, नित्यद्रव्यसमवेतस्य च नित्यत्वमिति दोषः॥

मू = एवं तर्हि उत्तरविभागाऽनुत्पत्तिप्रसंगः, कारणविभागाऽभावात्। ततः प्रदेशान्तरसंयोगवति संयोगाभाव इत्यतो विरोधिगुणाऽसम्भवात्। कर्मणश्चिरकालावस्थायित्वं नित्यद्रव्यसमवेतस्य च नित्यत्वमिति दोषः। कथम्। यदाऽप्यद्व्यणुकारम्भपरमाणौ कर्मोत्पन्नमवयवान्तराद्विभागं करोतीति, तदैवाण्वन्तरेऽपि कर्म, ततो यस्मिन्नेव काले विभागाद्द्व्यणुकारम्भकसंयोगविनाशः। तदैवाण्वन्तरकर्मणा द्व्यणुकाण्वोर्विभागः क्रियते ततो यस्मिन्नेव काले विभागात् द्व्यणुकाणसंयोगस्य विनाशः तस्मिन्नेव काले संयोगविनाशात् द्व्यणुकस्य विनाशः। तस्मिन् विनष्टे तदाश्रितस्य द्व्यणुकाणुविभागस्य विनाशः। ततश्च विरोधिगुणाऽसम्भवात् नित्यद्रव्यसमवेतकर्मणो नित्यत्वमिति।

कथं तदित्यत्राह = कथमिति = कथमिति प्रश्ने पूर्वं सुगमम् भाष्यम्। ततश्च इति = ततो विभागस्य कारणस्य अभावात् परमाणोः आकाशादेशविभागाऽनुत्पादे पूर्वसंयोगाऽनिवृत्तौ उत्तरसंयोगस्य विरोधिगुणस्य विनाशहेतोः असम्भवात्। नित्यद्रव्यसमवेतकर्मणो नित्यपरमाणुसमवेतस्य कर्मणो नित्यत्वमिति स्यात्॥

पूर्वोक्तं तावत्परिहरति ॥ तन्त्वंश्वन्तरेति = आश्रयविनाशात् तन्त्वोरेव विभागो विनष्टः । तत्त्वंशवन्तरविभागः नु अवस्थितः इति । एतस्मादिति । यथा कर्मजात् अंगुल्याकाशविभागात् शरीराकाशविभागः । एवं कर्मजात् अंशुतन्तुविभागात् तन्त्वाकाशविभागः इत्युदाहरणार्थः । तस्मिन् एव काले तन्त्वाकाशविभागे जाते पूर्वसंयोगस्य प्रतिबन्धकस्य निवृत्तौ कर्म तन्तुसमवेतं कर्म उत्तरसंयोगं कृत्वा ततो विनश्यतीत्यदोषः । प्रकारान्तरेणाश्रयविनाशाद्विनाशं कथयति । अथवेति = तस्मिन्नेव तन्तौ विभज्यमानाऽवयवे कर्म उत्पद्यते । तन्त्वारम्भसंयोगविनाशः तन्त्वारम्भकस्य अंशुसंयोगस्य विनाशः । तत्त्वन्तराद्विभागः । तन्तुकर्मणा च तस्य तन्तोस्तन्त्वन्तराद्विभाग इत्येकः कालः । ततस्तदनन्तरं संयोगविनाशात् तन्तुविनाशः तदारब्धस्य तन्तोर्विनाशः । पूर्वोक्तेन विधानेनेति = तन्त्वारम्भकांशौ कर्मोत्पत्तिसमकाले वीरणे कर्म, ततोंऽशुक्रियया अंशवन्तराद्विभागः, वीरणकर्मणा च तस्य विभज्यमानाऽवयवेन तन्तुनाऽऽकाशदेशेन च समं विभागः क्रियते । ततोंऽशुविभागात् अंशुसंयोगविनाशो वीरणविभागाच्च तन्तुवी-

मू:= तं त्वंशवन्तरविभागाद्विभागः इत्यदोषः । आश्रयविनाशात्तन्त्वोरेव विभागो विनष्टो न तत्त्वंशवन्तरविभाग इति एतस्मादुत्तरो विभागो जायते । अंगुल्याकाशविभागाच्छरीराकाशविभागवत् तस्मिन्नेव काले कर्म संयोगं कृत्वा विनश्यतीत्यदोषः । अथवा अंशवन्तरविभागोत्पत्तिसमकालं तस्मिन्नेव तन्तौ कर्मोत्पद्यते ततोंऽशवन्तरविभागात् तन्त्वारम्भकसंयोगविनाशः तन्तुकर्मणा च तत्त्वन्तराद्विभागः क्रियत इत्येकः कालः । ततः संयोगविनाशात् तन्तुविनाशः तद्विनाशाच्च तदाश्रितयोर्विभागकर्मणोर्युगपद्विनाशः । तन्तुवीरणयोर्वा संयोगे सति द्रव्याऽनुत्पत्तौ पूर्वोक्तेन विधानेनाश्रयविनाशसंयोगाभ्यां तन्तुवीरणविभागविनाश इति ॥

रणसंयोगस्य आकाशवीरणसंयोगस्य च विनाशः । ततोंऽशुसंयोगविनाशात् तन्तुविनाशः । वीरणस्य च उत्तरसंयोगः, अतः उत्तरसंयोगाश्रयविनाशाभ्यां तन्तुवीरणविभागविनाशः तन्तुवीरणविभागस्य विनाश इति । विभागनिरूपणम् ।

परत्वापरत्वे निरूपयति = परत्वमिति = पराभिधानप्रत्ययनिमित्तम्। एतत्परमेतस्मादहमिति निश्चयनिमित्ते परत्वम्। अपर त्वाभिधानप्रत्ययनिमित्तम् अपरत्वम्। तत् परत्वमपरत्वं च द्विविधं द्विप्रकारकम् इति दिक्कृतं कालकृतमिति भेदात्। दिक्पिण्डसंयो गकृतं दिक्कृतम्। कालपिण्डसंयोगकृतं कालकृतम्। दिक्कृतं परत्वं देशविप्रकृष्टत्वं प्रत्याययति। अपरत्वं दिक्कृतं देशसंनिकृष्टत्वं च। काल कृतं परत्वं पिण्डस्य कालविप्रकृष्टत्वं प्रतिपादयति, कालकृतमपरत्वं कालकृतसंनिकृष्टत्वं प्रतिपादयति। यथा च "एकदिक्का भ्यामेककालाभ्यां संनिकृष्टविप्रकृष्टाभ्यां परमपरं च"॥ वै. ७.२.२१ दिक्कृतोत्पत्तिं ब्रूते ॥ तत्रेति = तत्र तयोर्दिक्कृत कालकृतयोर्मध्ये दिक्कृतस्योत्पत्तिरभिधीयते। कथमिति प्रश्ने। एकस्य द्रष्टुः संयुक्तसंयोगबहुत्वाभावे संयुक्तेन भूप्रदेशेन सह अपरत्वा प्रदेशस्य संयोगः, तेनापि सममपरस्येति संयुक्तसंयोगानां बहुत्वे सति अल्पसंयोगवत्त्वं पिण्डे संनिकृष्टम् इति, संयोगभूयस्त्व ति अभिप्रायः, परत्वाधारे परत्वस्याधारे, ततो विप्रकृष्टबुद्ध्युत्पत्त्यनन्तरं तां विप्रकृष्टां बुद्धिम् अपेक्ष्य द्रष्टा परेण संयोगभूयस्त्ववता

मू = परत्वमपरत्वं च परापराभिधानप्रत्ययनिमित्तम्। तत्तु द्विविधम् दिक्कृतं कालकृतं च।
तत्र दिक्कृतं दिग्विशेषप्रत्यायकम्। कालकृतं च वयोभेदप्रत्यायकम्। तत्र दिक्कृतस्यो
त्पत्तिरभिधीयते। कथम्। एकस्यां दिश्यवस्थितयोः पिण्डयोः संयुक्तसंयोगबहुत्वाल्प-
भावे सत्येकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वा एतस्माद् विप्रकृष्टोऽयमिति परत्वाधारे
संनिकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्य परेण दिक्प्रदेशेन संयोगात् परत्वस्योत्प
त्तिः। तथा विप्रकृष्टं चावधिं कृत्वा एतस्मात् संनिकृष्टोऽयमित्यपरत्वाधारे इतर-
स्मिन् संनिकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्यो
त्पत्तिः।

दिक्प्रदेशेन संयोगात् असमवायिकारणाद्विप्रकृष्टे पिण्डे समवायिकारणभूते परत्वस्योत्पत्तिरिति। पूर्वोत्तरदिग्व्यवस्थितयोः पिण्ड योः परापरप्रत्ययौ न भवतः, तदर्थमेकस्यां दिश्यवस्थितयोरित्युक्तम्। दिक्कृतापरत्वं निरूपयति ॥ तथेति = द्रष्टुः स्वशरीरापेक्षया संयु क्तसंयोगभूयस्त्ववत्त्वं विप्रकृष्टम्। इतरस्मिन् संयुक्तसंयोगाल्पीयस्त्ववति। तां संनिकृष्टां बुद्धिमपेक्ष्य निमित्तकारणीकृत्य अप रेण संयुक्तसंयोगाल्पीयस्त्वविशिष्टेन दिक्प्रदेशेन सह संयोगात् असमवायिकारणात् संनिकृष्टे पिण्डे समवायिकारणे अपर त्वस्य उत्पत्तिः आविर्भावः जन्मेति [illegible] ॥

प्रश० भा०
भाष्य०
८९

कालकृतपरत्वं प्रकाशते। कालकृतयोरिति = दिक्कृते परापरत्वे व्याख्याय अधुना कालकृते परत्वे प्रकाशयति। कथमिति प्रश्ने, रूढश्मश्रु कार्कश्यवलिपलितादिसंनिधौ रूढश्मश्रु च कार्कश्यञ्च वलिश्च पलितञ्च तेषां कालविप्रकर्षलिङ्गानां संनिधौ। परेण कालप्रदेशेन परेण आदित्यपरिवर्तनभूयस्त्ववता कालप्रदेशेन संयोगात् असमवायिकारणात् परत्वस्योत्पत्तिः। तस्मिन्नेव स्थविरे द्वयोरेकस्मिन् वा पिण्डेऽविद्यमाने परत्वापरत्वे न भवतः तदर्थं वर्तमानकालयोरित्युक्तम्। कालकृतापरत्वं वर्ण्यते॥ स्थविरमिति = अपरेणाल्पादित्यपरिवर्तनोपलक्षितेन कालप्रदेशेन संयोगात् कालसंयोगात् अपरत्वस्य गुणस्योत्पत्तिः जन्म। तथा च सूत्रम् "कारणपरत्वात् कारणापरत्वाच्च" वै० सू० ७।२।२२ परत्वापरत्वयोः कथं विनाशः इत्याह॥ विनाश इति = परत्वापरत्वयोर्विनाशोऽपेक्षाबुद्धिविनाशात्। संयोगविनाशात् संयोगस्य विनाशात्। द्रव्यविनाशात् द्रव्यस्य वस्तुनः विनाशात्। द्रव्यापेक्षाबुद्ध्योर्विनाशात्। संयोगापेक्षाबुद्ध्योर्विनाशात्। अपेक्षाबुद्धिसंयोगद्रव्याणां विनाशात् इति सप्तविधो विनाशक्रमः। अपेक्षाबुद्धिविनाशात् कथं विनाश इत्युच्यते॥ अपेक्षातस्तावदेव अपेक्षाबुद्धेर्विनाशाद् गुणनाशः कथ्यते। सामान्यबुद्धिः सामान्ये परत्वे सामान्यबुद्धिः तत इति एतस्मिन्नेव काले तत इत्यत्र सप्तम्यर्थे ...

मू = कालकृतयोरपि कथम्। वर्तमानकालयोरनियतदिग्देशसंयुक्तयोः युवस्थविरयोः रूढश्मश्रुकार्कश्यवलिपलितादिसंनिधौ सत्येकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थविरे विप्रकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्य परेण कालप्रदेशेन संयोगात्परत्वस्योत्पत्तिः। स्थविरं चावधिं कृत्वा यूनि संनिकृष्टा बुद्धिरुत्पद्यते। ततस्तामपेक्ष्यापरेण कालप्रदेशेन संयोगादपरत्वस्योत्पत्तिरिति। विनाशस्त्वपेक्षाबुद्धिसंयोगद्रव्यविनाशात्। अपेक्षाबुद्धिविनाशात्तावदुत्पन्ने परत्वे यस्मिन् काले सामान्यबुद्धिरुत्पन्ना भवति, ततोऽपेक्षाबुद्धेर्विनश्यत्ता, सामान्यज्ञानतत्सम्बन्धेभ्यः परत्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः। ततोऽपेक्षाबुद्धेर्विनाशो गुणबुद्धेश्चोत्पत्तिः ततोऽपेक्षाबुद्धिविनाशात् गुणस्य विनश्यत्ता गुणज्ञानतत्सम्बन्धेभ्यो द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः। ततो द्रव्यबुद्धेरुत्पत्तिर्गुणस्य विनाश इति।

कस्मिन्निति तस्मिन्। विनश्यत्ता विनाशकारणसंनिधानम्। सामान्यज्ञानतत्सम्बन्धेभ्यः। परत्वसामान्यञ्च परत्वसामान्यज्ञानञ्च परत्वगुणसम्बन्धश्च तेभ्यः। परत्वसामान्यमेवापेक्षाबुद्धिविनाशकारणम् गुणबुद्धेश्चोत्पत्तिकारणम्। अतस्तदुत्पादात् तत्रापेक्षाबुद्धेर्विनश्यत्ता गुणबुद्धेश्चोत्पद्यमानता स्यात्। ततः क्षणान्तरे। गुणबुद्धेश्चोत्पत्तिः परत्वगुणबुद्धेश्चोत्पादः। गुणज्ञानतत्सम्बन्धेभ्यः, गुणश्च गुणज्ञानं च तत्सम्बन्धश्च तेभ्यः। ततो द्रव्यबुद्धेः परत्वविशिष्टद्रव्यबुद्धेरुत्पादः गुणस्य विनाशः, परत्वगुणस्य विनाश इति॥

संयोगविनाशादपि कथं परत्वापरत्वयोर्विनाश इति। संयोगविनाशादिति = द्विकपिण्डविभागः दिशः परत्वाधारपिण्डस्य च विभागः, द्विपिण्ड
विभागः। ततः उभयत्र परत्वे। दिक्पिण्डसंयोगस्य विभागाद्विनाश इति। द्रव्यविनाशादपि कथं विनाश इत्यत आह। द्रव्येति = परत्वाधाराऽ
वयवे भाविनः परत्वस्याधारो द्रव्यं तस्याऽवयवे। तस्मिन्नेव कालेऽपेक्षाबुद्धेः परत्वमुत्पद्यते। द्रव्याऽपेक्षाबुद्ध्योर्युगपद्विनाशादपि
कथं परत्वापरत्वयोः विनाश उत्पद्यते। द्रव्याऽपेक्षेति = "अनेकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते। यदा परत्वापरत्वाधारवति अङ्गे

मू = संयोगविनाशादपि कथम्। अपेक्षाबुद्धिसमकालमेव परत्वाऽपरत्वाधारे कर्मोत्पद्यते।
तेन कर्मणा द्विपिण्डविभागः क्रियते। अपेक्षाबुद्धितः परत्वस्योत्पत्तिरित्येकः कालः। ततः
सामान्यबुद्धेरुत्पत्तिः द्विपिण्डसंयोगस्य च विनाशः ततो यस्मिन् काले गुणबुद्धिरु
त्पद्यते तस्मिन्नेव काले दिक्पिण्डसंयोगविनाशाद्गुणस्य विनाश इति। द्रव्यविनाशादपि
कथम्। परत्वाधाराऽवयवे कर्मोत्पन्नं यस्मिन्नेव कालेऽवयवान्तराद्विभागं करोति। त
स्मिन्नेव कालेऽपेक्षाबुद्धिरुत्पद्यते ततो विभागाद् यस्मिन्नेव काले संयोगविनाशः तस्मि
न्नेव काले परत्वमुत्पद्यते ततः संयोगविनाशाद्द्रव्यविनाशः। तद्विनाशाच्च तदाश्रितस्य
गुणस्य विनाश इति। द्रव्याऽपेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्। यदा परत्वाधारावय
वे कर्मोत्पद्यते। तदैवाऽपेक्षाबुद्धिरुत्पद्यते कर्मणा चाऽवयवान्तराद्विभागः क्रियते परत्व
स्योत्पत्तिरित्येकः कालः। ततो यस्मिन्नेव कालेऽवयवविभागाद्द्रव्यारम्भकसंयोगविनाश
स्तस्मिन्नेव काले सामान्यबुद्धिरुत्पद्यते तदनन्तरं संयोगविनाशाद्द्रव्यविनाशः सामा-
न्यबुद्धेश्चापेक्षाबुद्धिविनाश इत्येकः कालः। ततो द्रव्याऽपेक्षाबुद्ध्योर्विनाशात्परत्वस्य
विनाशः॥

कर्म उत्पद्यते, तदा सामान्यबुद्धिरुत्पद्यते। परत्वसामान्यज्ञानम् उत्पद्यते। इह चा-न्तरविशेषाऽनवधारणात् उभयोः अपि
विनाशं प्रति कारणत्वम्"

९०

द्रव्यसंयोग० ~~इति~~ विनाशादपि परत्वाऽपरत्वयोः कथं विनाश इत्यत आह। द्रव्यसंयोगेति= अपेक्षाबुद्धिविनाशस्तु न कारणम्। तदा
नीम् एव सामान्यबुद्धेस्तस्य समभवात्। संयोगाऽपेक्षाबुद्ध्योर्युगपद्विनाशादपि कथं परत्वाऽपरत्वयोर्विनाश इत्यत आह॥ संयोगाऽ
पेक्षेति= परत्वस्याधारे। परत्वस्य विनाशः। द्रव्यविनाशस्तु तदानीं नास्त्येवेति न तस्य हेतुत्वम्। सुगममन्यत्। अपेक्षाबुद्धिसंयो
गद्रव्याणां विनाशादपि परत्वाऽपरत्वयोर्विनाशः॥ त्रयाणामिति= त्रयाणां समवाय्यसमवायिनिमित्तकारणानां क्षणवाचि चास्य

मू= द्रव्यसंयोगविनाशादपि कथम्। यदा परत्वाधाराऽवयवे कर्मोत्पन्नमवयवा
न्तराद्विभागं करोति। तस्मिन्नेव काले पिण्डकर्मोऽपेक्षाबुद्ध्योर्युगपदुत्पत्तिः। ततो यस्मि
न्नेव काले परत्वस्योत्पत्तिस्तस्मिन्नेव काले विभागाद्द्रव्यारम्भकसंयोगविनाशः पिण्ड
कर्मणा दिक्पिण्डस्य च विभागः क्रियते इत्येकः कालः। ततो यस्मिन्नेव काले सामान्य
बुद्धिरुत्पद्यते तस्मिन्नेव काले द्रव्यारम्भकसंयोगविनाशात्पिण्डविनाशः पिण्डवि
नाशाच्च पिण्डसंयोगविनाशः ततो गुणबुद्धिसमकालं दिक्पिण्डसंयोगविनाशात्परत्वस्य वि
नाश इति। संयोगाऽपेक्षाबुद्ध्योर्युगपद्विनाशादपि कथम्। यदा परत्वमुत्पद्यते तदा परत्वा
धारे कर्म, ततो यस्मिन्नेव काले परत्वसामान्यबुद्धिरुत्पद्यते। तस्मिन्नेव काले पिण्डकर्मणा
दिक्पिण्डविभागः क्रियते ततः सामान्यबुद्धितोऽपेक्षाबुद्धिविनाशो विभागाच्च दिक्पिण्ड
संयोगविनाशः इत्येकः कालः। ततः संयोगाऽपेक्षाबुद्धिविनाशात् परत्वस्य विनाशः॥
त्रयाणां समवाय्यसमवायिनिमित्तकारणानां युगपद्विनाशादपि कथम्। यदाऽपेक्षाबु
द्धिरुत्पद्यते, तदा पिण्डाऽवयवे कर्म, ततो यस्मिन्नेव काले कर्मणाऽवयवान्तराद्वि
भागः क्रियतेऽपेक्षाबुद्धेः परत्वस्य चोत्पत्तिस्तस्मिन्नेव काले पिण्डेऽपि कर्म।

ततोऽवयवविभागात् पिण्डारम्भकसंयोगविनाशः। पिण्डकर्मणा च दिक्पिण्डविभागः क्रियते सामान्यबुद्धेश्चोत्पत्तिरित्येकः कालः। ततः संयोगविनाशात् पिण्डविनाशः विभागाच्च दिक्पिण्डसंयोगविनाशः सामान्यज्ञानादपेक्षाबुद्धेर्विनाश इत्येतत्सर्वं युगपत् त्रयाणां समवाय्यसमवायिनिमित्तकारणानां विनाशात् परत्वस्य विनाश इति।

असमवायि च निमित्तञ्च समवाय्यसमवायिनिमित्तानि तानि च कारणानीति समवाय्यसमवायिनिमित्तकारणानि द्रव्यसंयोगापेक्षाज्ञानानि तेषां त्रयाणां युगपद्विनाशात् कथं परत्वस्य विनाश इति। इत्येतत्सर्वं युगपद्भवति कारणयौगपद्यात्। ततश्च त्रयाणां समवाय्यसमवायिनिमित्तकारणानां विनाशात् परत्वस्य विनाश इति। परत्वस्य विनाश इत्युपलक्षणमिदम्। अपरत्वस्य अपि अयमेव विनाशक्रमः अवलोकनीय इति। इतिशब्दः परत्वापरत्वप्रकरणसमाप्तौ प्रयुक्त इति ॥

श्रीः

श्रीः श्रीः श्रीः श्रीः

अथ बोधे बुद्धिरित्याह। बुद्धिरिति = बुद्धिः प्रधानस्य विकारो महदाख्यम् अन्तःकरणं चित्ताऽपरपर्यायम्। यद्वा बुद्धिर्बोध इति। यस्मिन् सति मनः प्रसन्नमात्मनि बुध्ये बोधयामि न जाने चेति व्यवहारः प्रवर्तते सा बुद्धिरिति भावः। यथा च "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" न्या० द० १अ० १आ० १५सू० इत्यत्र बुद्धेर्ज्ञानपर्यायत्वकथनेन सांख्यमतनिरासः। तन्मते बुद्धेरन्तःकरणधर्मत्वम्। मनोऽभिन्नेऽन्तःकरणे मानाऽभावः। ज्ञानेन्द्रियप्रणालिकया बाह्यविषयोपरक्तायाः तदाकारोपपन्नः इव तौ सत्त्वगुणप्रधाना वृत्तिर्ज्ञानम्। ज्ञानं बुद्धिरिति यावत्। प्राप्तविषयाकारोपरागायां बुद्धौ प्रतिबिम्बितायाः चेतनाशक्तेः तद्वृत्त्यनुकारः उपलब्धिः। यद्वा प्रमाणान्तरमाने द्विप्रवृत्तिरुपलब्धिः। उपलब्धिरुपलम्भ इति यावत्। बुद्धेर्विषयः सुखाद्याकारः प्रत्ययः यस्याः बुद्धेः अभीवर्थाः पर्यायशब्दाः सा बुद्धिः। बुद्धेर्भेदं निरूपयति ॥सेति = सा बुद्धिरनेकप्रकाराऽनेकभेदवती कुतः। अर्थानन्त्यात्। अन्ते भवोऽन्त्यः न अन्त्यः अनन्त्यः अर्थानामनन्त्यः अर्थानन्त्यः तस्मात् अर्थानन्त्यात् प्रत्येकपदस्यार्थ

मू = बुद्धिरुपलब्धिर्ज्ञानं प्रत्ययः इति पर्यायाः। सा चाऽनेकप्रकाराऽर्थानन्त्यात् प्रत्यर्थनियतत्वाच्च। तस्याः सत्यप्यनेकविधत्वे समासतो द्विविधे विद्या चाऽविद्या चेति।

र्थबाहुल्यादिति यावत्। द्वितीयो हेत्वर्थः, प्रत्यर्थनियतत्वात्। अर्थं अर्थं प्रति इति प्रत्यर्थं तत्र नियतत्वं प्रत्यर्थनियतत्वं तस्मात् प्रत्यर्थनियतत्वात्। यद्वा प्रत्यर्थं प्रतिविषयम् अस्मदादिबुद्धयो नियताः। अर्थाश्च अनन्ता इति प्रत्येकं तत्र बुद्धयोऽप्यनन्ताः। यदि क्वचिदनेकविषयमेकं विज्ञानं तदपि तावदर्थनियतत्वात् अतर्थो द्विज्ञानान्तरादि लक्षणमेवेत्यदोष इति॥ बुद्धेर्विषयभेदेन सत्यपि भेदे संक्षेपतो द्वैविध्यमाह ॥तस्या इति = तस्याः बुद्धेरित्यर्थः विषयभेदेन अनेकविधत्वे अनेकप्रकारके सति अपि समासतः संक्षेपतः द्विविधे द्विप्रकारके "विद्या च अविद्या च। तत्र निःसंदिग्धाऽबाधिताध्यवसायात्मिकाः प्रतीतिर्विद्या, यथा च सूत्रम् 'अदुष्टं विद्या" वै० द० ९।२।१२ उपलब्धिर्विद्या। विद्यायां यथा उदकं तडागे सत् आत्मस्मिन् तदिति अभिचारिज्ञानम् अविद्या" यद्वाऽनुपलब्धिः अविद्या, यथा च उदकं च मरुमरीचिकायाम् असत्। यथा च सूत्रम् "तद् दुष्टज्ञानम्" वै० द० ९।२।११सूत्रम्।

अत्र प्रतिपादनमात्रस्य विवक्षितत्वात् पश्चादुद्दिष्टामपि अविद्यां प्रथमं कथयति ॥ तत्रेति = तत्र तयोर्विद्याऽविद्ययोर्मध्ये ऽविद्या चतुर्विधा चतुःप्रकारा, संशयविपर्ययानध्यवसायस्वप्नलक्षणभेदात्। "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" संशयलक्षणा १ विपर्ययलक्षणा २ अनध्यवसायलक्षणा ३ स्वप्नलक्षणा च ४ यथा द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायात्। यथा च सूत्रम् "इन्द्रियदोषात् संस्कारदोषाच्चाविद्या" वै॰ द॰ ९।२।१०। संशयमाह ॥ संशय इति = तावच्छब्दः क्रमार्थः संशयस्तावत् कथ्यते इत्यर्थः। प्रसिद्धानेकविशेषयोः प्रसिद्धाः पूर्वं प्रतीताः अनेकविशेषा असाधारणधर्मा वक्रकोटरादयः शिरःपाण्यादयश्च ययोः स्थाणुपुरुषयोः तयोः सादृश्यमात्रदर्शनात् सादृश्यमात्रस्य साधारणधर्ममात्रस्य क्वचिद् एकत्र धर्मिणि दर्शनात्। उभयविशेषाऽनुस्मरणात् उभयोः स्थाणुपुरुषयोः विशेषाणां वक्रकोटरादीनां शिरःपाण्यादीनाञ्च पूर्वं प्रतीतानां स्मरणात् स्मरणकारणात्। अधर्माच्च विरुद्धधर्माश्रयणात् किंस्विदित्युभयावलम्बी विमर्शः विचारः संशयः। किं स्थाणुः किं वा पुरुषः इत्यनवस्थितो भयस्वरूपेण उभयविशेषसंस्पर्शः विमर्शः विरुद्धाऽर्थोऽवमर्शो ज्ञानविशेषः संशयः इति। सादृश्यमात्रदर्शनादि

मू॰ = तत्राविद्या चतुर्विधा संशयविपर्ययाऽनध्यवसायस्वप्नलक्षणा। संशयस्तावत् प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः संशयः। स च द्विविधः। अन्तर्बहिश्च। अन्तस्तावत् आदेशिकस्य सम्यङ्मिथ्या चोद्दिश्य पुनरादिशतस्त्रिषु कालेषु संशयो भवति किं नु सम्यङ् मिथ्या वेति।

त्यत्र मात्रग्रहणसामर्थ्यात् विशेषाणामनुपलम्भो गम्यते। दर्शनशब्दः उपलब्धिवचनो न प्रत्यक्षप्रतीतिवचनोऽनुमेयस्यापि सामान्यस्य संशयहेतुत्वात्। संक्षेपार्थोऽयम्। यदाऽयं प्रतिपत्ता उभयसाधारणं धर्मं क्वचिदेकत्र धर्मिणि उपलभते। कुतश्चिन्निमित्तात् तस्य धर्मिणो विशेषं नोपलभते पूर्वप्रतीतयोः स्मरति विरुद्धविशेषयोः न चोभयोरेकत्र संभावयति तस्मान्न, विरुद्धत्वात्। नाऽवश्यं तदविनाभूतस्य साधारणधर्मस्य दर्शनात्। तदाऽस्य साधारणधर्मविषयत्वेनाऽव्याप्ति धर्मिणि विशेषविषयत्वेनाऽनवधारणात्मकः प्रत्ययः संशयः संशयो भवति। यथा च सूत्रम् "सामान्यप्रत्यक्षाद्विशेषाऽप्रत्यक्षाद्विशेषस्मृतेश्च संशयः" वै॰ द॰ २।२।१७। अत्र संशयभेदान् कथयति ॥ स इति = सः संशयः द्विविधः अन्तरिन्द्रियवर्ति संशयबहिरिन्द्रियवर्ति संशयभेदात्। अन्तस्तावदन्तरिन्द्रियवर्ति संशयः कथ्यते। आदेशिकस्य ज्योतिर्विदः पूर्वं कथितस्य किञ्चिद् ग्रहसंक्रान्त्यादिजन्यफलस्य अभवने दृष्टेऽन्यदा तादृशधर्मविशिष्टे चेच्चरफले संशीतिरिति फलमिदं सत्यमसत्यं वेति ज्ञानं संशयः। यथा च सूत्रम् "विद्याऽविद्यातश्च संशयः" वै॰ द॰ ३।२।२०। समानधर्मोपपत्तेः १ अनेकधर्मोपपत्तेः २ विप्रतिपत्तेः ३ उपलब्ध्यव्यवस्थातः ४ अनुपलब्ध्यव्यवस्थातश्च ५ इति संशयः समानतन्त्रिकैः न्यायदर्शनकारैः गोतमपादैः पञ्चविधः दर्शितः स एवौ द्वैविध्येन संगृहीतः।

बहि द्विविध इति दर्शयति ॥ बहि इति = प्रत्यक्षविषयाऽप्रत्यक्षविषयभेदात् बहिः संशयः द्विविधः । तत्र तयोर्मध्ये ऽप्रत्यक्षविषये तावत् साधारण लिङ्गदर्शनात् सामान्यचिह्नाऽवलोकनात् । उभयविशेषाऽनुस्मरणात् उभयधर्म स्मरणात् यद्वा विशेषधर्मोऽनुस्मरणात् संशयः अधर्मात् विप्रतिपत्तिधर्मदर्शनात् संशयः भवति । यथा दृष्टान्तः स्वयं । वाटान्तरितस्य पिण्डस्य अप्रत्यक्षस्य सामान्येन सामान्याऽवस्थया विषाणमात्रदर्शनाऽनुमितस्य संशयविषयत्वात् अप्रत्यक्षविषयोऽयं संशयः इति च । यथा च सूत्रम् " यथा दृष्टमयथा दृष्टत्वात् " वै० द० २।२।१९ प्रत्यक्षविषये कथं संशय इति कथयति । प्रत्यक्षविषये इति = प्रत्यक्षविषये संशये स्थाणुपुरुषयोः ऊर्ध्वतामात्रसादृश्यदर्शनात् । स्थाणुपुरुषयोः सम्बन्धिनी या ऊर्ध्वता तन्मात्रस्य प्रत्यक्षविषये पुरो वर्तिनि धर्मिणि दर्शनात् अवलोकनात् । वक्रादिविशेषाऽनुपलब्धितः वक्रकोटरादेः स्थाणुधर्मस्य शिरःपाण्यादेः विशेषस्य पुरुषधर्मस्याऽनुपलब्धितः । स्थाणुत्वादिसामान्यविशेषाऽभिव्यक्तौ वक्रकोटरादयः स्थाणुत्वाभिव्यक्तिहेतवः शिरःपाण्यादयः पुरुषत्वाभिव्यक्तिहेतवः तेषाम्

मू० = बहि द्विविधः प्रत्यक्षविषये चाऽप्रत्यक्षविषये च तत्राऽप्रत्यक्षविषये तावत् साधारणलिङ्गदर्शनात् उभयविशेषाऽनुस्मरणाद् धर्माच्च संशयो भवति । यथा दृष्ट्वा विषाणमात्रदर्शनात् गौर्गवयो वेति । प्रत्यक्षविषयेऽपि स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यदर्शनात् वक्रादिविशेषाऽनुपलब्धितः स्थाणुत्वादिसामान्यविशेषाऽनभिव्यक्तावुभयविशेषाऽनुस्मरणादुभयत्राऽऽकृष्यमाणस्यात्मनः प्रत्ययो दोलायते किं नु खलु अयं स्थाणुः स्यात् पुरुषो वेति ॥

अनुपलम्भात् स्थाणुत्वपुरुषयोः अनभिव्यक्तौ अप्रत्यक्षे उभयविशेषाऽनुस्मरणात् उभयोः स्थाणुपुरुषयोः प्रत्येकमुपलब्धानां विशेषाणाम् अनुस्मरणात् उभयत्र स्थाणौ पुरुषे वा आकृष्यमाणस्य प्रतिपत्तुः यदा ऊर्ध्वतादर्शनात् स्थाणुरयमिति निश्चेतुमिच्छति । तदा पुरुषविशेषाऽनुस्मरणेन पुरुषे समाकृष्यते इत्युभयत्राकृष्यमाणः अत एवाऽस्य प्रत्ययः निश्चयः दोलायते नैकत्र नियमेन अवतिष्ठते । किं नु खलु अयं स्थाणुः स्यात् पुरुषो वा इति संशयः उत्पद्यते । यद्वा च सूत्रम् " दृष्टञ्च दृष्टवत् " वै० द० २।२।१८ ।

विपर्ययं निरूपयति विपर्यय इति = प्रत्यक्षविषयेऽनुमानविषये च विपर्ययो भवति । विपर्ययः विपरीत भावना । प्रत्यक्षविषये तावत् विपर्ययः कथं भवतीति प्रदर्श्यते प्रकथ्यते । प्रसिद्धाऽनेकविशेषयोः प्रसिद्धाः पूर्वं प्रतीताः अनेके विशेषाः सास्नादयः केसरादयश्च ययोः तौ प्रसिद्धाऽनेकविशेषौ गवाश्वौ तयोर्मध्ये योऽतस्मिन् अश्वे गवि तदिति प्रत्ययोऽश्व इति प्रत्ययः स विपर्ययोऽविद्येति नामान्तरं ना कस्येत्यपेक्षायाम् उच्यते । पित्तकफानिलोपहतेन्द्रियस्य पित्तश्च कफश्च अनिलश्च पित्तकफाऽनिलास्तैरुपहते दूषितमिन्द्रियं यस्य, तस्य मानवस्य अर्थे विपर्यय इति । कस्माद्धेतोरित्याकाङ्क्षायाम् उच्यते । अयथार्थालोचना‑त्, न यथार्थलोचनमयथार्थालोचनं तस्मात् अयथार्थालोचनात् अतात्त्विकदर्शनादित्यर्थः । पुनः असन्निहितविषयज्ञानजसंस्काराऽपेक्षात् आत्ममनसोः संयोगात् । असन्निहितः असमीपस्थः विषयः अर्थः पदार्थो वा योऽश्वादिः ततः पूर्वं तज्ज्ञानात् अवबोधात् जातः प्रादुर्भूतः यः संस्कारः तम् अपेक्षमाणात् आकाङ्क्षां कुर्वतः आत्ममनसोः संयोगात् विपर्यय इति तत्रार्थोऽयं, गोपिण्डसंयुक्तमिन्द्रियं गोत्वम् अगृह्णदपि तं पिण्डं गोसाधर्म्ययुक्तं गृह्णाति । सारूप्यात्केसरादीनां तेन च सादृश्यग्रहणेन

मू = विपर्ययो प्रत्यक्षाऽनुमानविषये एव भवति । प्रत्यक्षविषये तावत् प्रसिद्धाऽनेकविशेषयोः पित्तकफाऽनिलोपहतेन्द्रियस्यायथार्थालोचनात् असन्निहितविषयज्ञानजसंस्कारापेक्षादात्ममनसोः संयोगात् अधर्माच्चातस्मिंस्तदिति प्रत्ययो विपर्ययः । यथा गव्येवाश्वः इति । असत्यपि प्रत्यक्षे प्रत्यक्षाभिमानो भवति । यथा व्यपगतघनपटलमचलनिधिसदृशमम्बरमञ्जनचूर्णपुञ्जश्यामं शार्वरं तम इति ।

अश्वविषयः संस्कारः प्रबोध्यते । स च प्रबुद्धः अश्वस्मृतिजनने प्राप्ते मनोदोषात् इन्द्रियसंयुक्ते गव्यश्वसादृश्याऽनुरोधात् अनुभवाकारम् अश्वप्रतीतिं करोति । अतो न सर्वस्य सर्वत्राऽवभासः, सादृश्यसंस्कारयोः प्रतिनियमहेतुत्वात् । अत एव न इयं रजतम् । रज्जुमयं सर्पः, गवि एवाश्वः इति यद्वा गृह्ये पीतिमाभ्रमः इति यथा च शुक्तिरजतम्, इन्द्रियदोषात् संस्कारदोषाच्चाविद्या, गुणेन्द्रियजो भ्रान्तिरुच्यते । अधर्मात् विरुद्धधर्माश्रयणात् अतस्मिंस्तदिति प्रत्ययो बुद्धिविपर्यय इति दृष्टान्तो यथा "शुक्तौ इदं
९।२।१० विपर्ययस्योदाहरणान्तरमाह । असतीति = प्रत्यक्षे इन्द्रियगोचरेऽसत्यपि प्रत्यक्षाभिमानो इन्द्रियगोचराभिमानो भवति यथा व्यपगतघनपटलम् मेघसमूहरहितम् अचलजलनिधिसदृशम् स्थिरसमुद्रसमम् अम्बरम् आकाशम् इति प्रत्यक्षमिव रूपज्ञानम् अप्रत्यक्षे नभसि जायते । यद्वा अञ्जनचूर्णपुञ्जश्यामम् अञ्जनचूर्णस्य यः पुञ्जोऽञ्जनचूर्णपुञ्जः अञ्जनचूर्णपुञ्ज इव श्यामं कृष्णवर्णात्मकं शार्वरं शर्वर्यां रात्रौ भवं उत्पन्नं शार्वरं रात्रिसम्बन्धि तमः अस्तीति इत्यत्रात्यन्ततेजोऽभावे सति सर्वत्रारोपितरूपमात्रविषयम् अप्रत्यक्षम् अपि प्रत्यक्षमिव पश्यतीति विपर्ययः ॥

अनुमानजन्यं विपर्ययमाह ॥ अनुमानेति = अनुमानविषये यथा विपर्ययो भवति तथोच्यते । बाष्पादिभिः बाष्पधूलितपताकादिभिः धूमाभिमतैः धूम इति ज्ञातैः अनग्निके देशेऽग्न्यनुमानम् । यथा धूलिदर्शनमात्रे धूलौ धूमज्ञानमिति विपर्ययः । तथा गवयविषाणदर्शनात् गौरिति ज्ञानमुत्पद्यतेऽनुमानविपर्यय इति विषाणमात्रदर्शनात् महिषविषाणे सत्यपि गौरिति ज्ञानमुत्पद्यते यदा स एव विपर्यय इति । अत्यन्तदुर्दर्शनाभ्यासाच्च विपर्ययो भवतीत्याह ॥ त्रयीति = त्रयीदर्शनविपरीतेषु त्रयाणां वेदानां ऋग्यजुःसाम्नां यदा ज्ञानं सैव पाशनाकाय त्रयी वेदत्रयीत्युच्यते तेषां दर्शनात् "अथर्ववेदस्तु त्रय्येकदेश एव" दृश्यते स्वर्गोऽपवर्गसाधनभूतोऽनयेति दर्शनं त्रयीवेदर्शनं त्रयीदर्शनं तद्विपरीतेषु तद्विरुद्धधर्मप्रतिपादकेषु शाक्यादिदर्शनेषु नास्तिकदर्शनेषु प्रतिपादितमिदं श्रेयः सम्यगिति यः प्रत्ययः स विपर्ययः । तथा शरीरेन्द्रियमनःसु शरीरम् इन्द्रियं मनश्चेति शरीरेन्द्रियमनांसि तेषु आत्माभिमानः शरीरमेव आत्मा, इन्द्रियाण्येवात्मा वा, मन एवात्मेति वा योऽभिमानः सोऽपि प्रत्ययः विपर्ययः । तेभ्यो व्यतिरिक्तस्य प्रतिपादनात् ।

मू = अनुमानविषयेऽपि बाष्पादिभिर्धूमाभिमतैर्वह्न्यनुमानं गवयविषाणदर्शनाद्गौरिति । त्रयीदर्शनविपरीतेषु शाक्यादिदर्शनेष्विदं श्रेय इति मिथ्याप्रत्ययः विपर्ययः । शरीरेन्द्रियमनःस्वात्माभिमानः कृतकेषु नित्यत्वदर्शनं कारणवैकल्ये कार्योत्पत्तिज्ञानं हितमुपदिशत्स्वहितमिति ज्ञानम् अहितमुपदिशत्सु हितमिति ज्ञानम् ॥

कृतकेषु घटपटकादिकार्यद्रव्येषु नित्यत्वदर्शनं नित्यबुद्धिरिति यः प्रत्ययः सोऽपि विपर्ययः । कारणवैकल्ये धर्माधर्मयोरभावे कार्योत्पत्तिज्ञानं सुखदुःखादिवैचित्र्यज्ञानमिति यः प्रत्ययः सोऽपि विपर्ययः । "प्राणिनो न हिंसितव्याः" "मलपङ्कादिकम् अधार्यम्" इत्यादिकं हितम् उपदिशत्सु वेदवचनेषु अहितमिति विज्ञानमिति यः प्रत्ययः स विपर्ययः । प्राणिहिंसा परो धर्मः मलपङ्कादिधारणमेव श्रेयसे इत्यहितमुपदिशत्सु उपदेशं कुर्वत्सु क्षपणकसंसारमोचकादिषु हितमिति विज्ञानमिति यः प्रत्ययः सः विपर्ययः ॥ इति ।

श्रीः श्रीः

श्रीः

अनध्यवसायमाचष्टे। अनध्यवसाय इति= प्रत्यक्षानुमानविषये विपर्ययस्त्वानध्यवसायो भवति। अनध्यवसायोऽपि तयोः पूर्वोक्तयोः प्रत्यक्षानुमानयोः भवति इत्यपिशब्दार्थः। तावदिति शब्दः क्रमवाची। प्रसिद्धार्थेषु प्रसिद्धाश्च तेऽर्थाश्च प्रसिद्धार्थाः येऽर्थाः पूर्वं ज्ञाताः तेषु व्यासंगात् अन्यत्रासक्तचित्तत्वात् विशेषप्रतीत्यर्थित्वात् वा किमित्यालोचनमात्रमनध्यवसायः। यथा गते प्रसिद्धे हस्तिकोऽप्यनेन यथा गत इति ज्ञानमात्रमनवधारिततद्विशेषमनध्यवसायः इति। अप्रसिद्धार्थेषु अपरिज्ञानात् अनध्यवसायो यथा वाहीकस्य कृषकस्य कृषीवलस्येति यावत् पनसादिषु पनसप्रभृतिवृक्षेषु अनध्यवसायोऽनिश्चयो भवति। तत्र पनसे पनसः वृक्षविशेषः "कटहलः" इति प्रसिद्धः, वाहीकस्य सत्ता द्रव्यत्वं द्रव्यसिद्धित्वं पृथिवीत्वं पार्थिवोऽयं वृक्षोऽयं रूपादिमान् शाखादिमांश्चेत्यवधारणं निश्चयो भवति। पनसत्वमपि सजातीयपनसवृक्षेषु अनुवृत्तं वर्तमानमाम्रादिभ्य आम्रादिवृक्षेभ्यो व्यावृत्तं निवर्तमानमिति प्रत्यक्षम्। केवलं तु अस्य पनसशब्दो नामधेयमित्युपदेशाऽभावात्। उपदेशाऽकारणात् विशेषसंज्ञाप्रतिपत्तिर्विशेषसंज्ञासिद्धिर्न भवति। पनसशब्दवाच्योऽयमिति प्रतिपत्तिर्न भवति, अपितु किमस्यास्य नामधेयं भविष्यतीति तावन्मा

मू= अनध्यवसायोऽपि प्रत्यक्षानुमानविषय एव सञ्जायते। तत्र प्रत्यक्षविषये तावत् प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा व्यासंगादर्थित्वाद्वा किमित्यालोचनमात्रमनध्यवसायः। यथा वाहीकस्य पनसादिष्वनध्यवसायो भवति। तत्र सत्ताद्रव्यत्वपृथिवीत्ववृक्षत्वरूपवत्त्वादिशाखाद्यपेक्षोऽध्यवसायो भवति। पनसत्वमपि पनसेष्वनुवृत्तमाम्रादिभ्यो व्यावृत्तं प्रत्यक्षमेव केवलं तूपदेशाऽभावाद्विशेषसंज्ञाप्रतिपत्तिर्न भवति। अनुमानविषयेऽपि नारिकेलद्वीपवासिनः सास्नामात्रदर्शनात् को नु खल्वयं प्राणी स्यादित्यनध्यवसायो भवति।

त्रप्रतीतिः स्यात्। सेयं संज्ञाविशेषाऽनवधारणात्मिका प्रतीतिरनध्यवसायः। अनुमानविषयेऽनध्यवसायं लक्षयति। अनुमानेति= अनुमानविषयेऽप्युदाहरणं यथा मूलं सुगमम्। समन्वयो यथा नारिकेलद्वीपे गावो न सन्ति तत्रत्या मानवा गां न जानन्ति। तद्द्वीपवासिनो देशान्तरमागत्य कुतः वनमध्ये सास्नामात्रदर्शनात्। सामान्येन पिण्डमात्रमनुमाय तत्र जातिविशेषविषयत्वेन को नु खलु अत्र प्राणी जीवः स्यात् इत्यनवधारणात्मकं यत् ज्ञानं जायते स एव अनध्यवसाय इति भवति॥

स्वप्नज्ञाने लक्ष्यति। उपरतेति= उपरतेन्द्रियग्रामस्य उपरतः स्वविषयोपादानात् शान्तः इन्द्रियग्रामः चक्षुरादीन्द्रियसमूहः यस्य असौ उपरतेन्द्रियग्रामः, तस्योपरतेन्द्रियग्रामस्य, प्रलीनमनस्कस्य प्रकर्षेण स्वकीयमना प्रलीनं मनो यस्य असौ प्रलीनमनस्कस्तस्य प्रलीनमनस्कस्य प्राणिनः इन्द्रियद्वारेण चक्षुरादीन्द्रियेणैव निद्रासमये यदनुभवनं पूर्वोऽधिगमाऽनपेक्षं परिछेदस्वभावं मानसं मनोमात्रजन्यो यत्, तत् स्वप्नज्ञानमिति तथाच सूत्रम् "तथा स्वप्नः,, वै० द० ६।२।६ "अनुभूतवस्तुस्फुरणार्थतया न स्मरणादर्थान्तरं स्वप्नज्ञानम्,, इति वृत्तिकृतोक्तम्, अथापि ब्रह्ममीमांसायामप्युपदिष्टम्" अपि च स्मृतिरेवा, "यत्स्वप्नदर्शनम्,, अ० २ पा० २ सू० २९ यदा यथा पुरुषस्य मनः प्रलीयते इन्द्रियाणि च विरमन्ति तद्दर्शयति॥ कथमिति= कथं स्वप्नज्ञानमित्यपेक्षते यदा यस्मिन् काले बुद्धिपूर्वात् बुद्धिः पूर्वं यस्य स बुद्धिपूर्वः तस्माद्बुद्धिपूर्वात् आत्मनः जीवस्य शरीरव्यापारात् शरीरव्यापारः गमनागमने तस्माद्व्यापारादेनुभूतात् अहनि दिवसे खिन्नानां परिश्रान्तानां प्राणिनां प्राणिमात्राणां निशि रात्रौ विश्रामार्थम्

मू०= उपरतेन्द्रियग्रामस्य प्रलीनमनस्कस्येन्द्रियद्वारेणैव यदनुभवनं मानसं तत् स्वप्नज्ञानम्। कथम्। यदा बुद्धिपूर्वादात्मनः शरीरव्यापारादहनि खिन्नानां प्राणिनां निशि विश्रामार्थमाहारपरिणामार्थं वाऽदृष्टकारितप्रयत्नापेक्षादात्मान्तःकरणसम्बन्धात् मनसि क्रियाप्रबन्धादन्तर्हृदये निरिन्द्रिये आत्मप्रदेशे निश्चलं मनस्तिष्ठति तदा प्रलीनमनस्क इत्याख्यायते॥

श्रमदूरीकरणाय आहारपरिणामार्थं वा आहारस्य भुक्तपीतभोजनादेः परिणामार्थं परिपक्वभवनाय अदृष्टकारितप्रयत्नाऽपेक्षात् धर्माधर्माभ्यां कारितैः सम्पादितैः यः प्रयत्नः तमपेक्षणात् अपेक्षमाणात् आत्मान्तःकरणसम्बन्धात् आत्मनोऽन्तःकरणस्य यः सम्बन्धः संयोगः तस्मात् मनसि क्रियाप्रबन्धात् चित्ते यः क्रियायाः प्रबन्धः क्रियायाः सन्तानो जातस्तस्मात् अन्तर्हृदये हृदयमध्ये निरिन्द्रिये बाह्येन्द्रियसम्बन्धशून्ये आत्मप्रदेशे आत्मनि निश्चले स्थिरं मनः तिष्ठति स्थितं भवति। तदा तस्मिन्नेव काले पुरुषः प्रलीनमनस्कः प्रलीनमनाः इत्याख्यायते इति कथ्यते।

कथं स्वप्नो भवतीति दर्शयति। प्रलीने इति= प्रलीने लयं प्राप्ते तस्मिन् मनसि उपरतेन्द्रियग्रामोऽन्तःकरणानधिष्ठितेन्द्रियसमूहो यस्याः तस्यामवस्थायां रजस्तमोदशायां प्राबल्येन बाहुल्येन प्राणापानसन्तानप्रवृत्तौ प्राणापानवायुसन्तानर्निगमनप्रवेशलक्षणायां प्रवृत्तौ आत्ममनःसंयोगात् स्वापाद्यात् स्वाप इति नामधेयात् संस्कारात् पूर्वोऽनुभूतविषयात् इन्द्रियद्वारेण दृष्टेः व्यापारेण असत्सु विषयेषु अविद्यमानेषु विषयेषु प्रत्यक्षाकारम् अपरोक्षस्वरूपं स्वप्नज्ञानं प्रादुर्भवतीति। तथा चोक्तम् "स्वप्नान्तिकम्...वै.द.९।२।८ कतिविधं तत्स्वप्नज्ञानमित्यत आह॥ तदिति= तत् स्वप्नज्ञानं त्रिविधं त्रिप्रकारकं संस्कारपाटवात् धातुदोषात् अदृष्टात्। संस्कारपाटवात् कथमित्यत आह। तत्रेति= तत्र तेषु मध्ये तावत् आदौ संस्कारपाटवात् कथं स्वप्नज्ञाने जायते इत्याच्यते, कामी, स्त्रीकामी क्रुद्धः कोपाविष्टः वा मानवः यदा यस्मिन् समये यमर्थं प्रियतयां स्त्रियं शत्रुं वा आदृतः परेण सन्मानं प्रापितोऽधिकं चिन्तयन् चिन्तां कुर्वन् स्वपिति शयनं कुरुते, तदा तस्मिन् समये सैव चिन्तासन्ततिः

मू= तत्तु त्रिविधम्। संस्कारपाटवाद्धातुदोषाददृष्टाच्च। तत्र संस्कारपाटवात्तावत् कामी क्रुद्धो वा यदा यमर्थमादृतश्चिन्तयन् स्वपिति तदा सैव चिन्तासन्ततिः प्रत्यक्षाकारा सञ्जायते। धातुदोषात् वातप्रकृतिस्तद्दूषितो वाऽग्निप्रवेशकनकपर्वतादीन् पश्यति। श्लेष्मप्रकृतिः श्लेष्मदूषितो वा सरित्समुद्रप्रतरणहिमपर्वतादीन् पश्यति।

स्मृतिव्यूहः संस्कारातिशयात् प्रत्यक्षाकारा साक्षाद्दर्शावभासिका सञ्जायते उत्पद्यते। धातुदोषात्स्वप्नज्ञानं कथमिति सूत्रयति॥ धातुदोषादिति= धातुदोषात् कथं स्वप्नज्ञानं जायते इत्युच्यते। धातवः सप्त, वसाऽसृक्मांसमेदोमज्जास्थिशुक्रात्मानः सप्त सन्ति, तेषां दोषात् स्वप्नो भवति। वातप्रकृतिः वातस्वभावः तद्दूषितो वा तेन वायुदोषेण दूषितः वा स्वात्मनः अग्निप्रवेशसुमेरुपर्वतादीन् पश्यति साक्षात्कुरुते। श्लेष्मप्रकृतिः कफस्वभावः श्लेष्मदूषितो वा कफदोषेण दूषितः वा सरित्समुद्रप्रतरणं नदीसमुद्रादितरणं हिमपर्वतादींश्च पश्यति। यथा सूत्रम् "धर्माच्च...वै.द.९।२।९

अदृष्टात् कथं स्वप्नो भवतीति निरूपयति। यदिति = यत् स्वप्नज्ञानम् स्वयमात्मनैव अनुभूतेषु अननुभूतेषु यद्वा अननुभूतेषु केवल दृष्टमात्रेषु वाऽननुभूतेषु प्रसिद्धार्थेषु अप्रसिद्धार्थेषु वा सत्सु यत् शुभावेदकं कल्याणज्ञापकं हितज्ञापकं वा गजारोहणच्छत्रलाभादि स्वप्ने गजयानं वा राजचिन्ह मुकुटादि प्राप्तिक भवति तत् सर्वं संस्कारधर्माभ्यां शुभसंस्कारधर्माभ्यां भवति। विपरीतं शुभावेदक प्रतिकूलं देहे तैलमर्दनं खरे उष्ट्रे वारोहणं तत्सर्वम् अधर्म कुसंस्काराभ्यां जायते। यथाऽथर्ववेदेऽपि "यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न॥ वरुणानी ते माता यमः पिताऽररुर्नामासि॥" कां॰ ६ अ॰ ५ सू॰ ४६ मं॰ १ अथाऽपि "यत् स्वप्ने अन्नमश्नामि न प्रातरधिगम्यते। सर्वं तदस्तु मे शिवं नहि तद् दृश्यते दिवा॥" अथ॰ कां॰ ७ अ॰ ९ सू॰ १०८ मं॰ १ चन्द्रादित्यादिभक्षणे स्वप्ने कथं भवति। अत्यन्तेति = अत्यन्ताऽप्रसिद्धार्थेषु = अति स्वतः परतश्च अश्रुतेषु चन्द्रादित्यभक्षणादिषु ज्ञानं यत् तत् अदृष्टादेव धर्माधर्मस्वरूपादेव अननुभूतेषु पदार्थेषु संस्कारो न भवतीति सिद्धान्तः।

मू = यत्स्वयमनुभूतेष्वननुभूतेषु वा प्रसिद्धार्थेष्वप्रसिद्धार्थेषु वा यच्छुभावेदकं गजारोहणच्छत्रलाभादि तत्सर्वं संस्कारधर्माभ्यां भवति। विपरीतञ्च तैलाऽभ्यङ्गखरोष्ट्रारोहणादि तत्सर्वमधर्मसंस्काराभ्यां भवति। अत्यन्ताप्रसिद्धार्थेष्वदृष्टादेवेति। स्वप्नान्तिकं यद्यप्युपरतेन्द्रियग्रामस्य भवति तथाऽप्यतीतस्य ज्ञानप्रबन्धस्य प्रत्यवेक्षणात् स्मृतिरेवेति भवत्येषा चतुर्विधाऽविद्येति॥

तत्स्वप्नज्ञानमुपरतेन्द्रियग्रामस्यैव भवतीति त्याशङ्कां निवारयति॥ स्वप्नान्तिकमिति = कदाचित् स्वप्नेऽवलोकितस्य पदार्थस्य स्वप्नाऽवस्थायामेव प्रतिसन्धानं भवति। यथा मया दृष्टोऽयं पदार्थ इति तत्पूर्वाऽनुभूतस्य स्वप्नस्य अन्तेऽवसाने भवतीति स्वप्नान्तिकमिति यद्यपि लीनेन्द्रियसमूहस्य भवति तथाऽपि अतीतस्य पूर्वाऽनुभूतस्य ज्ञानप्रबन्धस्य स्वप्नज्ञानप्रबन्धस्य प्रत्यवेक्षणात् पुनः पुनरनुसन्धानात् स्मृतिः एव भवति। इत्येषाऽविद्या संशयविपर्ययाऽनध्यवसायस्वप्नलक्षणा चतुर्विधा चतुष्प्रकारका इति।

सम्प्रति विद्यां विभजते ॥ विद्येति = विद्या यथार्थज्ञानमपि चतुर्विधा चतुष्प्रकारवती। प्रत्यक्षम् लक्षणा १ लैङ्गिकलक्षणाऽनुमानलक्षणा २ स्मृतिलक्षणा ३ आम्नायलक्षणा शब्दलक्षणा ४ तत्र निखिलमतस्वीकृतिमत्प्रत्यक्षं पूर्वमुपन्यस्तम्। अथ चाऽपरेषां प्रमाणानां कारणमेव प्रत्यक्षम् कारणात्कार्यं पूर्वमेवेति न्यायात् पूर्वं प्रत्यक्षस्योपदेशः इति। प्रत्यक्षपूर्वकमनुमानमतः तदनु अनुमानम्। प्रत्यक्षाऽनुमानेषु अर्थेषु स्मृतेर्भावात्तदनु ~~स्मृते~~ उपमानोपदेशः। लौकिकप्रमाणान्ते संकीर्तनमार्षस्य लोकोत्तराणां प्रकृष्टाणां सद्भावात् अतस्तदनु शब्दप्रमाणोपदेशः। विद्याविषये सूत्रकारेण कणादेनाऽप्युक्तम् "आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्" वै. द. ३।१।१८ प्रत्यक्षलक्षणं कथयति मतत्रेति = तत्र चतुर्षु विद्याभेदेषु मध्ये ऽक्षम् अक्षं प्रतीत्य प्राप्य यदुत्पद्यते तत्प्रत्यक्षं प्रमाणम्। यथा यवबीजप्रभवत्वं यवाङ्कुरस्य अतः एव यवाङ्कुर इति व्यपदिश्यते। अतिप्रसिद्धबहिरिन्द्रियजन्यमेव प्रत्यक्षमिति भ्रान्तिनिवृत्त्यर्थेऽक्षमक्षमिति वीप्सा समस्तेन्द्रियाऽवरोधाय कृता इत्यत्र "कुगतिप्राद

मू = विद्याऽपि चतुर्विधा। प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा। तत्राक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम्। अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट्। तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते।

यः" पाणि. व्या. २।२।१८ इति प्रादिसमासः। प्रतिगतम् अक्षं प्रत्यक्षमित्यनेन अस्याभिधेयलिङ्गता प्रत्यक्षं ज्ञानं प्रत्यक्षा बुद्धिः प्रत्यक्षः प्रत्यय इति। यथा च सूत्रम् "वै. द. ३।१।१८ अथ च न्यायदर्शनकृता श्रीगोतममुनिनाऽप्युक्तम्। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" अध्या. आह्नि. सू. अक्षशब्दः बहुषु अर्थेषु प्रियमाणेषु अत्र निर्धारणार्थेमुक्तम् अक्षाणीति = घ्राणेन्द्रियम् १ रसनेन्द्रियम् २ चक्षुरिन्द्रियम् ३ त्वगिन्द्रियम् ४ श्रोत्रेन्द्रियम् ५ मन इन्द्रियम् ६ इतीन्द्रियाणि षट् संख्याकानि। तत्प्रत्यक्षं कुत्रोत्पद्यते ॥ तद्धीति = हि शब्दोऽवधारणे। तत्प्रत्यक्षम् द्रव्यादिषु पदार्थेषु भवति। यथा द्रव्यगुणकर्मसामान्येषु भवति न तु विशेषसमवाययोः।

द्रव्यस्य प्राधान्येन तावत्तत्प्रत्यक्षमाह ॥ द्रव्य इति = तावत् शब्दः क्रमवाचकः । त्रिविधे त्रिप्रकारके पृथिव्यप्तेजोलक्षणे महति सावयवे द्रव्ये तत्प्रत्यक्षं भवति । तत्र हेतुमाह । अनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्निकर्षात् । अनेकद्रव्यवत्त्वम्, अनेकद्रव्यम् आश्रयो यस्य तदनेकद्रव्यम् तद् यस्यास्ति तदनेकद्रव्यवत् तद्भावः तत् अनेकद्रव्यवत्त्वम् भूयोऽवयवाश्रितत्वम् । उद्भूतरूपप्रकाशः उद्भवसमाख्यातः रूपस्य धर्मः, यदभावात् वारिस्थे तेजसि प्रत्यक्षाऽभावः । चतुष्टयसंनिकर्षात् । चतुष्टयसंनिकर्षः, आत्मनः इन्द्रियार्थसमीपता, तस्मात्, आत्मनो मनसा संयोगः, मनसः इन्द्रियेण, इन्द्रियस्यार्थेन एतस्मात्कारणकलापात् । धर्मादिसामग्र्ये च । धर्मोऽधर्मादिकालादीनां समग्राणां भावात् स्वरूपालोचनमात्रं स्वरूपप्रत्यक्षं भवति । परमाणुद्व्यणुकयोश्च अप्रत्यक्षत्वात्ः 'महति' इत्युक्तम् । अनेकद्रव्यवत्त्वम्, अनेकद्रव्याश्रिताश्रितत्वम् । अवयवमहत्त्वाऽधीनमहत्त्वाश्रयत्वं वा प्रत्यक्षमिति सिद्धम् यथा च सूत्रम् "महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः" वै॰ द॰ ४।१।६। "अनेकद्रव्यसम

मू॰ = द्रव्ये तावत्त्रिविधे महत्यनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्निकर्षाद् धर्मादिसामग्र्ये च स्वरूपालोचनमात्रम् । सामान्यविशेषद्रव्यगुणकर्मविशेषणापेक्षादात्ममनःसंनिकर्षात् प्रत्यक्षमुत्पद्यते सद् द्रव्यं पृथिवी विषाणी शुक्लो गौर्गच्छतीति ।

वायादू रूपविशेषाच्च रूपोपलब्धिः" वै॰ द॰ ४।१।८ निर्विकल्पकप्रत्यक्षवादिनां सौगतानां मतं निराकरोति ॥ सामान्येति = सामान्यञ्च विशेषश्च द्रव्यञ्च गुणश्च कर्म च सामान्यविशेषद्रव्यगुणकर्माणि तान्येव विशेषणानि सामान्यविशेषद्रव्यगुणकर्मविशेषणानि तानि अपेक्षते यः आत्ममनःसन्निकर्षः तस्मात् प्रत्यक्षम् उत्पद्यते उद्भवति । सद् द्रव्यं सत्पदेन अवबुध्यते पृथिवीति पृथिवीत्वविशिष्टं द्रव्यपदेन ज्ञायते विषाणीति द्रव्यविशिष्टम् । शुक्लो गौरिति गुणविशिष्टम् गच्छतीति कर्मविशिष्टम् प्रत्यक्षं स्यात् । द्रव्यप्रत्यक्षमिन्द्रियसंयोगादित्यर्थः । चतुष्टयसंनिकर्षादित्यनेन आत्ममनःसंयोगे लब्धे पुनरात्ममनःसंयोगोपस्थापनमेव द्योतनार्थमिति ॥

श्री:

श्री: श्री: श्री:

रूपादिषु प्रत्यक्षोत्पत्तिमाह ॥ रूपेति = रूपरसगन्धस्पर्शेषु अनेकद्रव्यसमवायात् अनेकेषु अवयवेषु समवेते द्रव्ये अनेकद्रव्यं तत्र समवायात् समवायसम्बन्धात् । स्वगतविशेषात् स्वगतो विशेषो रूपे रूपत्वं रसे रसत्वं गन्धे गन्धत्वं स्पर्शे स्पर्शत्वं तस्मात् संयुक्तसमवायादित्यर्थः । स्वाश्रयसंनिकर्षात् संयुक्तसमवेतसमवायात् रूपादीनां यः आश्रयः तस्य ग्राहकैरिन्द्रियैः संनिकर्षात् नियतेन्द्रियनिमित्तं चक्षुर्निमित्तं रूपे, रसनेनिमित्तं रसे, घ्राणनिमित्तं गन्धे, त्वगिन्द्रियनिमित्तं स्पर्शे ज्ञानमुत्पद्यते । यथा च सूत्रम् "गुणकर्मसु संनिकृष्टेषु ज्ञाननिष्पत्तेः द्रव्यं कारणम् „ वै॰ द॰ ८।१।६ शब्दशब्दत्वयोः प्रत्यक्षोत्पत्तिमाह ॥ शब्दस्येति = शब्दस्य प्रत्यक्षं त्रय संनिकर्षात् । आत्ममनः श्रोत्रेन्द्रियाणां संनिकर्षात् समवायात् प्रत्यक्षमित्यर्थः । शब्द प्रत्यक्षे समवायः संनिकर्ष इतिभावः । तथा श्रोत्रसमवेतस्य श्रोत्रे समवायसम्बन्धविशिष्टस्य शब्दस्य तेनैव श्रोत्रेन्द्रियेणैव उपलब्धेः प्रत्यक्षं भवति । शब्द समवेत श्रावण प्रत्यक्षे शब्दत्वप्रत्यक्षे इत्यर्थः, श्रोत्रावच्छिन्न समवेतसमवायः कारणम् इत्यर्थः । यथा च सूत्रम् "श्रोत्रग्रहणो योऽर्थः स शब्दः „ वै॰ द॰ २।२।२१

मू = रूपरसगन्धस्पर्शेष्वनेकद्रव्यसमवायात् । स्वगतविशेषात् स्वाश्रयसन्निकर्षात् नियतेन्द्रियनिमित्तमुत्पद्यते । शब्दस्य त्रयसन्निकर्षात् श्रोत्रसमवेतस्य तेनैवोपलब्धिः । संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाऽपरत्वस्नेहद्रवत्ववेगकर्मणां प्रत्यक्षे द्रव्यसमवायाच्चक्षुःस्पर्शनाभ्यां ग्रहणम् । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नानां द्वयोरात्ममनसोः संयोगादुपलब्धिः ।

संख्यादीनां प्रत्यक्षत्वमाह ॥ संख्येति = संख्यादिकर्मान्तानां गुणानां प्रत्यक्षे द्रव्यसमवायात् । उद्भूतरूपस्य [illegible]द्रव्ये समवायात् समवायसम्बन्धविशिष्टात् हेतोः चक्षुःस्पर्शनाभ्यां नेत्रत्वगिन्द्रियाभ्यां ग्रहणं प्रत्यक्षं भवति । यस्मिन् द्रव्ये उद्भूतरूपता [illegible]ता, तत्रैव संख्यादयः समवायसम्बन्धेन भविष्यन्तीत्याशयः, तेषां संयुक्तसमवायादेव प्रत्यक्षं लभ्यते । यथा प्रत्यक्षादि [illegible] "संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च एते तु द्वीन्द्रियग्राह्याः „ कारिका ९२ "यथा च सूत्रम् " संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ, परत्वापरत्वे, कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि „ वै॰ द॰ ४।१।११ आत्मगुणोपलब्धिमाह ॥ बुद्धीति = बुद्ध्यादीनां प्रयत्नान्तानाम् आत्मसमवेतानां गुणानां द्वयोः आत्ममनसोः संयोगात् उपलब्धिः प्रत्यक्षं भवति । संयुक्तसमवायसंनिकर्षात् ग्रहणमेषामित्यर्थः । तथा आत्मरूपे इन्द्रियार्थे यः संनिकर्षः तस्मात् सुखादि प्रत्यक्षं जायते इति फलितोऽर्थः ॥

प्रौढासत्तिकर्षमाह ॥ भावेति उपलम्भाऽऽधारसमवेतानाम् उपलम्भः संप्राप्य आधारसमवेतानाम् आश्रयसंयुक्तानाम् भावद्रव्यत्व गुणत्वकर्मत्वादीनां, भावः सत्ता, द्रव्यत्वं गुणत्वं कर्मत्वं च तदादीनां स्वाश्रयग्राहकैः स्वकीयानां सामान्यादीनाम् आश्रयो येन इन्द्रियेण गृह्यते तेनैव इन्द्रियेण तानि सामान्यादीनि गृह्यन्ते। तैरिन्द्रियैः ग्रहणं स्वीकृतः प्रत्यक्षमितियावत् भवति यथा च सूत्रम् "एतेन गुणत्वे, भावे च सर्वेन्द्रियज्ञानं व्याख्यातम्" वै. द. ४।१।१३। इत्यस्मदादीनां लौकिकपुरुषाणाम् अयोगिनामित्यर्थः, प्रत्यक्षं भवति यथा द्रव्यप्रत्यक्षं संयोगात् १ गुणादिप्रतीतिः संयुक्तसमवायात् २ गुणत्वादिज्ञाने संयुक्तसमवेतसमवायात् ३ शब्दग्रहणं समवायात् ४ शब्दत्वग्रहणं समवेतसमवायात् ५ अभावग्रहणं विशेषणविशेष्यतया ६ समन्वयो यथा घटप्रत्यक्षजनने संयोगः सन्निकर्षः १ घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः चक्षुः संयुक्ते घटे रूपस्य समवायात् २

मू० = भावद्रव्यत्वगुणत्वकर्मत्वादीनामुपलम्भाधारसमवेतानां स्वाश्रयग्राहकैरिन्द्रियैर्ग्रहणमित्येतदस्मदादीनां प्रत्यक्षम् ॥

घटरूपत्वप्रत्यक्षजनने संयुक्तसमवेतसमवायः संनिकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् ३ शब्दप्रत्यक्षे समवायः संनिकर्षः, कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् ४ शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ५ अभावप्रत्यक्षे विशेषणविशेष्यभावः संनिकर्षः, घटाऽभाववत् भूतलमित्यत्र चक्षुःसंयुक्ते घटे भूतले घटाऽभावस्य विशेषणत्वात् ६ ॥ श्रीः श्रीः श्रीः

अयुनाऽलौकिकसन्निकर्षमाह ॥ अस्मदिति = अस्मद्विशिष्टानाम् „ अर्थात् "अहं मम „ इति या स्वीकृतिः तद्विशिष्टानां योगिनां - "योगश्चित्तवृत्तिनिरोधः „ योगोऽस्यास्तीति योगी तेषां योगिनां युक्तयुक्तानामित्यर्थः, युक्तानां युक्तयुञ्जानद्विविधयोगिनोर्मध्ये युक्तानां युक्ताः समाहिताऽन्तःकरणाः ध्यानसापेक्षाः ध्यानसहकारेण हि तेषां सर्वप्रत्यक्षं भवतीति भावः, युक्तानां प्रयुक्ताणां योगजधर्मोऽनुगृहीतेन । योगात् जातो यो धर्मः तदनुगृहीतेन तत्स्वीकृतेन मनसा चित्तेन साधनेन स्वात्मान्तराकाशादिक्कालपरमाणुवायुमनःसु स्वात्मनि स्वात्मान्तरेषु च स्वस्मिन् आत्मनि अन्यात्मान्तरे परमात्मनि च आकाशे दिशि काले परमाणुषु [illegible] वायौ मनःसु तत्समवेतगुणकर्मसामान्यविशेषेषु तत्समवेताः तैः स्वात्मादिषु समवेताः ये गुणकर्मादयः तेषु समवाये च तत्कारणादिसमवाये च अवितथम् अविपर्यस्तं, स्वरूपदर्शने सर्वधर्मविमर्शपूर्वकमन्तर्बहिर्दिसर्वदेशकालच्छेदेन यथाभूतस्वरूपसाक्षात्कारः भवति । योगदर्शने पतञ्जलिराह । "योगश्चित्तवृत्तिनिरोधः „ योगः संशयविपर्ययरहितप्रतीतिभावः

मू = अस्मद्विशिष्टानां योगिनां युक्तानां योगजधर्मोऽनुगृहीतेन मनसा स्वात्मान्तराकाशादिक्कालपरमाणुवायुमनःसु तत्समवेतगुणकर्मसामान्यविशेषेषु समवाये चावितथं स्वरूपदर्शनमुत्पद्यते ॥

सविकल्पकनिर्विकल्पकसमाधिभेदाद् द्विविध इति । आत्मनः स्वाभाविकं स्वरूपमेवं प्रत्यक्षी भवति । "यदा योगी वेदान्तविदितमात्मस्वरूपम् "अहं तत्त्वतोऽनुजानीयाम् „ इति योजनाया बहिरिन्द्रियेभ्यो मनः प्रत्याहृत्य क्वचिदात्मप्रदेशे नियम्य एकाग्रतयाऽऽत्मानुचिन्तनमभ्यस्यति । तदाऽस्य तत्त्वज्ञानसंवर्तकधर्मोपधानक्रमेण अहंकारममत्वविमुक्तम् आत्मतत्त्वम् स्फुटीभवति । यदा परात्माकाशकालादिबुभुत्सया तदनुचिन्तनप्रवाहमभ्यस्यति, तदाऽस्य परात्मादितत्त्वज्ञानानुगुणोऽचिन्त्यप्रभावो धर्म उपचीयते । तद्बलात्तदन्तःकरणं बहिः शरीरात् निर्गत्य परात्मादिभिः संयुज्यते । तेषां संयोगात् । तद्गुणादिषु संयुक्तसमवायात् । समवायाऽभावयोः सम्बन्धविशेषणभावेन ज्ञानं जनयति । यथा च सूत्रम् "आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षम् „ वै॰द॰ ९।१।११ "तथा द्रव्यान्तरेषु प्रत्यक्षम् „ वै॰द॰ ९।१।१२ ॥

प्रा. भा.
भाष्य
१०८

युक्तानां प्रत्यक्षं व्याख्याय वियुक्तानां प्रत्यक्षं व्याचष्टे ॥ वियुक्तानामिति = अतियोगाऽभ्याससञ्चितधर्मबाहुल्यात् समाधि-
मन्तरेणापि येऽतीन्द्रियं वस्तु अवलोकयन्ति ते वियुक्ताः। यद्वा ध्यानं विनाऽपि सर्वसाक्षात्कर्तारः वियुक्ता इत्युच्यन्ते
तेषां वियुक्तानां योगिनां चतुष्टयसंनिकर्षात् "आत्मा, मनः, इन्द्रियाणि, अर्थाश्च" इति चतुष्टयं तस्य संनिकर्षात्

सू = वियुक्तानां पुनश्चतुष्टयसंनिकर्षात् योगजधर्मानुग्रहसामर्थ्यात्
सूक्ष्मव्यवहितविप्रकृष्टेषु प्रत्यक्षमुत्पद्यते ॥

योगजधर्मानुग्रहसामर्थ्यात्। योगात् जायते इति योगजः, योगजः धर्मः योगजधर्मः, तस्य योऽनुग्रहः
तस्य सामर्थ्यात् सहकारितात् तत्सामर्थ्यात् सूक्ष्मव्यवहितविप्रकृष्टेषु सूक्ष्मेषु मनःपरमाणुप्रभृतिषु व्यवहितेषु
नागभुवनादिषु विप्रकृष्टेषु ब्रह्मभुवनादिषु प्रत्यक्षं ज्ञानमुत्पद्यते इति विवेकः। यथा चोक्तं सूत्रे "असमाहि-
तान्तःकरणाः उपसंहृतसमाधयस्तेषाञ्च" वै. द. ९।१।१३।

सम्प्रति प्रत्यक्षं प्रमाणं विभजते॥ तत्रेति= तत्र सामान्यविशेषेषु सामान्यं सत्ता, द्रव्यत्वगुणत्वकर्मत्वादिकं विशेषः व्यक्तयः तेषु स्वरूपालोचनमात्रं स्वरूपग्रहणमात्रम्। विकल्परहितं प्रमाणं प्रमायां साधकतमत्वात् प्रत्यक्षम्। प्रमाणे तु निर्विकल्पके विशेषणज्ञानादिलक्षणे विशेष्यज्ञानादिलक्षणा प्रमा भवत्येवेति भावः। प्रमेयाः प्रमातुं योग्याः प्रमितिविषया इति यावत् द्रव्यादयः द्रव्यगुणकर्मसामान्यात्मकाः पदार्थाः प्रमितौ जातायां तेषु हानिलाभप्रभृतिव्यवहाराः वर्तन्ते। प्रमाता प्रमाविषयकर्ताऽऽत्मा बोधाश्रयत्वात्। प्रमितिः द्रव्यादिविषयं ज्ञानं यदा निर्विकल्पकं सामान्यविशेषज्ञानं प्रमाणं तदा द्रव्यादिविषयं विशिष्टं ज्ञानं प्रमितिरित्यर्थः। द्रव्यादिविषयं स्वरूपालोचनमात्रोत्तरं जायमानं प्रत्यक्षं द्रव्यत्वादिविशेषप्रकारकमित्यर्थः। ननु निर्विकल्पकसामान्यविशेषज्ञानमपि प्रमारूपमर्थप्रतीतिरूपत्वात्। सामान्येति= आलोचनमात्रम् आलोच्यतेऽनेनेत्यालोचनमिन्द्रियार्थसन्निकर्षः, तन्मात्रम्। अविभक्तं केवलं ज्ञानान्तरानपेक्षम् इति यावत्। सामान्यविशेषज्ञानोत्पत्तौ सामान्यविशेषयोर्ज्ञानप्रादुर्भावे प्रत्यक्षं प्रमाणमिति। विशेषज्ञानोत्पत्तयेऽपीन्द्रियार्थसन्निकर्षः प्रमाणं भवत्येव प्रमाहेतुत्वात् किन्तु विशेषणज्ञानसहकारितया न केवलः सन्निकर्षः। सामान्यविशेषज्ञानोत्पत्तौ तु ज्ञानानपेक्षः केवल इत्यभिप्रायः। तस्मिन् सामान्यविशेषज्ञानप्रत्यक्षे नान्यत् प्रमाणं ज्ञानरूपमस्ति अफलरूपत्वात् सामान्यविशेषज्ञानस्य ज्ञानफलत्वाऽभावात्। विशेष्यज्ञाने हि विशेषणज्ञानस्य फलमिति नियमः। परश्च विशेषणज्ञाने न ज्ञानान्तरफलम्। यद्वा प्रत्यक्षं प्रमाकरणत्वेन प्रमाणं भवतु न फले प्रमा भवतीत्यफलरूपे प्रमाणे न प्रमाणान्तरमस्ति फले हि प्रमायां प्रमाणं तत्साधकत्वेन प्रवर्तते। सति तस्मिन् अनवस्थाप्रसंगः इति। अतः विशेषणज्ञाने इन्द्रियार्थसन्निकर्षमात्रमेव प्रमाणमित्यर्थः।

मू॰= तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणं प्रमेयाः द्रव्यादयः पदार्थाः। प्रमाताऽऽत्मा, प्रमितिर्द्रव्यादिविषयं ज्ञानम्। सामान्यविशेषज्ञानोत्पत्तावविभक्तमालोचनमात्रं प्रत्यक्षं प्रमाणम्। तस्मिन्नान्यत् प्रमाणान्तरमस्ति। अफलरूपत्वात्। अथवा सर्वेषु पदार्थेषु चतुष्टयसन्निकर्षादवितथमव्यपदेश्यं यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षं प्रमाणं प्रमेया द्रव्यादयः पदार्थाः, प्रमाताऽऽत्मा, प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनमिति॥

सम्प्रति हानादिबुद्धीनां फलत्वे विशेष्यज्ञाने प्रमाणमित्याह॥ अथवेति= यद्वाऽन्यविधं प्रत्यक्षं प्रमाणमाह। सर्वेषु पदार्थेषु निखिलेषु पदार्थेषु चतुष्टयसन्निकर्षात् चतुष्टयमत्र ग्रहणमुदाहरणार्थं द्वयसन्निकर्षत्रयसन्निकर्षात् अवितथं संशयविपर्ययरहितम्। अव्यपदेश्यं व्यपदेशो भवेद्व्यपदेश्यं न व्यपदेश्यमव्यपदेश्यं शब्दाजन्यं यज्ज्ञानमुत्पद्यते जायते तत्प्रत्यक्षं प्रमाणम्। प्रमेया द्रव्यादयः पदार्थाः, प्रमाताऽऽत्मा, प्रमितिः गुणदोषमाध्यस्थ्यदर्शने गुणदर्शनमुपादेयत्वज्ञाने दोषदर्शने हेयत्वज्ञानं माध्यस्थ्यदर्शने न हेयं नोपादेयमिति ज्ञानम् प्रमितिः। पदार्थस्वरूपबोधे सति उपकारादिस्मरणात् सुखसाधनत्वादिविनिश्चये सति उपादेयादिज्ञानं भवत् पदार्थस्वरूपबोधस्यैव फलं भवति सुखस्मरणादीनामवान्तरव्यापारत्वात्। अन्ये त्वेवमाहुः। यदर्थस्य सुखसाधनत्वज्ञाने तद्गुणदर्शनम् उपादेयत्वज्ञानमपि तदेव। यद् दुःखसाधनत्वज्ञाने तद्दोषदर्शनं हेयत्वज्ञानमपि तदेव। यच्च न सुखसाधने न च दुःखसाधनमेतदिति ज्ञानं तत् माध्यस्थ्यम् न हेयं नोपादेयमिति ज्ञानम् प्रमितिः, शेषं पूर्ववत् इति प्रकरणसमाप्तौ श्री: श्री:

अनुमानज्ञानमाह ॥ लिङ्गेति = लिङ्गं व्याप्तिबलेन लीनम् अर्थं गमयतीति लिङ्गं तस्य लिङ्गस्य चिह्नस्य अङ्कस्येति वा दर्शनात् उपलब्धेः सञ्जायमानं सम्यगुत्पद्यमानम् " अत्र सम्यगर्थं वाचिनां संशयविपर्ययप्रभृतीनां व्युदासः ,, लैङ्गिकं तल्लिङ्गोपलब्धेः वस्तु भवति यथा वह्नेर्लिङ्गस्य धूमस्योपलब्धिरेव अग्निज्ञानं जनयति । यद्वा व्याप्तिविशिष्टः पक्षधर्मो लिङ्गम् । लिङ्गञ्च दृष्टमनुमितं श्रुतं वा यदनुमेयरूपं ज्ञानं जनयति । तल्लैङ्गिकं यथा च सूत्रम् "अस्येदं कार्यं कारणं संयोगि, विरोधि, समवायि, चेति लैङ्गिकम् ,, वै॰ द॰ ९।२।१। लिङ्गस्य लक्षणं निर्दिशति ॥ यदिति ॥ यद्वस्तु अनुमेयेन — अनुमातुं योग्यमनुमेयं तेन अनुमेयेन साध्येन प्रतिपिपादयिषितधर्मविशिष्टेन धर्मिणा साध्येन सम्बद्धं संयुक्तम् । तदन्वितेति = तदिति योग्यत्वेन साध्यधर्मः परामृश्यते, तदन्विते साध्यधर्मान्विते प्रसिद्धं सपक्षे प्रसिद्धम् ,, परिज्ञातमिति लिङ्गस्य साधारणबोध्येव च्छेदः "सिषाधयिषाविरहविशिष्टसिद्ध्यभावत्वं पक्षत्वम् । यद्वा स च पक्षः वादिना साध्यो धर्मः प्रतिपादयिषितो यत्र ,, तदभावे तदितीयत्र साध्यधर्मपरामर्शः । तस्य साध्यधर्मस्याभावे नास्त्येव न पुनरेकदेशेऽस्ति अपि च नैकान्तिकमनुच्छेदः

मू॰ = लिङ्ग दर्शनात् सञ्जायमानं लैङ्गिकम् । लिङ्गं पुनः । "यदनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते । तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥ १ ॥ यदनुमेयेनार्थेन देशविशेषे कालविशेषे वा सहचरितमनुमेयधर्मान्विते चान्यत्र सर्वस्मिन्नेकदेशे वा प्रसिद्धमनुमेयविपरीते च सर्वस्मिन् प्रमाणतोऽसन्न तु वाङ्मात्रेण असदेव तदप्रसिद्धार्थस्यानुमापकं लिङ्गं भवतीति ॥

तल्लिङ्गमनुमापकम् अनुमेयस्य ज्ञापकमित्यर्थः । अन्यत्र सपक्षे प्रसिद्धं प्रमाणेन प्रतीतम् । अनुमेयविपरीते साध्यव्यावृत्तिविषये तदसिद्धस्य अर्थस्य साध्यधर्मिणः अप्रतीतस्य अर्थस्य साध्यधर्मस्यानुमापकम् अनुज्ञापकं भवति । अनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते ,, इति अन्वयिनो लक्षणम् । अनुमेयेन सम्बद्धं तद्विपरीते च नास्त्येव इति व्यतिरेकिणो लक्षणम् । अन्वयव्यतिरेकिण इति साध्यसाधनत्वं सामान्यलक्षणं त्रयाणामिति ॥ श्री: श्री:

लिङ्गं व्याख्याय लिङ्गाभासं व्याचष्टे॥ विपरीतमिति = अतः उक्त [illegible] लक्षणात् लिङ्गात् एकेन लिङ्गलक्षणेन द्वितयेन लिङ्गलक्षणेन विपरीतं प्रतिकूलं यल्लिङ्गं स्यात् विरुद्धम्, असिद्धं सन्दिग्धं तत् कश्यपात्मजोऽलिङ्गमनुमेयाऽप्रतिपादकम् अब्रवीत् अकथयत्। "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चेति,, वै.द. ३।१।१५ अप्रसिद्ध इति अप्रसिद्धः अनपदेशः यो हेतुः स पक्षेन प्रसिद्धः सोऽप्रसिद्धः अनपदेशः अपदेशाभासविरुद्धाख्यो हेत्वाभास इत्यर्थः। अप्रसिद्धपदेन विरुद्धाऽसाधारणयोः परिग्रहः तयोः साध्यधर्मेण सह प्रसिद्ध्यभावात् अहेतुत्वम्। तत्र साध्याऽभावव्याप्यो हेतुर्विरुद्धः यथा "शब्दो गुणः चाक्षुषत्वात् अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् यद्वा पर्वतो वह्निमान् जलादित्यत्र जले वह्न्यभावव्याप्यत्वात् वह्निविरुद्धम्" यथोक्तं गौतमेन "सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः,, न्या.द. १।२।६ सर्वसपक्षविपक्षव्यावृत्तत्वे सति पक्षमात्रवृत्तित्वमसाधारणत्वं यथा शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दत्वं सर्वेभ्यो नित्येभ्यः परमाण्वाकाशादिभ्योऽनित्येभ्यः घटादिभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।

मू= विपरीतमतो यत्स्यादेकेन द्वितयेन वा। विरुद्धाऽसिद्धसंदिग्धमलिङ्गं काश्यपोऽब्रवीत् "२॥ यत् यथोक्तात् त्रिरूपाल्लिङ्गात् एकेन धर्मेण द्वाभ्यां वा विपरीतं तदनुमेयस्याधिगमे लिङ्गं न भवतीत्येतदेवाह सूत्रकारः "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चेति,, ३।१।१५

असन् असिद्धस्याभिधानम्। स हि सपक्षे साध्यधर्मेण सह प्रसिद्धोऽपि धर्मिणि वृत्त्यभावात् अहेतुः। यद्वा "पक्षधर्मान्यतररहितो हेतुः असिद्धः। उदयनाचार्यस्तु पक्षधर्मताज्ञानाभावः, व्याप्यस्य पक्षधर्मतया प्रमितिः सिद्धिः तदभावो ऽसिद्धिरित्याहुः। यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् इत्यत्र गगनारविन्दाऽभावात् पक्षाऽसिद्धिः। यस्मात् विषाणी तस्मात् अश्वः, अयं पशुः अश्वः विषाणित्वात् शशशृङ्गवत् अश्वे शृङ्गाणाम् असिद्धत्वम्। संदिग्धश्चेत्यनैकान्तिकाऽभिधानम्। सह धर्मिणि दृश्यमानः किं साध्यधर्मसहचरितः किं वा तद्रहितः इति संदिग्धो भवति, न पुनरेकं धर्ममुपस्थापयितुं शक्नोत्युभयथा दृष्टत्वादहेतुः। यद्वा साधारणाऽसाधारणानुपसंहारिभेदात् त्रिधाऽनैकान्तिकः। तत्र साध्याऽभाववद्वृत्तित्वं साधारणानैकान्तिकत्वं यथा पर्वतो वह्निमान् प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वादहेतुः। असाधारणस्य लक्षणोदाहरणे पूर्वं प्रतिपादिते। केवलान्वयिसाधकोऽनुपसंहारी यथा घटोऽभिधेयः प्रमेयत्वात् इत्यत्र प्रमेयत्वे केवलान्वयित्वं विद्यते न तु अन्वयव्यतिरेकित्वेन तत्र प्रतीतिः काचित् प्रतीयते॥

अविनाभावस्मरणात् अनुमेयप्रतीतौ अनुमाङ्गमिति दर्शयति ॥ विधिरिति = यत्र यत्र धूमः, तत्र तत्र अग्निः। यत्र यत्र धूमो न तत्र तत्र अग्निरपि नेत्यनुमाने विधिः अनुमेयप्रतीतिप्रकारः। एवममुना प्रकारेण प्रसिद्धसमयस्य प्रसिद्धाऽविनाभावस्य पुरुषस्य असन्दिग्धधूमदर्शनात् धूम एवायं न वाष्पधूल्यादिकमिति ज्ञानात् साहचर्योऽनुस्मरणात् सहचर्येनियमो व्याप्तिः, यत्र धूमस्तत्राग्निरित्येव स्मरणात्, तदनन्तरं व्याप्तिस्मरणानन्तरमग्न्यध्यवसायोऽग्निनिश्चयः "पर्वते वह्निमान् धूमात् महानसवत् इति निश्चयो भवति। एवमित्यं प्रकारेण यथा धूमो वह्नेर्लिङ्गम् एवं सर्वत्र सर्वस्मिन्नेव स्थाने देशाऽविनाभूतं कालाऽविनाभूतश्च इतरस्य लिङ्गम्। यथा देशाऽविनाभूते पत्रानदे यव नाडिकासंरक्षणं वनमालेषु अङ्कुरो वृक्षस्य लिङ्गमिति। देशाऽविनाभूतरहितत्वात्। एवं कालाऽविनाभूते यथा प्राग्ज्योतिषाधिपतेः मद्राजयपुराऽधिपतेः गृहे प्रातर्गायनादीनि नृपतिप्रबोधस्य लिङ्गम्। न च प्रातर्धूमदर्शनं सायं वह्न्यनुमानम्। इदानीन्तने पर्वतोऽयं वह्निमान् प्रातस्तनधूमदर्शनात्। यदि देशकालाऽविनाभावमात्रेण गमकत्वं तर्हि सूत्रविरोधः "अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति

मू॰ = विधिस्तु यत्र धूमस्तत्राग्निरग्न्यभावे धूमोऽपि न भवतीति एवं प्रसिद्धसमयस्याऽसंदिग्धधूमदर्शनात् साहचर्याऽनुस्मरणात् तदनन्तरमग्न्यध्यवसायो भवतीति। एवं सर्वत्र देशकालाऽविनाभूतमितरस्य लिङ्गम्। शास्त्रे कार्यादिग्रहणं निदर्शनार्थं कृतं नाऽवधारणार्थं कस्मात् व्यतिरेकदर्शनात् ॥

लैङ्गिकमिति,, वै॰ द॰ ९।२।१ तत्राह ॥ शास्त्र इति = शास्त्रे वैशेषिकदर्शनशास्त्रे "अस्येदं कार्यं कारणं —,, ९।२।१ सूत्रे कार्यादिग्रहणं कार्यादीनामुपादानं निदर्शनार्थं लिङ्गनिदर्शनार्थं कृतम्। न तु एतावन्ति एव लिङ्गानि इत्यवधारणार्थम् प्रतिनिश्चयार्थं कृतम्। कस्मात् इति तत्र हेतुमाह व्यतिरेकदर्शनात् कार्यादिव्यतिरेकेण अप्यनुमानदर्शनात् नाऽवधारणार्थम्।

श्रीः श्रीः

यत्र कार्यादीनां व्यतिरेकस्तद्दर्शयति ॥ तद्यथेति = उदाहरणं यथा अध्वर्युः होतारम् ओं ओंकारध्वनिं श्रावयति नान्यं यस्य पूर्वं अवगतिभूतस्य ओमिति श्रावयन्तम् अध्वर्युं प्रतीत्य कुड्यादिव्यवहिते होतरि अनुमानम्। होताऽत्रास्तीति इत्यत्र चाध्वर्युः होतुः कार्यं न कारणं न संयोगे न च विरोधे न समवाये चेति व्यतिरेकः। उदाहरणान्तरं यथा "चन्द्रोदय इति। यदा चन्द्रः उदेति तदा समुद्रो वर्द्धते कुमुदानि विकसन्ति इति नियमो येनाऽवगतः, तस्य चन्द्रोदयः समुद्रवृद्धेः कुमुदविकासस्य च लिङ्गं स्यात् न च चन्द्रोदयः समुद्रवृद्धिकुमुदविकाशयोः कार्यम्। उदयो हि चन्द्रस्य विशिष्टदेशसंयोगः स च चन्द्रक्रिया कार्यः न समुद्रवृद्ध्यादिनिमित्तः। अपरमुदाहरणं यथा शरदि शरत्काले आश्विनकार्तिकमासयोः जलप्रसादो जलस्वच्छता ऽगस्त्योदयस्य लिङ्गम्। कालान्तरे बहुदोषसम्प्राप्तेः न चैतत्। ~~कार्यादिव्यतिरिक्तानां~~ यथा सूत्रम् "अस्येदं कार्यकारणसम्बन्धश्चावयवाद्भवति" वै॰ द॰ ९।२।२। कार्यादिव्यतिरिक्तमपि यदि लिङ्गमस्ति तर्हि नूनं तत्र सर्वलिङ्गानाम्

मू॰ = तद्यथा अध्वर्युरोंश्रावयन् व्यवहितस्य होतुर्लिङ्गम्। चन्द्रोदयः समुद्रवृद्धेः कुमुदविकाशस्य च। शरदि जलप्रसादोऽगस्त्योदयस्येति। एवमादि तत्सर्वमस्येदमिति सम्बन्धमात्रवचनात् सिद्धम्। तत्तु द्विविधम्। दृष्टं सामान्यतो दृष्टं च। तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानम्। यथा गव्येव सास्नामात्रमुपलभ्य देशान्तरेऽपि सास्नामात्रदर्शनात् गवि प्रतिपत्तिः॥

नक्तोषोऽत आह ॥ एवमिति = अध्वर्युरोंश्रावयतीत्येवमादि यदाऽविनाभूतं लिङ्गं तत्सर्वमस्येदं कार्यं कार्यसम्बन्धश्चावयवाद्भवति" वै॰ द॰ ९।२।२ इति सूत्रे सम्बन्धमात्रवचनात् सम्बन्धमात्रकथनात् सिद्धं परिगृहीतमित्यर्थः। अनुमानभेदं [illegible] चष्टे ॥ तदिति = तदनुमानं द्विविधं द्विप्रकारकम्। दृष्टसामान्यतोदृष्टभेदात् तत्र तयोरनुमानयोर्मध्ये दृष्टमनुमानं प्रसिद्धसाध्ययोः। प्रसिद्धं यत्पूर्वं लिङ्गं तेन सह दृष्टम्। साध्यं यत्सम्प्रत्यनुमेयम् तयोः अत्यन्तमत्यर्थं जात्यभेदे भेदरहिते सति यदनुमानं तद्दृष्टम्। पूर्ववदिति यावत्। यथा धूमेन वह्न्यनुमानम्। यथा वा "गवि गोव्यक्तौ एव सास्नामात्रमुपलभ्य सास्नोपलब्ध्या देशान्तरेऽपरदेशे सास्नामात्रदर्शनात् सास्नामात्राऽवलोकनात् गवि गोजातिविशिष्टायामेव व्यक्तौ गोव्यक्तेरनुमानमत्यन्तजात्यभेदे इदं च दृष्टमित्याख्यायते। यथोक्तं सूत्रम् "विषाणी ककुद्मान् प्रान्ते वालधिः सास्नावान् इति गोत्वे दृष्टं लिङ्गम्" वै॰ द॰ २।१।८

अथ सामान्यतो दृष्टमनुमानमाह ॥ प्रसिद्धसाध्ययोरिति = प्रसिद्धं लिङ्गेन सह प्रतीतं साध्यमनुमेयं तयोः प्रसिद्धसाध्ययोः अत्यन्तजातिभेदे तीव्रजातिपृथक्त्वे सति लिङ्गं चाऽनुमेयधर्मश्च लिङ्गानुमेयधर्मौ तयोः सामान्ये लिङ्गानुमेयधर्मसामान्ये तयोः अनुवृत्तिर्लिङ्गानुमेयधर्मसामान्याऽनुवृत्तिः ततो लिङ्गसामान्यस्य साध्यसामान्येन सह अविनाभावात् यदनुमानं तत्सामान्यतो दृष्टम् । "साध्यताद्दूरदकहेतोताऽवधूरेदकव्यापकयोर्धर्मयोर्व्याप्तिग्रहे प्रवर्तमानमनुमानं सामान्यतो दृष्टमिति यावत् ॥ यथा च गन्धादिज्ञानानां क्रियात्वेन तत्करणं घ्राणादीन्द्रियाऽनुमानम् । यद्वा प्रवर्तित्वेन हेतुना वर्णाश्रमिणां वैदिककर्मसु प्रवृत्तेः फलवत्त्वाऽनुमानम् । यथा च दृष्टान्ते मूलस्थं दर्शयति । कर्षकस्य प्रवृत्तेः फले दृष्ट्वा वर्णाश्रमिभिः शस्यादिकं फलमनुमीयते । वणिजः राजपुरुषस्य च प्रवृत्तेः फलं का[?]मन्यादिकं वर्णाश्रमिणाञ्च प्रवृत्तेः फलं स्वर्गादिकमित्येनयोरत्यन्तजातिभेदः । दृष्टं प्रयोजनमिति कर्षकादिप्रवृत्तेः फलमुपलभ्य सम्प्राप्य वर्णाश्रमिणामपि पुरुषाणां दृष्टमहितगोचरं समुपागतं प्रयोजनं कारणमनुद्दि

मू॰ = प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गाऽनुमेयधर्मसामान्याऽनुवृत्तितोऽनुमानं सामान्यतो दृष्टम् । यथा कर्षकवणिग्राजपुरुषाणाञ्च प्रवृत्तेः फलवत्त्वमुपलभ्य वर्णाश्रमिणामपि दृष्टं प्रयोजनमनुद्दिश्य प्रवर्तमानानां फलाऽनुमानमिति । तत्र लिङ्गदर्शनं प्रमाणं प्रमितिरग्निज्ञानम् । अथवाऽग्निज्ञानमेव प्रमाणं प्रमितिरग्नौ गुणदोषमाध्यस्थ्यदर्शनमित्येतत् स्वनिश्चितार्थमनुमानम् ॥

श्यानङ्गीकृत्य प्रवर्तमानानां फलस्य अनुमानं भवति इति । यथा सन्त्येव तथाविधा मानवाः ये दृष्टमिरमिलापुकाः वामप्र[?]दिकं व्रतमाचरन्ति ॥ यथा वा "स्पर्शादिलिङ्गेन वाय्वनुमानम् ।" ज्ञानादिना चात्माऽनुमानम् । प्रमाणशब्दः करणव्युत्पत्तिसिद्धो न फलं विना पर्यवस्यति अतः प्रमाणफलविभागं दर्शयति ॥ तत्रेति = तत्राऽनुमाने लिङ्गदर्शनं लिङ्गज्ञानं प्रमाणं प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमितिः प्रमाणस्य फलम् अग्निज्ञानमन्यवबोध इति ॥ प्रकारान्तरमाह ॥ अथवेति = अग्निज्ञानम् अग्नेः ज्ञानमग्निज्ञानं तदेव प्रमाणं प्रमितिः प्रमाणस्य फलम् । अग्नौ वह्नौ गुणदोषमाध्यस्थ्यदर्शनं गुणदर्शनं सुखसाधनमेतदिति ज्ञानम् । दोषदर्शनं दुःखसाधनत्वज्ञानं माध्यस्थ्यदर्शनं सुखदुःखसाधनत्वाऽभावज्ञानमग्निज्ञाने सति तथाविधप्रतीत्युत्पादात् । एतदनुमानं स्वनिश्चितार्थं स्वनिश्चयार्थमेतदनुमानम् । एतत्स्वार्थोऽनुमानमिति भावः ॥

शब्दादीनामनुमानेऽन्तर्भावमाह ॥ शब्दादीनामिति = शब्द आदिपदात् उपमानम्, अभिनयः, अर्थापत्तिः, सम्भवः, अभावः, ऐतिह्यम् एतेषां ग्रहणम् इत्यादिप्रमाणानि अनुमानेऽन्तर्भवन्ति, समानविधित्वात्; अनुमानसदृशप्रकारहेतुत्वात् । यथा व्याप्त्याऽनुमीयतेऽनुमाने तथा शब्दादयोऽपीति । यथा च "शब्दोऽनुमानं व्याप्तिबलेन अर्थप्रतिपादकत्वात् धूमवत् । यथा येन प्रकारेण प्रसिद्धसमयस्य प्रसिद्धः प्रख्यातः समयोऽविनाभावो यस्य तादृशः प्रसिद्धसमयः तस्य प्रसिद्धसमयस्य मर्त्यस्य असन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यां सन्देहविरहविशिष्टं यल्लिङ्गं तस्य यद्दर्शनं यत्र यत्र धूमस्तत्र तत्राग्निरित्येवंभूताया: प्रसिद्धेः प्रख्यातेः अनुस्मरणं भूयः भूयः स्मृतिः ताभ्यां लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यां यथाऽतीन्द्रिये इन्द्रियाऽप्रत्यक्षेऽर्थेऽनुमानं तथा शब्दादिभ्योऽप्यनुमानमेव । शब्देऽनुमाने कथं भवतीत्यतः आह । प्रथमं गोशब्दोच्चारणत् वक्तुः ककुदादिमदर्थे विवक्षयाऽवगम्यते स्वसन्ताने गोशब्दोच्चारणस्य तदर्थे विवक्षापूर्वकत्वोपलम्भात् । तदर्थविवक्षया चाऽनुमानम् । यथा पुरुषो धर्मी ककुदादिमदर्थविवक्षावान् गोशब्दोच्चारणकर्तृत्वात् अहंवदिति । ननु यदि वक्तृद्वारेण शब्दोऽर्थोऽवबोधकः, तदा वेदवाक्यादर्थप्रत्ययो न घटते वक्तुरभावादत आह ॥

मू = शब्दादीनामप्यनुमानेऽन्तर्भावः समानविधित्वात् यथा प्रसिद्धसमयस्याऽसन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्दादिभ्योऽपीति । श्रुतिस्मृतिलक्षणेऽप्याम्नाये वक्तृप्रामाण्यापेक्षः । तद्वचनादाम्नायस्य प्रामाण्यम् । लिङ्गाच्चानित्यः शब्दः । वै. द. २।२।३२

श्रुतीति = श्रुतिर्वेदः स्मृतयो मन्वादिधर्मशास्त्राणि च श्रुतिस्मृती तयोर्लक्षणं श्रुतिस्मृतिलक्षणं यस्मिन् श्रुतिस्मृतिलक्षणः श्रुतिस्मृतिस्वरूपः आम्नायः वेदोऽपि वक्तृप्रामाण्यापेक्षः वक्तुः प्रामाण्यम् अपेक्षते । तद्वचनादाम्नायस्य प्रामाण्यम् ॥ वै. द. १।१।३ इति वचनात् तद्वचनात् तस्य ईश्वरस्य वचनात् कथनात् आम्नायस्य वेदस्य प्रामाण्यम् । शब्दो वक्तुरधीनत्वात् दुष्टो भवति न तु स्वभावतः दुष्टः शब्दः । यथा शब्दे कारणवर्णादि दोषाः वक्तृनराश्रयाः । न हि स्वभावतः शब्दो दुष्टोऽपुरुषाश्रयत्वात् ॥ इति वचनाद्वेदे न दोषसम्भवः ईश्वरविरचितत्वात् । वेदस्य नित्यत्वादन्यवक्तुरभावाच्च, तत्र दोषाणामनवकाशे सति निराशङ्कं प्रामाण्यं सिद्ध्यति तस्य । वैदिकज्ञानविषयस्तु विशेषतो मद्रचितवेदगौरवः निर्णेयताम् । शब्दाऽनित्यत्वे पूर्वपक्षयति लिङ्गादिति = लिङ्गात् लौकिकस्वरूपात् उत्पत्तिमत्त्वलिङ्गादित्यावत् । वर्णात्मकः शब्दोऽनित्यः, न च वैदिकज्ञानचर्णः । वैदिकस्तु शब्दो न श्रुतः । अपि च ज्ञानमेव हृदि लब्धमतो वेदज्ञानं नित्यमेवेत्यत्र नास्ति लेशमात्रोऽपि । यथा च सूत्रे लिङ्गाच्चानित्यः शब्दः ॥ वै. द. २।२।३२ तत्राऽनुमानं यथा वर्णात्मकः शब्दः अनित्यः जातिमत्त्वे सति श्रोत्रग्राह्यत्वात् वीणादिध्वनिवत् । इत्यत्र वर्णात्मको शब्दोऽनित्यः । कार्यरूपवर्णेभ्यः पृथक् कारणरूपानादिशब्दे सो विद्यमानोऽकारणस्य नित्यताऽनुमीयते ॥

ननु यदि शब्दोऽनित्यः तर्हि वेदोऽप्यनित्यः "गौरश्वः पुरुषो हस्ती" त्यस्मदाद्युच्चारणवदित्यत आह॥ बुद्धिपूर्वेति = "बुद्धिपूर्वा वाक्यकृतिर्वेदे" वै॰ द॰ ६।१।१ वेदे ऋग्वेदादौ वाक्यकृतिर्वाक्यरचना मंत्रोपदेशः बुद्धिपूर्वा - बुद्धिपूर्विका स्वार्थविषयकयथार्थज्ञानपूर्विका यथार्थरूपेणार्थः। यथा "स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः" यजुः। इत्यादिमंत्रैः सिद्धमेवेदं वेदे वाक्यरचना बुद्धिपूर्वा व्यवस्थापि परमात्मना। वेद इति वाक्यसमुदाय इत्यर्थः। वेदरचना स्वतन्त्रपुरुषविहिताऽस्ति। "वेदत्वञ्च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वम्। हेत्वन्तरमाह "बुद्धिपूर्वो ददातिः" वै॰ द॰ ६।१।३ वेदे ददातिरिति शब्दः बुद्धिपूर्वः बुद्धिपूर्वक इष्टसाधनत्वात् इतिकथनत्वात्। यथा "स्वर्गकामो गां दद्यात्" इत्यादौ यद्दानप्रतिपादने तद्दानेष्ट

मू॰ = बुद्धिपूर्वा वाक्यकृतिर्वेदे। बुद्धिपूर्वो ददातिरित्युक्तत्वात्। प्रसिद्धाऽभिनयस्य चेष्टया प्रतिपत्तिदर्शनात्। तदप्यनुमानमेव।

साधनताज्ञानजन्यम् ददातिः इतिधातुनिर्देशो धात्वर्थं दानमुपलक्षयति। हस्तनेत्रकटाक्षादिकमपि पृथक्प्रमाणं वदन्ति केचित्तदन्तर्भावमाह अनुमाने॥ प्रसिद्धेति = यन्मानवस्य प्रसिद्धो योऽभिनयः कराकुञ्चनादिलक्षणः, तस्य चेष्टया चेष्टाऽभिप्रायः। यथा हस्तस्य अवाङ्मुखाकुञ्चनादाह्वानप्रतीतिः। कार्यस्य प्रतिपत्तिदर्शनात् सिद्धिदर्शनात् अतः सोऽप्यभिमतः पृथक् प्रमाणभूतस्तिष्ठति। इति तांत्रिकाणामभिप्रायः। सोऽपि न। तदपि तत्प्रमाणमपि अनुमानेऽन्तर्भवति। यथाऽनुमाने व्याप्तिबलं तथाऽत्रापि। यत्र यत्र करस्य अवाङ्मुखाकुञ्चनं तत्र तत्र अपरस्याह्वानत्वमिति व्याप्तिः। व्याप्तिबलादनुमानमेव।

उपमानमप्यनुमानेऽन्तर्भवतीत्याह ॥ आप्तेनेति = सादृश्यज्ञानजन्यं, वैधर्म्यज्ञानजन्यं वा ज्ञानमुपमितिः । तत्र केनचिन्नागरिकेण आरण्यकः पृष्टः "गवयः कीदृशो भवति,, सोऽवादीद् यथा तव गौः, तथा गवयः इति । स एव नागरिको यदाऽरण्यं जगाम तदा गवयमवलोक्य स्मृताप्तवचनः अचिन्तयत् तत्पुरुषकथनमात्रेण प्रतीयते । यथा ते गौरस्ति तथा गवयोऽतोऽयं मदीयगवाकृतिसदृशोऽतोऽयं जीवः चेत्स्यात् गवयः एव । गोसदृशो गवय इतिज्ञानमुपमानमेव । तथा मूलकृदाह । आप्तेनेति = आप्तिः साक्षाद्दर्थस्य प्राप्तिः यथार्थोपलम्भः तथा वर्तते इत्याप्तः, साक्षात्कृतधर्मा तेनाप्तेन यथार्थवक्त्रा वने चरेण विदितगवयेन अप्रसिद्धस्य नागरिकपुरुषाज्ञातस्य गवयस्य पशुविशेषस्य प्रतिपादनात् सिद्धकरणात् उपमानमिति न्यायविदः विदुः । तदुपमानमाप्तवचनमेव । यथाप्तवचनस्य यथाप्तवचनस्य वाक्यार्थोऽनुमीयते तथा "यथा गौस्तथा गवय इत्यत्रापि अर्थस्मरणमेव । तस्मादुपमानस्याप्यनुमाने एकान्तर्भाव इति गोसदृशो गवय इत्यत्रोपमाने सदृशार्थप्रतिपादनेन पूर्वमीमांसकशबरस्वामिशिष्ययोश्च मतमपि परास्तम् । ननु अर्थापत्तिः पृथक् प्रमाणं स्यादित्यत आह ॥ दर्शनेति = प्रतीयमानादर्थात् यदर्थान्तरस्य कल्पना साऽर्थापत्तिः इति प्रभाकराः मीमांसकभेदाः प्रतिपादयन्ति यद्वा उपपाद्यान्यथाऽनुपपत्तिज्ञानादुपपादकज्ञानमर्थापत्तिः । सा च दृष्टार्थापत्तिः श्रुतार्थापत्तिभेदाद् द्विविधा । तत्र यथा यत्रार्थोऽन्य-

मू = आप्तेनाऽप्रसिद्धस्य गवयस्य गवा गवयप्रतिपादनात् उपमानमाप्तवचनमेव ।
दर्शनादर्थापत्तिर्विरोध्येव श्रवणादनुमिताऽनुमानम् ।

थाऽनुपपद्यमानोऽर्थान्तरं गमयति सा दृष्टार्थापत्तिः । यथा जीवतश्चैत्रो गृहे नास्तीत्यत्र गृहे चैत्रस्याऽभावः । जीवतीति श्रवणात् तत्र संभवोऽप्यसमर्थः, यतो चैत्रो बहिरास्ते । यत्राऽनुपपद्यमानः शब्दः शब्दान्तरं कल्पयति सा श्रुतार्थापत्तिः । यथा पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इति वाक्याद् रात्रौ भुङ्क्ते इति वाक्यैकदेशकल्पना । तत्र दृष्टार्थापत्तिः अनुमानाद् व्यतिरिक्ता इत्याह । दर्शनादर्थापत्तिर्विरोध्येव । दृश्यते इति दर्शनं दर्शनं च तदर्थश्चेति दर्शनार्थः पञ्चभिः प्रत्यक्षादिप्रमाणैः निश्चितोऽर्थः इति तस्माद् दर्शनार्थात् अर्थान्तरस्याऽऽपत्तिः अर्थान्तरस्यावगतिः विरोध्येव विरोध्यनुमानमेव । यस्य यथा नियमः तस्य तथैव लिङ्गम् । इह स्वपरप्रमाणाविरुद्ध एवार्थोऽर्थान्तराऽविनाभूतः इति विरोध्येव लिङ्गम् । अत्र तु सति बहिर्भवने गृहाभावस्यासिद्धिरेव, दृष्टमेतत् । अव्यापकं द्रव्यमेकत्र विद्यते न तदन्यत्र यथा रविः पूर्वपश्चिमयोरन्यतरस्यां सम्प्राप्यमाणः न तदन्यत्रोपलभ्यते, सर्वमेतद् दर्शनबलेनैवाऽवधार्यते तथा जीवितो चैत्रस्य गृहाभावो बहिर्भावे सत्युपपद्यते नान्यथा । विरोधे तु वैधर्म्यमात्रमेव । यथाऽनुमानं देवदत्तो बहिरस्ति जीवनसम्बन्धित्वे सति गृहेऽनुपलभ्यमानत्वात् अहमिवेति । एवं ज्ञायते दृष्टार्थापत्तेरनुमाने एकान्तर्भावः । श्रुतार्थापत्तिमन्तर्भावयति । श्रवणादनुमिताऽनुमानम् । पीनोऽयं देवदत्तो दिवा न भुङ्क्ते इति वाक्ये श्रवणादनुमीयते रात्रिभोजी मानवोऽयं दिवाऽभुञ्जानत्वे सति पीनत्वसम्बन्धात् । केवलव्यतिरेकानुमानेनैव तत्सिद्धौ तस्याः अकिञ्चित्करत्वमिति । लिङ्गभूतेन वाक्येनाऽनुमितात् पीनत्वात् तत्कारणस्य रात्रिभोजनस्याऽनुमानात् अतः सिद्धमेवेदं दृष्टार्थापत्तिश्रुतार्थापत्त्योरनुमानेऽन्तर्भाव इति । यथा च सूत्रम् "अस्येदमिति बुद्ध्यपेक्षितत्वात्,, वै. द. ९।२।२ ॥

संभवोऽप्यनुमानान्न व्यतिरिक्त इत्यत आह ॥ सम्भव इति = सम्भवप्रमाणं ज्योतिर्विदामेव । "सम्भवो नामाऽविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणम्" । शते सहस्रे सम्भवति । यद्वा मुकुगणनयाऽमुके घस्ते चन्द्रग्रहणसम्भव इति वचनात्सम्भवप्रमाणम् । स च सम्भवो द्विविधः । सम्भवनात्मको निर्णयात्मकश्च । एकस्योदाहरणं पूर्वमुक्तमेव । अपरस्त्विदम् "ब्राह्मणेषु चतुर्दशविद्यासिद्धत्वं संभवतीति । चतुर्दशविद्याश्चैताः । "ऋग्वेदश्च यजुर्वेदः सामवेदोऽथर्ववेदः । शिक्षा कल्पो व्याकरणं ज्योतिश्छन्दो निरुक्तयः १ मीमांसा तर्कशास्त्रं च पुराणं धर्मशास्त्रकम् । विद्याश्चतुर्दशैताश्च प्रसिद्धार्थनिदानकाः २ अन्या अपि विद्या विद्यन्ते कुतश्चतुर्दशत्वमिति । अन्तर्भावमाहुः वेदान्तस्य मीमांसायां वैशेषिकस्य तर्के, सांख्यपातञ्जलपाशुपतवैष्णवरामायणभारतादीनां धर्मशास्त्रे । उपपुराणानां पुराणेष्वन्तर्भाव इति । निर्णयात्मकः संभवोऽधुना प्रदर्श्यते । न च शते पञ्चाशत्, इति निर्णयात्मकस्य संभवस्य पृथक् प्रामाण्यमिति वाच्यम् । अनुमानान्तर्भावात् । यथा शतवान् इत्युक्ते पञ्चाशद्वान् इति ज्ञाने सम्भवति तस्यानुमाने नैव निर्वाहदर्शनात् । तस्य पञ्चाशद्वत्त्वव्याप्यत्वादिति । यथाऽनुमानम् । अयं पञ्चाशद्वान् शतवत्त्वात् सहस्रास्वामीवाऽमुकवत्, यो यः शतवान् स स पञ्चाशद्वानिति व्याप्तेः । तेन शतात् पञ्चाशज्ज्ञानमनुमानमेव न संभव इति । अभावमनुमानेऽन्तर्भावयति ॥ अभाव इति = विरोधिसत्तानां विरोधिनो ज्ञानमभावः । यद्वा "यस्याग्रहणे प्रतियोगी न गृह्यते, सा सत्तामात्रा योऽन्यस्य प्रतियोगिनोऽनुपलब्धिः अभाव इति यावत् । अथवा "प्रतियोगिज्ञानाऽधीनज्ञानविषयत्वमभावत्वम् । यथा इह भूतले घटाऽभावः इत्यत्र अभावप्रतियोगी घटः तस्य ज्ञानपूर्वकत्वे ज्ञानविषयत्वमभावस्येत्यर्थः

मू=सम्भवोऽप्यविनाभावित्वादनुमानमेव । अभावोऽप्यनुमानमेव । यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम् । एवमनुत्पन्नं कार्यं कारणसद्भावे लिङ्गम् ॥

र्थः । अर्थो ऽत्र हि यावद् घटज्ञानं तावदभावज्ञानमपि नोत्पद्यते भावाऽधीनाभावज्ञानत्वात् । स चाभावः प्रागभावप्रध्वंसाभावेतरेतराऽभावात्यन्ताभावभेदाच्चतुर्धा । तत्र प्रागुत्पत्तेः कारणेषु कार्यस्याभावः प्रागभावः । स चानादिरप्यनित्य एव, कार्योत्पादेन तस्य विनाशात् । अविनाशे च कार्यस्योत्पत्त्यभावात् । यथा इह कपाले घटो भविष्यति । उत्पन्नस्य स्वरूपप्रच्युतिः प्रध्वंसाऽभावः । स च सादिरनन्तः, कार्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्यर्थः । स च ध्वस्त इति प्रत्ययविषयः यथा घटो नष्टः । तादात्म्यसंबन्धाऽवच्छिन्नप्रतियोगिकोऽभावस्त्वितरेतराऽभावत्वम् । स च सर्वत्र एकः नित्य एव, पिण्डविनाशेऽपि सत्तावत् शरीरान्तरे प्रत्यभिज्ञानात् । यथा सामान्यमदृष्टवशादुपजायमाने नैव पिण्डेन सह सम्बध्यते नित्यत्वस्य स्वभावसिद्धं तथाऽन्योन्याभावोऽपि सामान्ये शरीरग्रहणमात्रेण सामान्यग्रहणमन्योन्याऽभावग्रहणं न प्रतियोगि सापेक्षं पररूपनिरूपणीयत्वात् इति यथा घटः पटो नेति ॥ असतः प्रतिषेधोऽत्यन्ताऽभावः । स च नित्यः यथा वायौ रूपं नास्ति यद्वाऽयं वन्ध्यापुत्रः । अभावः पृथक्प्रमाणमिति विवादः केषांचिद्विदुषां स च न स्वीक्रियते वैशेषिकैः । तेऽनुमानेऽन्तर्भावयन्त्यभावम् । यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम् । यथोत्पन्ने कार्येऽनुमीयते कारणम्, इदं कार्यं कारणवत् उत्पत्तिमत्त्वाद् घटवत् । इत्यत्र कारणसद्भावे लिङ्गमेव । एवं तथाऽनुत्पन्नं कार्यं कारणसद्भावे लिङ्गम् । यथा ईश्वरोऽनुत्पत्तिमान् अनादित्वात् पृथिव्यादिपरमाणुवत् इत्यत्रानुत्पन्नं कार्यं कारणसद्भावे लिङ्गम् । लिङ्गज्ञानाल्लैङ्गिकज्ञानमतोऽभावोऽप्यनुमानेऽन्तर्भवति यथा च सूत्रम् "अविद्यमानवर्षकर्मणो विद्यमानस्य वाय्वभ्रसंयोगस्य लैङ्गिकम्" वै० द० "अस्येदमिति बुद्ध्यपेक्षितत्वात्", वै० द० ९।२।५ ।

ननु ऐतिह्यं प्रमाणं त्ववश्यमेवेत्यतः आह "तथेति= तथैव तेनैव प्रकारेण शब्दादिवत् ऐतिह्यं प्रमाणमपि पौराणिका मन्यन्ति। किं नाम ऐतिह्यमित्यत आह " ऐतिह्यमविज्ञातप्रवक्तृकं प्रवादपारम्पर्यम्।" इति, "ह, इतिनिपातसमुदायः पुरावृत्ते वर्तते तस्य भावः ऐतिह्यम्" अत्र स्वार्थे ष्यञ् प्रत्ययः। यथा इह वटे यक्षो वसति, यद्वा मधूकरो गौरी

मू= तथैवैतिह्यमप्यवितथमाप्तोपदेश एव ॥

चेति। तदपि प्रमाणमवितथम् सत्यमेव आप्तोपदेशो निश्चितमेव। यदि वटे यक्षो वसतीति प्रोक्तं तदाऽऽप्तोपदेशः; यदि नाप्रोक्तं तदा न प्रमाणमुभयथा प्रमाणान्तराप्तिरिकत्वे शब्दान्तर्निवेशादनुमानमेव। यथा शब्दोऽनुमानेऽन्तर्भवति, तदा शब्दरूपत्वादस्याऽपि अनुमानेऽन्तर्भाव इति शम्। श्री:

श्री:

श्री:

श्री:

पराऽर्थोऽनुमानव्युत्पादनार्थमाह ॥ पञ्चाऽवयवेनेति = प्रतिपाद्यस्य अर्थस्य शब्दसमूहप्रतीतौ पञ्च भागाः सन्तीत्यत आह पञ्चाऽवयवेति। पञ्चाऽवयवेन पञ्च अवयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि यत्रेति पञ्चावयवं तेन पञ्चाऽवयवेन वाक्येन पदसमुदायेन स्वनिश्चितार्थप्रतिपादनं स्वनिश्चितार्थः साध्यः तस्य लिङ्गप्रतिपादनमेव अनान्तरव्यापारीकृत्य पञ्चाऽवयवेन वाक्येन प्रतिपादने तत्प्रतिपादकत्वाच्छब्दप्रयोगः परार्थोऽनुमानमिति। स्वोक्तिं पुनर्द्रढयति। पञ्चाऽवयवेनेति। केषांचिन्मते परार्थानुमाने द्व्यवयववत्। अपरेषां मते त्र्यवयवि। एतन्निराकरणाय एवपदप्रयोगः। पञ्चाऽवयवेनैव वाक्येन संशयितविपर्यस्ताव्युत्पन्नानां प्रतिपाद्योऽर्थो यस्य संशय्यः स संशयितः। प्रतिपाद्योऽर्थो यस्य विपर्ययज्ञाने स विपरीतः। प्रतिपाद्योऽर्थेन संशयो न विपर्ययः किंतु स्वज्ञानमात्रं सोऽव्युत्पन्नः, तेषां संशयितविपर्यस्ताव्युत्पन्नानां परेषामन्येषां स्वनिश्चितार्थप्रतिपादनं पराऽर्थोऽनुमानं विज्ञेयम्। यथा पर्वतो वह्निमान् धूमवत्त्वात् यो यो धूमवान्, स स वह्निमान्, यथा महानसः तथा चायं तस्मात्तथा, समन्वयो

मू = पञ्चाऽवयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं परार्थोऽनुमानम्। पञ्चावयवेनैव वाक्येन संशयितविपर्यस्ताव्युत्पन्नानां परेषां स्वनिश्चितार्थप्रतिपादनं परार्थोऽनुमानं विज्ञेयम्। अवयवाः पुनः प्रतिज्ञाऽपदेशनिदर्शनाऽनुसन्धानप्रत्याम्नायाः॥

यथा "पर्वतो वह्निमानि प्रतिज्ञा १ धूमवत्त्वादिति हेतुः २ यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्युदाहरणम् ३ तथा चायमित्युपनयः ४ तस्मात्तथेति निगमनम् इति पञ्च अवयवाः सिद्धाः। परार्थोऽनुमानप्रसंगात् स्वार्थोऽनुमानमपि प्रदर्श्यते यथा स्वप्रतिपत्तिहेतुः स्वार्थोऽनुमानम्। तथाहि स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गत्वा तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः इतिज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमान् इतिज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थोऽनुमानमिति ॥ पञ्च अवयवाः के तत्राह ॥ अवयवा इति = प्रतिज्ञा, अपदेशः हेतुः। निदर्शनमुदाहरणम्। अनुसन्धानमुपनयः। प्रत्याम्नायो निगमनम्। पुनः शब्दोऽत्र वाक्यशोभार्थे स्पष्टमन्यत्। पञ्चैवेमे अवयवा इति गौतमः। उदाहरणोपनयनिगमनानि, प्रतिज्ञाहेतूदाहरणानि वेति त्रय एवेति सांख्ययोगपूर्वमीमांसककर्तारः। उदाहरणमुपनयश्चेति द्वौ एव अवयवौ इति बौद्धाः, उपनय इत्येके एवावयवा इत्येके।

प्रतिज्ञां निर्दिशति = तत्रेति = तत्र तेषां पञ्चानामवयवानां मध्येऽनुमेयस्योद्देशो अनुमातुं योग्यमनुमेयं तस्योद्देशः लक्ष्यदेशः अविरोधी विरुद्धार्थरहितः इति प्रतिज्ञा। पुनर्द्रढयति भाष्यकारः प्रतिपिपादेति = प्रतिपिपादयिषितधर्मविशिष्टस्य प्रतिपादयितुमिष्टा प्रतिपिपादयिषा तया युक्तः प्रतिपिपादयिषितः यः धर्मः साध्य इत्यर्थः तेन विशिष्टः युक्तः पक्षः, तथाभूतस्य धर्मिणः साध्यविरहवतः इति भावः। अपदेशविषयम् अपदेशो हेतुः तस्य विषयमाश्रयम् आपादयितुं साधयितुम् उद्देशमात्रं संकीर्तनमात्रं प्रतिज्ञा। यथा च "साध्यनिर्देशः प्रतिज्ञा" न्या० द० १।१।३३ यथा उदाहरणं "द्रव्यं वायुः" इति यो वायुः प्रतिपाद्यमानोऽपि तस्य द्रव्यत्वं न प्रतिपाद्यते तं प्रति साधयितुमिष्टेन द्रव्यत्वेन विशिष्टस्य वायोरभिधानं प्रतिज्ञा क्रियते द्रव्यं वायुरिति। प्रतिज्ञालक्षणेऽविरोधिग्रहणतत्त्वं निर्दिशति॥ अविरोधीति = अनुमेयोद्देशोऽविरोधी प्रतिज्ञा" इति लक्षणे यदि अविरोधिपदग्रहणं न स्यात्तदा प्रत्यक्षादिविरुद्धान्यपि वचनानि प्रतिज्ञाभासानि भवेयुस्तदर्थस्य साधयितुमशक्यत्वादतोऽविरोधिपदं गृहीतम्। यथाऽनुष्णोऽग्निरिति प्रतिज्ञानुमाप्यां भवितुं नार्हति। यतोऽनुष्णत्वं प्रत्यक्षेण विरुध्यतेऽग्नौ अतः प्रत्यक्षविरोधी। एवमनुमानविरोधिदृष्टान्ते यथा घनमिति =

मू- तत्राऽनुमेयोद्देशोऽविरोधी प्रतिज्ञा। प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशविषयमापादयितुमुद्देशमात्रं प्रतिज्ञा यथा द्रव्यं वायुरिति। अविरोधिग्रहणात् प्रत्यक्षानुमानाभ्युपगतस्वशास्त्रवचनविरोधिनो निरस्ता भवन्ति। यथाऽनुष्णोऽग्निरिति प्रत्यक्षविरोधी। घनमम्बरमित्यनुमानविरोधी। ब्राह्मणेन सुरा पेयेत्यागमविरोधी। वैशेषिकस्य प्रागुत्पत्तेः सत्कार्यमिति ब्रुवतः स्वशास्त्रविरोधी। न शब्दोऽर्थप्रत्यायक इति स्ववचनविरोधी॥

अनुपपन्नमाकाशस्य घनत्वं तन्निरवयवत्वादतो घनमम्बरमित्यनुमानेन विरुध्यते प्रतिज्ञा। आगमविरोध्युदाहरणं वदति। ब्राह्मणेनेति = ब्राह्मणस्य सुरापानं निषिद्धं शास्त्रे, दुग्धपानं समुद्दिष्टमत्र प्रतिज्ञायां तु "ब्राह्मणेन सुरा पेया" इति विरुद्धमत एव आगमविरोधी। यतो ब्राह्मणेन सुरा पेयेत्यागमेन विरुध्यतेऽतो नैषा प्रतिज्ञा। स्वशास्त्रविरोध्युदाहरणं विभजते॥ वैशेषिकस्येति = वैशेषिकस्य कार्यं प्रागुत्पत्तेः सत् उपलब्धिमत्त्वात् इति स्वशास्त्रविरोधी यतो वैशेषिकशास्त्रे असत्कार्यमुपपद्यते परन्त्वनेन वादिना वैशेषिकशास्त्रं प्रमाणीकृत्य निजमतं साधयितुं प्रयत्यते इति॥ स्ववचनविरोधिनमुदाहरति। नेति = शब्दो नार्थप्रत्यायकः न अर्थनिश्चेता, इत्यत्र स्ववचनविरोधो यथा न अर्थप्रत्यायक इत्यपि शब्दः। यदि अस्याऽपि कश्चिदर्थो न विद्येत तर्हि शब्दो नार्थप्रत्यायक इति सिध्येत, परं नैतत्भवति यदाऽस्यापि कश्चिदर्थः उपलभ्यते तदा नियम्यते "न शब्दोऽर्थप्रत्यायकः इति वदतो व्याघातः॥

हेतुं प्रतिपादयति॥ लिङ्गेति= अनुमाने लिङ्गवचनं लिङ्गं पुनः व्याप्तिविशिष्टपक्षधर्मतालिङ्गं तस्य वचनं कथनमपदेशोऽपदिश्यते निर्दिश्यते अनेन ज्ञायतेऽनेनेत्यपदेशः हेतुर्भवति। यथा च सूत्रम् "हेतुरपदेशो लिङ्गं प्रमाणं करणमित्यनर्थान्तरम्" वै.द. ९।२।४ लिङ्गवचनं व्याख्यायते भाष्यकृता॥ यदिति= यत् लिङ्गमनुमेयेन वस्तुना सह चरितं सहवासि भवेत् तदेव तत्समानजातीये तस्यानुमेयवस्तुनः समानजातीये सर्वत्र सर्वस्मिन् स्थले सामान्येन प्रसिद्धं समानत्वेन प्रसिद्धं तद्विपरीते सर्वस्मिन् तदनुमेयपदार्थात् विरुद्धे पदार्थेऽसदेव अविद्यमानमेव भवेत्तल्लिङ्गं प्रमाणमुक्तं तस्य वचनं कथनमपदेश इत्युच्यते यथा च सूत्रम् "प्रसिद्धिपूर्वकत्वादपदेशस्य" वै.द. ३।१।१४ उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः" न्या.द. १।१।३४ समन्वयमाह॥ यथेति= द्रव्यं वायुरिति प्रतिज्ञा पूर्वमुक्ता, क्रियावत्त्वात् गुणवत्त्वाच्च इति हेतुः। क्रियाऽस्मिन्नस्तीति क्रियावान् तस्य भावः क्रियावत्त्वं तस्मात् क्रियावत्त्वात् क्रियावत्त्वस्य लिङ्गस्य वचनमपदेशः। यद्वा द्रव्यं वायुः गुणवत्त्वात् गुणोऽस्मिन्नस्तीति गुणवान् तस्य भावः गुणवत्त्वं तस्माद् गुणवत्त्वात्

मू= लिङ्गवचनमपदेशः। यदनुमेयेन सहचरितं तत्समानजातीये सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन्नसदेव तल्लिङ्गमुक्तं तस्य वचनमपदेशः। यथा क्रियावत्त्वाद् गुणवत्त्वाच्च, तथा च तदनुमेयेऽस्ति तत्समानजातीये च सर्वस्मिन् गुणवत्त्वमसर्वस्मिन् क्रियावत्त्वम्। उभयमप्येतद्द्रव्ये नास्त्येव तस्मात्तस्य वचनमपदेश इति सिद्धम्। एतेनासिद्धविरुद्धसन्दिग्धानध्यवसितवचनानामनपदेशत्वमुक्तं भवति॥

गुणवत्त्वस्य लिङ्गस्य गुणवत्त्वादिति वचनमपदेशः। तथा च समन्वयो यथा। तद्गुणवत्त्वमनुमेये वायौ विद्यते, तत्समानजातीये सपक्षे द्रव्ये सर्वस्मिन्, असर्वस्मिन् सपक्षैकदेशे मूर्तद्रव्यमात्रे क्रियावत्त्वमस्ति। उभयं क्रियावत्त्वं गुणवत्त्वं चैतत् नास्त्येव अद्रव्ये पक्षे। तस्मात्कारणात् तस्य उभयस्य "क्रियावत्त्वाद् गुणवत्त्वाच्च" इति वचनं कथनमपदेशः हेतुः इति सिद्धम् व्यवस्थितम्। हेत्वाभासान् निरूपयति॥ एतेनेति= एतेन अपदेशलक्षणकथनेन असिद्धविरुद्धसन्दिग्धानध्यवसितानामनपदेशत्वं हेत्वाभासत्वमुक्तं कथितं भवति। कार्यमविवक्षितेस्वभावभेदेनमपदेशः। यथा च सूत्रम् "अर्थान्तरं ह्यनर्थान्तरस्यानपदेशः" वै.द. ३।१।८ श्रीः

श्रीः श्रीः

अथेदमसिद्धहेत्वाभासं निरूपयति॥ तत्रेति = तत्र चतुर्विधहेत्वाभासानां मध्येऽसिद्धो हेत्वाभासश्चतुर्विधः। १उभयाऽसिद्धः २अन्यतराऽसिद्धः ३तद्भावाऽसिद्धः ४अनुमेयाऽसिद्धः। तत्र चतुर्विधेषु उभयासिद्ध उच्यते वादिप्रतिवादिनोः पूर्वपक्षोत्तरपक्षिणोः उभयोरसिद्धः। वादिप्रतिवादिनौ यं हेतुं न मन्येताम् सः उभयाऽसिद्धः। यथाऽनित्यः शब्दः सावयवत्वात् .. इत्यत्र सावयवत्वादिति हेतुरुभयासिद्धः यतः, अवयवित्वं शब्दे न सिद्ध्यति यत् यत् सावयवि तत्तद् द्रव्यं यथा घटः, तादृशत्वं शब्दे नास्ति शब्दश्च गुणो यथा रूपम्। अन्यतरासिद्धमाह अन्यतरेति वादिप्रतिवादिनोर्मध्ये एकस्यासिद्धत्वमन्यतरासिद्धत्वम्। यथाऽनित्यः शब्दः कार्यत्वात्, शब्दस्य कार्यत्वं नैयायिकैस्तु स्वीकृतं परं न मीमांसकैः। मीमांसकास्तु नित्यत्वं शब्दे साधयन्ति। यत्र नित्यत्वं तत्र न कार्यत्वमिति सिद्धान्तः अतोऽन्यतराऽसिद्धः। तद्भावाऽसिद्धं प्रदर्शयति॥ तद्भावेति हेतो हेतुवदव्याप्तत्वं तद्भावाऽसिद्धत्वम्। यथाऽन्यधिगतो अनुपलब्धौ कर्तव्यायां धूमभावेन धूमत्वेनोपन्यस्यमानो धार्यमाणो बाष्पो धूमभावेन धूमत्वेन स्वस्वरूपेणाऽसिद्धः। यथाऽयं देशोऽग्निमान् बाष्पत्वात् इत्यत्र बाष्पस्य धूमाऽसिद्धत्वात् तद्भावाऽसिद्धः, बाष्पोपलब्धौ अनुपलब्धेः। अनुमेयासिद्धमुदाहरति॥ अनुमेयेति = पक्षस्याऽभाववत्त्वमनुमेयाऽसिद्धत्वम्। यथा पार्थिवं द्रव्यं तमः कृष्णरूपत्वात् इत्यत्र पूर्वं तमसो द्रव्यत्वमपि न सिद्ध्यति यद्वा द्रव्यान्तरत्वं न सिद्ध्यति। प्रौढप्रकाशकतेजःसामान्याऽभाव एव तम इत्युक्तेः। कुतस्तस्याऽनुमेयत्वं सिद्धम्। आलोकाऽभावस्य आरोपितस्य कार्ष्ण्यमात्रस्य प्रतीतेरतो तमो द्रव्यं पार्थिवं कृष्णरूपत्वादिति अनुमेयासिद्धो हेत्वाभास इति॥

मू= तत्राऽसिद्धश्चतुर्विधः। उभयासिद्धोऽन्यतराऽसिद्धस्तद्भावाऽसिद्धोऽनुमेयासिद्धश्चेति। तत्रोभयासिद्धः उभयोर्वादिप्रतिवादिनोरसिद्धः। यथाऽनित्यः शब्दः सावयवत्वात्। अन्यतराऽसिद्धः, यथाऽनित्यः शब्दः कार्यत्वादिति। तद्भावाऽसिद्धो यथा धूमभावेनाऽग्न्यधिगतौ कर्तव्यायामुपन्यस्यमानो बाष्पो धूमभावेनाऽसिद्ध इति। अनुमेयाऽसिद्धो यथा पार्थिवं द्रव्यं तमः कृष्णरूपत्वादिति॥

श्रीः श्रीः श्रीः

विरुद्धहेत्वाभासमुदाहरति॥ य इति = यो हेतुः अनुमेये साध्ये वस्तुनि अविद्यमानेऽवर्तमानेऽपि तत्समानजातीये हेतुशून्यसाध्यपक्षे सर्वस्मिन् सर्वत्र नास्ति न विद्यते, तद्विपरीते तच्छून्यसाध्यविपक्षेऽस्ति विद्यते स हेतुः विपरीतसाधनात् विरुद्धकार्यप्रतिपत्तेः विरुद्ध एव हेत्वाभासः। यथाऽयं पशुरश्वो विषाणित्वात् इत्यत्र विषाणित्वं साध्ये ऽश्वे नास्ति तद्विपरीते गवि महिष्यादौ च विद्यतेऽतो विरुद्धोऽयं हे[redacted]तुः। यथा विरुद्धलक्षणम् "साध्याव्यापकीभूताऽभावप्रतियोगित्वं विरुद्धत्वम्। यद्वा "साध्याभावनिश्चयफलको हेत्वाभासो विरुद्धः। यथा च सूत्रम् "यस्माद्विषाणी तस्मादश्वः" वै॰ द॰ ३।१।१६ संदिग्धहेत्वाभासमुदाहरति॥ य इति = इत्यत्र तु अव्ययैक। यस्तु योऽपि हेतुः अनुमेये साध्ये पदार्थे सन् विद्यमानः तत्समानाऽसमानजातीययोः तदनुमेयसपक्षविपक्षजातिद्वययोः साधारणः सन् साधारणधर्मविशिष्टः सन्नेव वर्तेत, न त्वसाधारणधर्मविशिष्टो भवेत् स सन्देहजनकत्वात् संशयोत्पादकत्वात् स सन्दिग्धो हेत्वाभासः। प्रकरणसमसत्प्रतिपक्षौ च तन्नामान्तरौ इति। यथाऽयं पशुर्गौ विषाणित्वात्, इत्यत्र विषाणित्वं गव्यपि महिषेऽपि दृश्यतेऽतः सन्दिह्यते पुरुषैः किमयं गौर्वा महिष इति। यथा

मू॰ = यो ह्यनुमेयेऽविद्यमानेऽपि तत्समानजातीये सर्वस्मिन्नास्ति तद्विपरीते चास्ति स विपरीतसाधनाद्विरुद्धः। यथा यस्माद्विषाणी तस्मादश्व इति। यस्तु सन्ननुमेये तत्समानाऽसमानजातीययोः साधारणः सन्नेव स सन्देहजनकत्वात्सन्दिग्धः। यथा यस्माद्विषाणी तस्माद्गौरिति। एकस्मिंश्च द्वयोर्हेत्वोर्यथोक्तलक्षणयोर्विरुद्धयोः सन्निपाते सति संशयदर्शनादयमन्यः सन्दिग्ध इति केचित्। यथा मूर्तत्वामूर्तत्वं प्रति मनसः क्रियावत्त्वाऽस्पर्शवत्त्वयोरिति॥

च सूत्रम्। "यस्माद्विषाणी तस्माद्गौरिति चानैकान्तिकस्योदाहरणम्" वै॰ द॰ ३।१।१७ प्रकारान्तरेण संदिग्धो लक्ष्यते॥ एकस्मिंश्चेति = एकस्मिन् साध्ये यथोक्तलक्षणयोः तुल्यबलयोः विरुद्धार्थप्रसाधकयोः विरुद्धयोः द्वयोर्हेत्वोः संनिपाते सति संश्लिष्टे सम्यक्तया पतिते सति संशयदर्शनात्संदेहाऽवलोकनात् अथ विरुद्धद्वयसंनिपातोऽन्यः संदिग्धो हेत्वाभासो भवतीति केचित् स्वीकुर्वन्ति। यथा मनसः चितस्य क्रियावत्त्वास्पर्शवत्त्वयोः मूर्तत्वामूर्तत्वं प्रति सन्देहः। यथा मूर्तं मनः क्रियावत्त्वात् शरीरादिवत् यथा शरीरस्य एकस्मात् स्थानात् अपरस्मिन् स्थाने याति तथा मनोऽपि। यत्र यत्र क्रियावत्त्वं तत्र तत्र मूर्तत्वमिति नियमः। यथा वा अमूर्तं मनोऽस्पर्शवत्त्वादाकाशवत्। यथा गगनमस्पर्शत्वेऽमूर्तं तथा मनोऽपि अस्पर्शवत् तस्मादमूर्तमिति सिद्धम्। इति प्रकरणसमाप्तौ॥

विरुद्धद्वयसंनिपाताख्यं संदिग्धं निराकरोति ॥ नन्विति= अयं विरुद्धद्वयसंनिपाताख्यः संदिग्धोऽसाधारण एव क्रियावत्त्वास्पर्शवत्त्वे न प्रत्ये
कं संशयं जनयतः, निश्चयकारणत्वात् । संनिपातश्च तयोरयमसाधारण एव, संहतयोः अस्पर्शवत्त्वक्रियावत्त्वयोः तयोः मनोव्यतिरेके
ण अन्यतरपक्षे सपक्षे विपक्षे वाऽसम्भवात् अचाक्षुषत्वप्रत्यक्षत्ववत् यथा अचाक्षुषत्वाप्रत्यक्षत्वयोः प्रत्येकं गुणव्यभिचारेऽपि
समुदितयोः गुणव्यतिरेकेणान्यत्राऽसम्भवः । विरुद्धयोः संनिपातोऽसाधारणस्ततोऽसाधारणत्वाच्चैव नाध्यवसितोऽयमिति वे
ष्यामः, कथयिष्यामः, न चाविरुद्धसंनिपाताख्यः संदिग्ध इति, यतो मनो मूर्तं वाऽमूर्तमित्यध्यवसायाभावादनध्यवसित ए
वेति सिद्धम् । विरुद्धाव्यभिचारिणः संशयहेत्वभावे प्रतिपादिते शास्त्रविरोधं चोदयति ॥ नन्विति= उभयथादर्शनमुभाभ्यां विरु
द्धधर्माभ्यां सहैकस्य धर्मिणः दर्शनमवलोकनं संशयकारणं संशयहेतुरिति । शास्त्रे तत्र २ स्थानेऽपदिश्यते हेतुत्वेन कथ्यते
यथा च सूत्रम् "दृष्टञ्च दृष्टवत्,, वै. द. २।२।१८ अमूर्तत्वेन सहात्मनि दृष्टमस्पर्शवत्त्वं यथा मनसि दृश्यते तथा मूर्तत्वेन
सह परमाणौ दृष्टं क्रियावत्त्वमपि दृश्यतेऽतोऽमूर्तत्वेन सह दृष्टमस्पर्शवत्त्वमिव मूर्तत्वेन सह दृष्टं क्रियावत्त्वमपि दृष्ट्वा संशयो
भवति किं मनो मूर्तममूर्तं वा ? । अपरञ्च "यथा दृष्टमयथादृष्टत्वाच्च,, वै. द. २।२।१९ यथा दृष्टं येन धर्मेण मूर्तत्वाव्यभिचा

मू= नन्वयमसाधारण एवाचाक्षुषत्वप्रत्यक्षत्ववत् । संहतयोरन्यतरपक्षाऽसम्भवात् । त
तश्चानध्यवसित इति वक्ष्यामः । ननु शास्त्रे तत्र तत्रोभयथादर्शनं संशयकारणमपदि
श्यते । इति न * संशयः, विषयद्वैतदर्शनात् । संशयोत्पत्तौ विषयद्वैतदर्शनं कारणम् ।

रिणाऽस्पर्शवत्त्वेन समं दृष्टमतः अयथादृष्टत्वात् संशयः, किं क्रियावत्त्वान्मूर्तं मनः उतास्पर्शवत्त्वादमूर्तमिति । इति शास्त्रविरोधः ॥ शास्त्रविरो
धं निराकरोति ॥ इति नेति= शास्त्रविरोधो भवतीति यदुक्तं तन्न भवति यतः संशयः विषयद्वैतदर्शनात् भवति स्थाणुर्वा पुरुषो वेति विषयद्वयाऽव
लोकनात् स्तम्भे संशयो भवति । संशयोत्पत्तौ संशयप्रादुर्भावे विषयद्वैतदर्शनमुभयथा दर्शनं स्थाणुत्वपुरुषत्वाभ्यां सह दर्शनं संशयका
रणं न त्वेकस्य धर्मिणो विरुद्धधर्मद्वयप्राप्तिः संशयस्य कारणमिति । तस्मादयं सूत्रद्वयार्थो यस्त्वयाऽकारि । यद्विरुद्धाव्यभिचारिधर्मद्वयोपनि
पातात् संशय इति तन्न शृणु "दृष्टञ्च दृष्टवत्,, दृष्टमूर्ध्वत्वं संशयहेतुः । दृष्टवदिति वतिप्रत्ययः, तेन दृष्टाभ्यां स्थाणुपुरुषाभ्यां तुल्यो वर्तते प्रत्यक्षि
णि यदूर्ध्वं तद्दृष्टं संशयहेतुः । "यथा दृष्टमयथादृष्टत्वाच्च,, एकधर्मिविषयं दृष्टमुदाहरति । यथा दृष्टमपि पूर्वमन्यविधमवलोकितमपि संशयकम्
अयथादृष्टत्वात् संशयकाले यथादृष्टदर्शने संदेहो, यथा चैत्रो दृष्टः केशवान्, कालान्तरेऽयथादृष्टः केशरहितोऽवलोकित इत्यर्थः । क्रमेण तत्रैव
चैत्रे वस्त्रावृतमस्तके दृष्टे सति भवति संशयः चैत्रोऽयं सकेशो निष्केशो वा । तत्र हि चैत्रत्वे समानो धर्मः संशयकः स चैकत्रैव दृष्टः
इत्यस्मिन्न एव धर्मिणि दृष्टः संशयहेतुः नतु विरुद्धाऽव्यभिचारी संशयहेतुः प्रयोगाऽभावात् ॥

प्रश॰ भा॰
भाष्यप्र॰
१२५

तयोः समानबलत्वे सति अत्यन्तसंशयः स्यान्न तु निर्णयः॥तुल्येति= क्रियावत्त्वात् मूर्तम्, अस्पर्शवत्त्वादमूर्तं मनः,, इति तयोः
क्रियावत्त्वाऽस्पर्शवत्त्वयोः तुल्यबलत्वे समानबलत्वे सति परस्परविरोधात् क्रियावत्त्वाऽस्पर्शवत्त्वयोः मिथो विरोधात्
प्रतिकूलात् सर्वदा निर्णयाऽनुत्पादकत्वं निर्णयस्य निश्चयस्यानुत्पादकत्वम् अजनकत्वं स्यात् भवतु। सर्वदा संश
यः एव स्यादितिभावः नतु तयोरेकस्मिन् संशयकारणत्वं स्यात् इति। तुल्यबलत्वं निराकरोति॥नेति= तयोर्विषयद्वययोः

मू= तुल्यबलत्वे च तयोः परस्परविरोधात् निर्णयाऽनुत्पादकत्वं स्यान्न तु संशय
हेतुत्वम्॥ न तु तयोस्तुल्यबलत्वमस्ति। अन्यतरस्याऽनुमेयोद्देशस्यागमबा
धित्वात्। अयं तु विरुद्धभेद एव॥

तुल्यबलत्वं समानशक्तित्वं नास्ति। तयोः (मूर्ताऽमूर्तयोः) मध्येऽन्यतरस्यैकस्य अनुमेयोद्देशस्य अमूर्तत्वं मनः इत्यस्यागमबाधित्वात्
~~[illegible]~~ आगमेन शास्त्रेण बाधित्वात् "तदभावादणु मनः,, वै॰द॰७।१।२३ इतिसूत्रेण बाधितत्वात्।
यदि आगमविरोधित्वादयं विरुद्धद्वयसन्निपातात्थ्यः संदिग्धस्तर्हि कस्मिन् भेदेऽयं गण्यते तत्राह॥अयमिति= अयम् आगम
विरुद्धः "अनुमेयोद्देशोऽविरोधी प्रतिज्ञा,, इत्यवरोधिग्रहणेन निवर्तितानां प्रत्यक्षादिविरुद्धानां प्रतिज्ञाभासानाम्
विरोध एव नायं संदिग्धो हेत्वाऽऽभासः,, अपि तु विरुद्धभेद एव।

अनध्यवसितं हेत्वाभासं निर्दिशति ॥ य इति = यो हेतुः अनुमेये साध्ये पदार्थे विद्यमानः वर्तमानः तत्समानाऽसमानजातीययोः त-
त्सपक्षविपक्षजातिद्वययोः असन्नेव अविद्यमान एव स्यात् सोऽन्यतराऽसिद्धः, सोऽनध्यवसायहेतुत्वादनिश्चयहेतुत्वात् अनध्यवसि-
त एव हेतुः। यथा सर्वं कार्यमुत्पादात्पूर्वमपि सदिति साध्यते उत्पत्तेरिति हेतुः सांख्यानां सति सपक्षे व्योमादौ असति विपक्षे गग-
नकुसुमादौ अभावात् एकतरपक्षेऽध्यवसायं न करोति। तद्रूपेण पूर्वं तिरोभूतस्य वस्तुनः पश्चादाविर्भूतिरेवोत्पत्तिरिति कापिला-
ङ्गीकुर्वन्ते। अस्मात् तन्मते उत्पत्तेरिति हेतोः न स्वतोऽसिद्धत्वं, परमतेऽसिद्धता प्रतीयतेऽतो निश्चयाभावनात् अनध्यवसित एव हे-
त्वाभासः। सूत्रे ह्यविद्यमानोऽयमनध्यवसितो हेत्वाभासः भाष्यकृता कुतः संगृहीत इत्यत आह ॥ अयमिति = अयमनध्यवसितो हे-
त्वाभासः "अप्रसिद्धोऽनपदेशः —" वै० द० ३।१।१५ इत्यप्रसिद्धपदादनध्यवसितस्यापि संग्रहोऽतः अविरुद्धः सूत्रान्
कश्चिदपि विरोधः। अनैकान्तिकवत् साधारणो धर्मः संशयितो भवत्यतः अनध्यवसितस्य संदिग्धश्चानपदेशः अनेन संग्रहः प्रोक्तो
न चाऽप्रसिद्धोऽनपदेशः अनेनेति ॥ नन्विति। ननु इति संशयहेतुः संशयकारणम् अयं संशयोऽयं भेदः शास्त्रे कणादशास्त्रेऽभिहितः

मू० = यश्चाऽनुमेये विद्यमानस्तत्समानासमानजातीययोरसन्नेव सोऽन्यत-
राऽसिद्धोऽनध्यवसायहेतुत्वादनध्यवसितः, यथा सत्कार्यमुत्पत्तेरिति। अय-
मप्रसिद्धोऽनपदेशः इति वचनादविरुद्धः। ननु चायं विशेषः संशयहेतुरभिहितः
शास्त्रे "तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वात् इति।

तुल्यजातीयेष्वर्थान्तरभूतेषु विशेषस्योभयथा दृष्टत्वात् ,, वै० द० २।२।२२ अस्याऽयमर्थः ॥ इति सूत्रे पञ्चम्य-
र्थे सप्तमी। विशेषस्य पदार्थानां विशेषस्य तुल्यजातीयेषु समानजातीयेभ्यः अर्थान्तरभूतेषु अर्थान्तरभूतेभ्यः च उभयथा
प्रकारद्वयेन दृष्टत्वात् अवलोकनत्वात् प्रतीयतेऽसाधारणो धर्मः संशयकारकः। समन्वयो यथा "शब्दे श्रावणत्वं विशेषो
दृश्यते नहि शब्दस्य रूपादिभ्यः समानजातीयेभ्यो विशेषोऽयम्। अथ शब्दो द्रव्यं गुणः कर्म वा तदा विजातीयेभ्य इतिश-
ब्दे श्रावणत्वात् द्रव्यं गुणः कर्म इति संशयः। अतोऽसाधारणो धर्मः संशयप्रतिपादकः स च संदिग्धश्चानपदेशः
अस्मात्पदात् संगृहीतः स्यात् ॥

एतत्सूत्रं निराकरोति ॥ नेति = यदि साधारणो धर्मः संशयहेतुरिति न सूत्रार्थः । अन्यार्थत्वात् सूत्रस्यान्योऽर्थः । शब्दे विशेषदर्शना
त् । को विशेषस्तत्सूत्रं प्रमाणयति " श्रोत्रग्रहणो योऽर्थः स शब्दः „ वै॰ द॰ २।२।२१ श्रोत्रं श्रोत्रेन्द्रियं ग्रहणं ग्राहकर
णं यस्य स श्रोत्रग्रहणः यो यज्जातीयोऽर्थः स शब्दः इति प्रतिपाद्यः „ तस्मिन् किं द्रव्यं किं वा गुणः किमुत कर्मेति संश
य इत्युक्तम् सूत्रकारेणेति तस्मात् " अप्रसिद्धोऽनपदेशः „ अनेन संगृहीतोऽनध्यवसित इति । यदि श्रोत्रग्राह्यत्वमेव
विशेषकारणं तर्हि कुतः संशयः इति निर्दिशति पूर्वपक्षी ॥ संशयेति = श्रोत्रग्राह्यत्व विशेषदर्शनात् संशयाऽनुपपत्तिः सं
शयस्य सिद्धिरपि न भविष्यति । विप्रतिपत्त्युभयस्मृतिपूर्वकः संशयः स्मृतिश्च नाऽसाधारणधर्मदर्शनाद्भवति तस्यके
नचिद्विशेषेण सहाऽनुपलम्भात् । निराकुरुते पक्षमिमम् ॥ इतीति = इत्युक्ते पूर्वपक्षिणा एवमुक्ते सति कथयति सिद्धान्ती
द्रव्यादीनां द्रव्यगुणकर्मणां मध्येऽन्यतमस्यैकस्य द्रव्यस्य गुणस्य कर्मणो वा श्रावणत्वं शब्दत्वं विशेषो न स्यात्परञ्च
तेषां सामान्यमेव सिद्ध्यति । तत्र हेतुं समाधत्ते ॥ कस्मादिति = कुतस्तेषामितरेषां सामान्यत्वं तत्राह द्रव्यादिभेदानाम्

मू॰ = न अन्यार्थत्वात् शब्दे विशेषदर्शनात् । संशयाऽनुपपत्तिः । इत्युक्ते नायं द्रव्यादी
नामन्यतमस्य विशेषः स्याच्छ्रावणत्वं किंतु सामान्यमेव सम्पद्यते । कस्मात्
तुल्यजातीयेष्वर्थान्तरभूतेषु द्रव्यादिभेदानामेकैकशो विशेषस्योभयथा
दृष्टत्वात् । इत्युक्तं न संशयकारणम् ॥

भिद्यन्ते इति भेदाः द्रव्यादय एव भेदाः द्रव्यादिभेदा द्रव्यगुणकर्माणि तेषां मध्ये एकैकशः एकैकस्य द्रव्यस्य गुणस्य
कर्मणो वा तुल्यजातीयेषु समानजातीयेभ्योऽर्थान्तरभूतेषु अर्थान्तरभूतेभ्यः विशेषस्योभयथा दृष्टत्वात् विशेषः उभ
यथा दृष्टः पृथिव्याः स्वसमानजातीयेभ्यो विशेषः पृथिवीत्वं द्रव्यत्वेन सह दृष्टं रूपस्य विशेषो रूपत्वं गुणत्वेन सह दृष्टं
उत्क्षेपणस्य विशेषः उत्क्षेपणत्वं कर्मत्वेन सह दृष्टम् । शब्दस्यापि श्रावणत्वं विशेषः गुणत्वेन तस्मादेतदपि विशेषत्वेन
रूपेण द्रव्यादीनां सामान्यमेव । हेतुमुपसंहरति ॥ इतीति ॥ इति हेतोरुक्तं भवति असाधारणो धर्मो न संशयकारणम् ।
किमुक्तं स्यात् । विशेषो द्रव्ये गुणे कर्मणि च दृष्टः शब्दे च श्रावणत्वं विशेषो दृश्यते विशेषत्वाद्द्रव्यादिविषयः संशय इति ।

असाधारणे धर्मे संशयकारणे का हानिरित्याह ॥ अन्यथेति = अन्यथा यदि असाधारणो धर्मः संशयकारणं स्यात्तर्हि षट्स्वपि पदार्थेषु संशयो भविष्यति। यतः सर्वे पदार्था असाधारणधर्मयोगिनः तद्वत्त्वात् संशयाशङ्केति प्रसंगो भविष्यत्यतो ऽसाधारणो धर्मो न संशयकारणम्। स्वविषयः समाप्यते। तस्मादिति = तस्मात् सामान्यनिश्चयादेव संशयो नाऽसाधारणधर्मदर्शनादिति। अधुना निदर्शनस्वरूपं निर्वक्ति ॥ द्विविधमिति = साधर्म्यवैधर्म्यभेदात् निदर्शनम् उदाहरणं द्विविधं द्विप्रकारकम्। साध्यसाधनयोः समानधर्मः निर्दिश्यते येन तत् साधर्म्यनिदर्शनम्। साध्यसाधनयोः व्यावृत्तिमात्रेण निदर्शनं वैधर्म्यनिदर्शनम्। भाष्यकृतलक्षणं निर्दिश्यते 'तत्र द्वयोर्मध्ये ऽनुमेयसामान्येन साध्यसमानवतो लिङ्गस्य सामान्यस्य हेतुसमानवतोऽनुविधानदर्शनं मानकूल्यप्रत्यक्षीकरणं साध्यनिदर्शनमुच्यते। साध्यसाधनयोरन्वयव्याप्तिनिदर्शके वचने साधर्म्यनिदर्शनमिति निष्कर्षः। यथा मनो द्रव्यं क्रियावत्त्वात् शरवत्,, यत् यत् क्रियावत्तं दृष्टं तत्तद् द्रव्यं यथा शर इति अन्वयव्याप्तिकं निदर्शनम्' साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्,, न्या·द·१।१।३६ व्यतिरेकव्याप्तिकं निदर्शने

मू = अन्यथा षट्स्वपि पदार्थेषु संशयप्रसंगात्। तस्मात्सामान्यप्रत्ययादेव संशयः।
द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण च। तत्राऽनुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम्। तद्यथा यत् क्रियावत् तद् द्रव्यं दृष्टं यथा शर इति। अनुमेयविपर्यये च लिङ्गस्याऽभावनिदर्शनं वैधर्म्यनिदर्शनम्। तद्यथा यदद्रव्यं तत् क्रियावन्न भवति यथा सत्तेति ॥ अनेन निदर्शनाभासा निरस्ता भवन्ति

निदर्शयति ॥ अनुमेयेति = अनुमेयविपर्यये साध्यविपक्षे लिङ्गस्याभावदर्शनं हेत्वभावप्रकटीकरणं वैधर्म्यनिदर्शनम्। साध्यसाधनयोर्व्यतिरेकनिदर्शनवचनं वैधर्म्यनिदर्शनमिति तत्त्वम्। यथा गुणाः पदार्थाः क्रियारहितत्वात् परश्रितत्वाच्च सत्तावत्। यद् यद् अद्रव्यं तत्त भक्ति यावत्, यथा सत्तेति व्यतिरेकव्याप्तिकं निदर्शनम्। यथा च "तद्विपर्ययाद्विपरीतम्,, न्या·द·१।१।३७ दृष्टान्ताभासानाह ॥ अनेनेति = अनेन साधर्म्यवैधर्म्यनिदर्शनकथनेन निदर्शनाभासा दृष्टान्तवत् प्रकाशवन्तो दृष्टान्ताः निरस्ताः प्रत्युक्ता भवन्तीति ॥

तानुद्देशप्रदर्शनपूर्वकं निर्दिशति। तद्यथेति: लिङ्गाऽसिद्धः २ अनुमेयाऽसिद्धः २ उभयासिद्धः ३ आश्रयासिद्धः ४ अननुगतः ५ विपरीताऽनुगतः ६ इति भेदात् षड्विधा निदर्शनाभासाः। तत्र लिङ्गाऽसिद्धो यथा "नित्यः शब्दः अमूर्तत्वात् परमाणुवत्, परमाणौ अमूर्तत्वं नास्ति परमाणूनामाणुत्वात् परमाणुषु अमूर्तत्वलिङ्गं न विद्यतेऽतो लिङ्गाभासविनिदर्शनाभासः १ अनुमेयाऽसिद्धो यथा नित्यः शब्दः अमूर्तत्वात् कर्मवत्, कर्मणि नित्यत्वस्याऽनुमेयस्याभावात् अनुमेयासिद्धनिदर्शनाभासः। २ उभयाश्रयासिद्धो यथा नित्यः शब्दोऽमूर्तत्वात् स्थालीवत्, इत्यत्र स्थाल्यां न नित्यता तत्कार्यत्वात् नापि अमूर्तत्वं तन्मूर्तत्वात् अतः साध्यसाधनोभयासिद्धनिदर्शनाभासः ३ आश्रयासिद्धो यथा "नित्यः शब्दः अमूर्तत्वात् तमोवत्, इत्यत्र तमसि अस्तित्वमपि नास्ति तदा साध्यसाधनयोर्व्याप्तिः क्व गृह्येत अतः आश्रयासिद्धनिदर्शनाभासः ४। अननुगतो निदर्शनाभासः

मू = तद्यथा नित्यः शब्दोऽमूर्तत्वात् यदमूर्तं दृष्टं तन्नित्यं यथा परमाणुर्यथा कर्म यथा स्थाली यथा तमः अम्बरवदिति। यद्द्रव्यं तत् क्रियावद्दृष्टमिति च। लिङ्गाऽनुमेयोभयाश्रयासिद्धाऽननुगतविपरीताऽनुगताः साधर्म्यनिदर्शनाभासाः।

यथा नित्यः शब्दः अमूर्तत्वात् अम्बरवत्, यद्यप्यम्बरेऽमूर्तत्वनित्यत्वे स्तस्तथापि यदमूर्तं तन्नित्यमेवं वक्ति किन्तु अम्बरवदित्येतावन्मात्रमाह। एतदुक्त्याऽप्रतिपन्नसाध्यहेत्वोरम्बरे सत्ताप्रतीतिर्न विद्यते तस्मादननुगतोऽयं निदर्शनाभासः ५ विपरीताऽनुगतो यथा "द्रव्यो वायुः क्रियावत्त्वात्, यद्द्रव्यं तत् क्रियावद् दृष्टम्, इत्यत्र व्याप्यव्यापके क्रियावत्त्वद्रव्यत्वे दृष्टे, यद्वा द्रव्यव्याप्यं तदेकनियता व्याप्तिर्न तु संयोगवदुभयत्रापि युज्यते व्यापकस्याकाशादि द्रव्यस्य क्रियात्मकव्याप्यव्यभिचारात्। यत्र समव्याप्तिमति कृतकत्वानित्यत्वादौ व्याप्यस्यापि व्यापकत्वमस्ति तत्रापि हेतुरूपमवलम्ब्य व्याप्तिर्गृहीता न तु व्यापकत्वरूपाश्रयत्वादन्यथा व्यभिचारित्वमपि तद्रूपस्यापि सम्भवात्। अतो व्याप्तिर्व्याप्यगतत्वेन दर्शनीया यथा "क्रियावान् वायुः द्रव्यत्वात् यत् क्रियावत्तद्द्रव्यमिति। न तु व्यापकगतत्वेन तत्र तदभावादतो विपरीताऽनुगतोऽयं निदर्शनाभास इति॥

वैधर्म्यनिदर्शनाभासानाह ॥ यदनित्यमिति = लिङ्गाऽव्यावृत्तः १ अनुमेयाव्यावृत्तः २ उभयाव्यावृत्तः ३ आश्रयासिद्धः ४ अव्यावृत्तः ५ विपरीतव्यावृत्तः इति भेदात् षड्विधा वैधर्म्यनिदर्शनाभासाः भवन्ति। लिङ्गं चाऽनुमेयश्च उभयं च लिङ्गानुमेयोभयानि तानि अव्यावृत्तानि येषां ते तथोक्ताः। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते। लिङ्गाव्यावृत्तः अनुमेयाव्यावृत्तः उभयाव्यावृत्तः। आश्रयोऽसिद्धो यस्य स आश्रयासिद्धः लिङ्गाऽनुमेयोभयाव्यावृत्तश्च आश्रयासिद्धश्च अव्यावृत्तश्च विपरीतव्यावृत्तश्चेति लिङ्गाऽनुमेयोभयाव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्यावृत्ताः। तत्र लिङ्गाव्यावृत्तो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं तन्मूर्तं यथा कर्म कर्मणो मूर्तत्वाऽभावात् लिङ्गाव्यावृत्तो निदर्शनाभासः १ अनुमेयाऽव्यावृत्तो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं तन्मूर्तं यथा परमाणुः परमाणोरव्यावृत्ते नित्यत्वमतोऽनुमेयाऽव्यावृत्तो निदर्शनाभासः २ उभयाव्यावृत्तो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं तन्मूर्तं दृष्टम् यथाऽऽकाशम् "इत्यत्राकाशादमूर्तत्वनित्यत्वे न व्यावृत्ते अतः उभयाव्यावृत्तो वैधर्म्यनिदर्शनाभासः ३ आश्रयाऽसिद्धो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं

मू = यदनित्यं तन्मूर्तं दृष्टम्। यथा कर्म यथा परमाणुर्यथाऽऽकाशं यथा तमः घटवत् यन्निष्क्रियं तद् द्रव्यञ्चेति लिङ्गाऽनुमेयोभयाऽव्यावृत्ताश्रयासिद्धाव्यावृत्तविपरीतव्यावृत्ता वैधर्म्यनिदर्शनाभासा इति ॥

तन्मूर्तं दृष्टं यथा तमः" इत्यत्र तमसि अस्तित्वाऽभावात् साध्यसाधनयोः किमाश्रयाव्यावृत्तिः स्यात् अतः आश्रयाऽसिद्धो वैधर्म्यनिदर्शनाभासः ४ अव्यावृत्तो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं तन्मूर्तं दृष्टं यथा घटः" इत्यत्र यद्यपि घटः साध्यसाधनव्यावृत्तिमान् तथापि यदनित्यं तन्मूर्तमित्येवं न वदति न च तथाऽनभिधाने साध्यसाधनयोर्व्यावृत्तिप्रतिपत्तिः, विप्रतिपन्नस्य भवत्यतोऽयमव्यावृत्तो वैधर्म्यनिदर्शनाभासः ५ विपरीतव्यावृत्तो यथा "नित्यः शब्दः अमूर्तत्वात् यदनित्यं तन्मूर्तं दृष्टं यथा यन्निष्क्रियं तद् द्रव्यम्" यथा साध्यं व्यापके साधने व्याप्यं तथा साध्याऽभावो व्याप्यः साधनाभावश्च व्यापकः। तत्र द्रव्यं वायुः क्रियावत्त्वादित्यत्र विपर्ययव्याप्तिप्रदर्शनार्थं यद् द्रव्यं तद् क्रियमिति वाच्यं न तु यन्निष्क्रियं तद् द्रव्यमित्येवं न व्याप्तिराकाशस्य क्रियाविरहितत्वेऽपि द्रव्यत्वात् तस्माद्विपरीतव्यावृत्तो वैधर्म्यनिदर्शनाभासः। ६ ॥

अनुसन्धानमुदाहरति ॥ निदर्शने इति = निर्दिश्यते निश्चिता साध्यसाधनयोर्व्याप्तिरस्मिन्निति निदर्शनं दृष्टान्तः तत्र निदर्शनेऽनुमेयसामान्येन सह अनुमीयते येनेन साध्येनेति यावत् सामान्येन सह दृष्टस्य प्रतीतस्य लिङ्गसामान्यस्य व्याप्यसामान्यस्य अनुमेये साध्येऽन्वयाऽऽनयनं समाप्रकटीकरणं येन वचनेन अनुक्रियते तदनुसन्धानम् । दृष्टान्ते साध्याविनाभूतत्वेन दर्शितं लिङ्गं पक्षेऽनुसन्धीयते प्रतिपाद्यतेऽनेनेति अनुसन्धानम् । यथा च "उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः„ न्या· द· १।१।३८ यथा वा "अविनाभावविशिष्टस्य हेतोः पक्षवैशिष्ट्यप्रतिपादकत्वमुपनयत्वम्„ यथा शब्दोऽनित्यः कृतकत्वात्, यद्यत् कृतकं तत्तदनित्यम्, अनित्यत्वव्याप्यकृतकत्ववान् चायं तस्मादनित्य इति । स्वोक्तिं व्याख्याति ॥ अनुमेयेति = अभिहिते प्रतिज्ञानन्तरं हेतुवचनेन लिङ्गं वस्तुन्यावृत्ताऽनुमेयेऽस्तीति हेतुत्वेन कथितम् । लिङ्गसामान्यम् अनुपलब्धशक्तिकम् अप्राप्तशक्तिकं लिङ्गस्य साध्यप्रतिपादने शक्तिः अन्वयव्यतिरेकौ पक्षधर्मता च, सा पूर्वं प्रतिज्ञाहे

मू = निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यस्याऽनुमेयेऽन्वयानयनमनुसन्धानम् । अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनाऽनुसन्धीयते तदनुसन्धानम् । तथा च वायुः क्रियावान् इति । अनुमेयाऽभावे च तस्याऽसत्त्वमुपलभ्य न च तथा वायुर्निष्क्रियः इति ॥

वचनाभ्यां तस्य नाऽवगतेति अनुपलब्धशक्तिकम् । अन्वयुदाहरणमाह । तथेति = द्रव्यं वायुः क्रियावत्त्वात् शरवत्, यद्यत् क्रियावत्तत्तद्द्रव्यं यथा शरः तथा चायं वायुरिति । व्यतिरेक्युदाहरणमाह । अनुमेयेति = अनुमेयाऽभावे अनुमेयस्य साध्यस्य अभावे रहिते वस्तुनि तस्य लिङ्गस्य असत्त्वमविद्यमानत्वमुपलभ्य संप्राप्य "न च तथेति पदप्रयोगः कार्यः„ यथा द्रव्यं वायुः क्रियावत्त्वात् शरवत् । यद्यत् क्रियावत् न भवति तत्तद्द्रव्यं न भवति यथा सत्ता न च तथाऽयं वायुरिति ॥

श्रीः श्रीः श्रीः श्रीः

प्रत्याम्नाये निर्दिशति ॥ अनुमेयेति = अनुमेयत्वेन अनुमातुं शक्येन साध्येन वस्तुनोद्दिष्टे लक्षिते साध्यधर्मेऽनिश्चिते निर्णयरहिते परेषां प्रकट साध्यसिद्धिसामर्थ्यानां निश्चयापादनार्थं निश्चयसाधनार्थं प्रतिज्ञायाः पुनर्वचनं पुनःकथनं प्रत्याम्नायः प्रत्यावृत्त्याऽभिधाने येन वचनेन क्रियते स प्रत्याम्नायः भवति । यथा च सूत्रम् "हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्" न्या० द० १।१।३९ यथा हेतुसाध्यावनया पक्षप्रतिपादकं वचनं निगमनम् । स्वोक्तिर्व्याख्यायते ॥ प्रतिपाद्यत्वेनेति = प्रतिपाद्यत्वेन साध्यत्वेन उद्दिष्टे कथिते वस्तुनि अनिश्चिते परेषां हेत्वादिभिरवयवैः हेतूदाहरणोपनयैः अवयवैः आहितशक्तीनां प्राप्तसामर्थ्यानां परिसमाप्तेन परिपूर्णेन वाक्येन निश्चयापादनार्थं निश्चयप्राप्तिकरणाय प्रतिज्ञायाः पुनर्वचने प्रतिज्ञायाः पुनःकथने प्रत्याम्नायः प्रवर्तते यथा "द्रव्यं वायुः क्रियावत्त्वात् शरवत् यद्यत्क्रियावत् तत्तद्द्रव्यं यथा शरः तथा वायुः क्रियावान् तस्मात्तथा द्रव्यमिति । हेत्वादिभिः साध्ये सिद्धे किं प्रयोजनं प्रत्याम्नायेनेति अत आह ॥ नेति = एतस्मिन् प्रत्याम्नायेऽसति अनुमानेऽविद्यमाने

मू = अनुमेयत्वेनोद्दिष्टे चाऽनिश्चिते च परेषां निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः । प्रतिपाद्यत्वेनोद्दिष्टे चाऽनिश्चिते च परेषां हेत्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः, तस्माद्द्रव्यमेवेति । न ह्येतस्मिन्नसति परेषामवयवानां समस्तानां व्यस्तानां वा तदर्थद्योतकत्वमस्ति । गम्यमानार्थत्वात्

परेषामवयवानां हेतूदाहरणोपनयानां समस्तानां संयुक्तानां व्यस्तानां भिन्नानां वा तदर्थद्योतकं साध्यार्थद्योतकत्वं नास्ति न विद्यते तेषामवयवानां स्वाधीनत्वात् । सति एतस्मिन् अभिलाषोपगृहीता अवयवाऽवयवित्वं प्राप्नुवन्तः स्वार्थं विधातुं शक्नुवन्ति तस्मद्युक्तः प्रत्याम्नायः । प्रत्याम्नायं निराकुरुते ॥ गम्यमानेति = गम्यमानार्थत्वात् न प्रत्याम्नायस्य आवश्यकता । यथा स्वार्थेऽनुमानसाधिका या सामग्री सैव परार्थेऽनुमानेऽपि । स्वार्थेऽनुमितौ इयं स्वयमनुयुज्यते, परप्रतीतौ तु परेण बोध्यते लिङ्ग सामर्थ्यात् स्वयमेवाऽर्थोऽवगम्यते । परस्यापि तत्प्रत्यायकम् । तस्मात् गम्यमानार्थत्वात् येन केन प्रकारेण अर्थप्राप्तिसम्भवान्निरर्थकः प्रत्याम्नायः इति ॥

तदा दोषं परिहरन्ति॥ इतीति = लिङ्गसामर्थ्यादर्थोऽवगम्यते न प्रत्याम्नायेनेति चेन्न, तत्राह हेतुम्। अतिप्रसंगात् अतिव्याप्तेः। कथम् वाक्यं लिङ्गशब्दस्य बोधकृत् न तु साध्यस्याऽवबोधकारकम्। लिङ्गसामर्थ्यं प्रकरणसमकालात्ययापदिष्टयोः असाधकत्वात् अपि तु अबाधितविषयत्वमसत्प्रतिपक्षत्वमपि सामर्थ्यम्। लिङ्गसद्भावो यावत् प्रमाणेन न प्रतिपाद्यते तावत्प्रति संभवा शंका। यथा अनिवर्तनात् दुर्भिक्षे उपसंहृतेऽपि साधने साध्यप्रतीत्ययोग इति विपरीतप्रमाणे प्रदर्श्यते। तदभावे साधिते प्रकरणसमकालात्ययापदिष्टत्वाभावे निर्णीते प्रसिद्धशक्ति साधने साध्यं समर्थयतीति प्रत्याम्नायस्याऽऽवश्यकतेति।
अवान्तरसाधकः श्रूते यदि प्रत्याम्नायप्रतिक्षेपः क्रियते तदा किमुदाहरणादिनेत्यत आह॥ तथेति = तथा हि प्रत्याम्नायाभावे प्रतिज्ञाऽनन्तरं प्रतिज्ञाकथनानन्तरं हेतुमात्राभिधानं हेतुमात्रप्रवचनं कर्तव्यं किमुदाहरणादिभिः। विदुषो बुद्धिमतोम् अन्वयव्यतिरेकस्मरणात् अन्वयव्यतिरेकयोः स्मरणकरणेनैव अर्थोऽवगतिर्भविष्यति। यथोदाहरणोपनयाद्यन्तरेण न कदाचिदप्यर्थबोधः तथा प्रत्याम्नायं विनाऽपि न भवत्यर्थज्ञानं तस्मादत्रैव निगमनेऽर्थपरिसमाप्तिरर्थस्य साध्यस्य हेतुसामर्थ्यस्य वा परिसमाप्तिः

मू = इति चेन्नातिप्रसङ्गात्। तथा हि प्रतिज्ञानन्तरं हेतुमात्राभिधानं कर्तव्यम्। विदुषामन्वयव्यतिरेकस्मरणात् तदर्थोऽवगतिर्भविष्यतीति तस्मादत्रैवार्थपरिसमाप्तिः॥ = कथम्। अनित्यः शब्दः इत्यनेनानिश्चितानित्यत्वमात्रविशिष्टः शब्दः कथ्यते प्रि प्रयत्नानन्तरीयकत्वादित्यनेनानित्यस्य साधनधर्ममात्रमभिधीयते। इह यत्प्रयत्नानन्तरीयकं तदनित्यं दृष्टं यथा घटः इत्यनेन साध्यसामान्येन साधनसामान्यस्यानुगममात्रं

प्रतीत्यनिमाऽवधार्य विज्ञेय इति। प्रकारं पृच्छति तत्र॥ कथमिति = प्रत्याम्नायेऽर्थसमाप्तिः कथमित्युत्तारयति। "अनित्यः शब्दः" अनेन वाक्येन अनिश्चिताऽनित्यत्वमात्रविशिष्टोऽनिर्णीतानित्यत्वमात्रयुक्तः शब्दः कथ्यते प्रतिज्ञायते इत्यर्थः। तत्र हेतुमाह प्रयत्नानन्तरीयकत्वात् पूर्वमविद्यमानस्य प्रयत्नानन्तरमुपलभ्यमानत्वात्। अनेन हेतुवचनेन अनित्यत्वसाधनधर्ममात्रं अनित्यत्वस्य साधनस्य धर्ममात्रम् अभिधीयते न च पक्षधर्मतायाः अन्वयव्यतिरेकाऽभिधानमिति। अनुगममात्रं किं तत्राह। इहेति = इह जगति यद्वस्तु प्रयत्नानन्तरीयकं कृतिपश्चाद्भवति तदनित्यं दृष्टं यथा घटः मृत्तिकादिभिर्विरस्यते यदा, तदा घटोऽयमिति व्यवह्रियते, तो घटोऽनित्योऽनेनोदाहरणेन साध्यसामान्येन अनित्यसाध्यसामान्येन साधनसामान्यस्य हेतुसामान्यस्य अनुगममात्रं करोति न तु स्वरूपान्तरमिति मात्रशब्दस्य अर्थः।

वैधर्म्योदाहरणमाह ॥ नित्यमिति = अप्रयत्नानन्तरीयकं प्रयत्नमन्तरेण विद्यमाने यद्दृष्टं तन्नित्यं दृष्टं यथाऽऽकाशम्। आकाशं न केनापि क्रियते अपितु स्वाभाविकमेवास्ति इत्यनेन वैधर्म्योदाहरणेन साध्याभावेन साध्यविरुद्धनित्येन साधनस्य हेतोः असत्त्वम् अविद्यमानता प्रदर्श्यते । अनुसन्धाने प्रदर्श्येते ॥ तथेति = तथा तेन प्रकारेण प्रयत्नानन्तरीयकः प्रयत्नानन्तरभावी शब्दो दृष्टः किन्तु न च शब्दस्तथाऽऽकाशवद् प्रयत्नानन्तरीयकः स्वाभाविक इत्यन्वयव्यतिरेकाभ्यां यत्र २ प्रयत्नानन्तरीयकत्वं तत्र २ अनित्यत्वमित्यन्वयः । यत्र २ प्रयत्नानन्तरीयकत्वं न तत्र २ अनित्यत्वमपि नेति व्यतिरेकः ताभ्यां दृष्टसामर्थ्यस्य दृष्टाऽविनाभावस्य साधनसामान्यस्य प्रयत्नानन्तरीयकत्वस्य शब्दे धर्मिणि अनुसन्धानमनुयोजनं गम्यते प्राप्यते इति । प्रत्याम्नायः प्रदर्श्यते ॥ तस्मादिति = यत्प्रयत्नानन्तरीयकं तदनित्यमिति तस्माद्धेतोः अनित्यः शब्दः इत्यनेन प्रत्याम्नायेन अनित्य एव शब्द इति प्रतिपिपादयिषितार्थपरिसमाप्तिः प्रतिपादयितुमिच्छा प्रतिपिपादयिषा प्रतिपिपादयिषया प्रतः प्रतिपिपादयिषितः योऽर्थः साध्यः तस्य परिसमाप्तिः निश्चयो गम्यते प्राप्यते इति ॥ उपसंहरति

मू = नित्यमप्रयत्नानन्तरीयकं दृष्टं यथाकाशमित्यनेन साध्याभावेन साधनस्यासत्त्वं प्रदर्श्यते । तथा च प्रयत्नानन्तरीयकः शब्दो दृष्टो न च तथाकाशवद् प्रयत्नानन्तरीयकः शब्दः इत्यन्वयव्यतिरेकाभ्यां दृष्टसामर्थ्यस्य साधनसामान्यस्य शब्देऽनुसन्धानं गम्यते । तस्मादनित्यः शब्दः इत्यनेन अनित्य एव शब्द इति प्रतिपिपादयिषितार्थपरिसमाप्तिर्गम्यते ॥ तस्मात्पञ्चावयवेनैव वाक्येन परेषां स्वनिश्चितार्थप्रतिपादनं क्रियते इत्येतत्परार्थानुमानम् ॥

इति प्रयम् ॥ तस्मादिति = यस्मात् पञ्चसु अवयवेषु समस्तसाधनसामर्थ्यप्रतीतौ साध्यप्रत्ययः पर्यवस्यति नापरं किञ्चित् समीहते, तस्मात् कारणात् पञ्चावयवेनैव वाक्येन परेषामन्येषां जनानां स्वनिश्चितार्थप्रतिपादनं स्वनिर्णीतसाध्यप्रतिपादनं क्रियते इति कृत्वा एतत्पञ्चावयवयुक्तं वाक्यं परार्थानुमानमिति सिद्धं नः समीहितमिति ॥

प्रत्यक्षाऽनुमानव्यतिरिक्ते प्रमाणे व्याचष्टे ॥ विशेषेति = विशेषदर्शनं विरुद्धकोटिद्वयमध्ये एकस्य अपरस्माद् विशेषदर्शनमधिकदर्शनं तस्माज्जातमवधारणज्ञानं निश्चयज्ञानं संशयविरोधी संशयं तिरस्कृत्य स्थायी निर्णयो भवति । एतदवधारणज्ञानं प्रत्यक्षं वाऽनुमानमेव । अनयोरन्तर्भावी निर्णयो, न प्रमाणान्तरमित्येति "तदभावाप्रकारकत्वे सति तत्प्रकारकत्वं निर्णयत्वम् यथा च सूत्रम् "अदुष्टं विद्या,, वै॰द॰ ९।२।१२ यथा वा "विमृश्य पक्षप्रतिपक्षाभ्यामर्थाऽवधारणं निर्णयः,, न्या॰द॰ १।१।४१ तन्निर्णयात्मकं ज्ञानं प्रत्यक्षं कथं भवतीत्याह ॥ यदिति = विशेषदर्शनात् संशयितवस्तुनि एकस्य धर्मिणो धर्मस्य विशेषाऽवलोकनात् संशयविरोधी संशयप्रतिद्वन्द्वी यत् ज्ञानमुत्पद्यते प्रादुर्भवति स प्रत्यक्षनिर्णयः । यथा कस्मिंश्चिद् वस्तुनि स्थाणुपुरुषयोः स्तम्भस्य पुरुषस्य च ऊर्ध्वतामात्रसादृश्याऽवलोकनात् उच्चैर्मात्रसमानाऽवलोकनात् विशेषेषु भेदेषु अप्रत्यक्षेषु अद्दिगोचरमनधिगतेषु उभयविशेषाऽनुस्मरणात् उभयस्य स्थाणोः वक्रकोटरादेः पुरुषस्य शिरःपा

मू = विशेषदर्शनजमवधारणज्ञानं संशयविरोधी निर्णयः । एतदेव प्रत्यक्षमनुमानं वा । यद् विशेषदर्शनात् संशयविरोध्युत्पद्यते स प्रत्यक्षनिर्णयः । यथा स्थाणुपुरुषयोरूर्ध्वतामात्रसादृश्यालोचनात् विशेषेष्वप्रत्यक्षेषु उभयविशेषाऽनुस्मरणात् किमयं स्थाणुः पुरुषो वेति संशयोत्पत्तौ शिरःपाण्यादिदर्शनात् पुरुष एवाऽयमित्यवधारणज्ञानं प्रत्यक्षनिर्णयः । विषाणमात्रदर्शनाद् गौर्गवयो वेति संशयोत्पत्तौ सास्नामात्रदर्शनात् गौरेवाऽयमित्यवधारणज्ञानम् अनुमाननिर्णय इति ॥

ण्यादेः च अनुस्मरणात् स्मरणाऽनुकूलव्यापारात् किमयं प्रत्यक्षीभूतः स्थाणुर्वा पुरुष इति संशयोत्पत्तौ संशयप्राप्ते धर्मद्वयमध्ये शिरःपाण्यादिदर्शनात् शिरःपाण्यादिविशेषत्वदर्शनात् पुरुष एवाऽयमित्यवधारणज्ञानं निश्चयात्मकं ज्ञानं यज्जायते तत्प्रत्यक्षनिर्णयः इत्युच्यते । अनुमाननिर्णयमाह । विषाणेति अरण्ये कश्चित्पशुः दृष्टः तद्गतविषाणमात्रदर्शनात् गौर्गवयो वा इति संशयोत्पत्तौ पश्चात् गौस्तथा गवयः इत्याप्तोपदेशस्मरणात् संशये प्राप्ते तत्र पशौ सास्नामात्रदर्शनात् गोगलगतलम्बमानं चर्म सास्ना इत्युच्यते । तन्मात्राऽवलोकनात् गौरेवाऽयमित्यवधारणात्मकं निश्चयात्मकं यत् ज्ञानमुत्पद्यते तदनुमाननिर्णयः इत्युच्यते । यथा च सूत्रम् "तथाऽभिप्रायाः प्रत्यक्षलैङ्गिकाभ्याम् ,, वै॰द॰ १०।१।३।

स्मृतिलक्षणं विद्यामाचष्टे। लिङ्गेति = दृष्टश्रुताऽनुभूतेषु दृष्टेषु साक्षात्कृतेषु श्रुतेषु शब्दमात्राऽवगतेषु अनुभूतेषु अनुभवव्या पारवत्स्वार्थेषु विषयेषु लिङ्गदर्शनेच्छानुस्मरणाद्यपेक्षात् लिङ्गदर्शनं चिह्नालोकनम्; इच्छानुस्मरणम् इच्छानुस्मृतिः आदि पदात् प्रणिधानादयः गृह्यन्ते "यथा प्रणिधान, निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रह-आश्रयाश्रित-सम्ब न्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्तिव्यवधान-सुख-दुःखेच्छा-द्वेष-भयार्थित्व-क्रिया-राग-धर्माधर्म निमित्तेभ्यः" न्या·द·३।२।४१ तेषामपेक्षात् अपेक्षमाणात् आत्ममनसोः संयोगविशेषात् आत्ममनसोः संयोग मात्रात्। अपरं पट्वभ्यासादरप्रत्ययजनितात् पटुप्रत्ययः स्फुटतरप्रत्ययः, अभ्यासप्रत्ययः एकस्य पठितस्य अनुवाकस्य वैदिकभागस्यावृत्त्या पुनः पुनर्ग्रहणलक्षणोऽभ्यासः तत्प्रत्ययः, आदरप्रत्ययः अत्यन्ताश्चर्यवति वस्तुनि सकृदुपलब्धे कालान्तरे स्मृतिदर्शनमादरः तस्य प्रत्ययः पूर्वोक्तप्रत्ययेभ्यो जनितादुत्पन्नात् संस्कारात्

मू = लिङ्गदर्शनेच्छाऽनुस्मरणाद्यपेक्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादर प्रत्ययजनिताच्च संस्कारात् दृष्टश्रुताऽनुभूतेष्वर्थेषु शेषाऽनुव्यवसायेच्छाऽ नुस्मरणद्वेषहेतुरतीतविषया स्मृतिरिति ॥

शेषानुव्यवसायेच्छाऽनुस्मरणद्वेषहेतुः, शिष्यते इति शेषः, अनुव्यवसायः, अनु पश्चाद्व्यवसितिरित्यनुव्यवसायः। शेष श्चाऽनुव्यवसायश्चेति शेषाऽनुव्यवसायः। प्रथमोपजातलिङ्गावबोधापेक्षया तत्पश्चाद्भावि अनुमेयज्ञानं तस्य हेतुः, इच्छा हेतुः सुखसाधनत्वस्मृतिरिच्छाहेतुः, स्मरणद्वेषहेतुः दुःखसाधकस्मरणं द्वेषहेतुः, अतीतविषया, विषयस्यार्थस्य अतीतत्वं पूर्वोऽनुभूतत्वं प्रतीयते इत्यतीतविषया स्मृतिरिति भवति यथा वा "संस्कारमात्रजन्यज्ञानत्वं स्मृतित्वम्" यद्वा "पूर्वविज्ञानविषयं विज्ञानं स्मृतिरिष्यते। पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नाऽनुगम्यते" तथा च सूत्रम् "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" वै·द·९।२।६ यथा वा सूत्रम् "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः" योग दर्श· १।११ ॥

आर्षं (शाब्दं प्रमाणम्) आह ॥ आम्नायेति= आम्नायो वेदः तद्विधातॄणाम् ईशोपदिष्टज्ञानसम्पादकानाम् ऋषीणां "ऋषयो मन्त्रद्रष्टारः" इति निरुक्ते तेषां वसिष्ठविश्वामित्रजमदग्निगालववामदेवादीनाम् अतीतानागतवर्तमानेषु अतीताश्च भूताश्च अनागताश्च भविष्यन्तश्च वर्तमानास्ते ऽतीतानागतवर्तमानाः तेषु अतीन्द्रियेषु इन्द्रियागोचरेषु अर्थेषु धर्मादिषु धर्माधर्मादिषु ग्रन्थोपनिबद्धेषु शास्त्रप्रतिपादितेषु अनुपनिबद्धेषु ग्रन्थाप्रतिपादितेषु आत्ममनसोः संयोगात् धर्मविशेषात् विशिष्यते इति विशेषः धर्म एव विशेषो धर्मविशेषः विद्यातपःसमाधिजातो धर्मः तस्मात् यत् प्रातिभं "इन्द्रलिङ्गाद्यभावे यदर्थे प्रतिभानं सा प्रतिभा," यद्वा "प्रसिद्धनयार्थयुक्तिबोधविधायिनी। प्रस्फुरन्ती कवेः बुद्धिः प्रतिभा सर्वतो मुखी," प्रतिभा एव प्रातिभं यथार्थसंवेदनं संशयविपर्ययरहितं सत्यस्वरूपवत् ज्ञानमुत्पद्यते प्रादुर्भवति तदार्षमित्याचक्षते "ऋषीणां वसिष्ठगालवप्रभृतीनां यदतीतानागतवैषयिकं ज्ञानं तदार्षम्" इति शङ्कर

मू= आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगात् धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते। तत्तु प्रस्तारेण देवर्षीणाम्। कदाचिदेव लौकिकानाम्। यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति ॥

मिश्राः ॥ यथा च सूत्रम् "आर्षं सिद्धदर्शनञ्च धर्मेभ्यः" वै.द.९।२।१३ तत् आर्षं केषां भवति ॥ तदिति= तदृषाणां प्रस्तारेण बाहुल्येन देवर्षीणां देवानां ऋषीणाञ्च भवति। कदाचित् कस्मिंश्चित्काले लौकिकानां मनुष्याणामपि भवति। यथा कन्यकाऽविवाहिता कुमारी ब्रवीति कथयति अद्य वर्तमानदिवसे मे हृदयं चित्तं कथयति वदति श्वोदिने मे भ्राता सहोदरः आगन्ता इति कोटिद्वयस्पर्शविरहितत्वान्न संशयः हृदयस्पन्दसंवादात् न च विपर्ययः तस्मात् प्रमाणमेवेति दिक्।

सिद्धदर्शनस्य प्रामाण्ये निराकुरुते ॥ सिद्धदर्शनमिति = सिद्धदर्शनं योगिदर्शनं न ज्ञानान्तरं न प्रमाणान्तरं कस्माद्धेतोः प्रयत्नपूर्वकं कृतिपूर्वकम् । अञ्जनपादलेपखड्गगुलिकादिसिद्धानाम् । अञ्जनञ्च "यस्याञ्जनस्य नेत्रयोः धारणादेव सूक्ष्मतरमपि वस्तु दृश्यते„ पादलेपः "येन पादलेपेन सुदूरगमनादपि श्रमो न जायते„ खड्गः — "यस्य धारणेन सर्वे शत्रवो हन्यन्तेऽसिश्च न नश्यति । गुलिका — "यस्याः मुखे धारणेन विषादिभयं नोत्पद्यते„ आदिपदात् दण्डाद्यो गृह्यन्ते तेषु सिद्धानां निजेष्टफलप्राप्तिसमर्थानां दृश्यद्रष्टॄणां दृश्यानां दर्शनयोग्यानाम् सत्त्वरूपाणां पदार्थानां द्रष्टारो ये ते सिद्धा उच्यन्ते, तेषां दृश्यद्रष्टॄणां सिद्धानां सूक्ष्मव्यवहितविप्रकृष्टेषु स्वाञ्जनादिभिः बलात् सूक्ष्मेषु द्व्यणुकवत्सूक्ष्मेषु व्यवहितेषु अन्तरालयुक्तेषु विप्रकृष्टेषु वियुक्तेषु दूरेषु इतियावत् अर्थेषु विषयेषु यद्दर्शनम् इन्द्रियाधीनोद्भवः तत्प्रत्यक्षमेव, न प्रमाणान्तरम् । यद्वा सिद्धदर्शनमनुमानेऽन्तर्भवति ॥ अथेति = दिव्यान्तरिक्षभौमानां दिवि भवं दिव्यं च अन्तरिक्षञ्च भौमञ्च भूमेरिदं भौमं तेषां प्राणिनां जीवानां ग्रहनक्षत्रसञ्चारादिनिमित्तं ग्रहाः सूर्योदयोऽष्टमभवनस्था एवं विदधति । नक्षत्रा-

मू = सिद्धदर्शनं न ज्ञानान्तरं कस्मात्, प्रयत्नपूर्वकमञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टॄणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारादिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टं तदप्यनुमानमेव । अथ लिङ्गानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतमित्येवं बुद्धिरिति ॥

णि अभिजिदादयः एवं कुर्वन्ति । सूर्यमघादीनामत्र सञ्चारेण एवं भविष्यति । आदिपदात् वक्रित्वशीघ्रगत्योर्ग्रहणम् । ग्रहनक्षत्रयोः सञ्चारादिनिमित्तं निमित्तकारणं यत्र तत् धर्माधर्मविपाकदर्शनं धर्मश्चाधर्मश्च धर्माधर्मौ तयोर्विपाको धर्माधर्मविपाकस्तस्य दर्शनं सिद्धदर्शनम् इष्टं ग्रहसञ्चारादिलिङ्गात् । तदप्यनुमानमेव भवति । सिद्धदर्शनमुक्त्वा बुद्धिमुपसंहरति ॥ अथेति = लिङ्गानपेक्षं लिङ्गापेक्षारहितं लिङ्गव्यतिरिक्तमितियावत् धर्मादिषु यद् दर्शनं प्रत्यक्षम् इष्टं अभीष्टं तत् न अनुमानमेव । यत्र इन्द्रियाधीनं धर्मादिदर्शनं तत्प्रत्यक्षमेव अतः तदपि सिद्धदर्शनं प्रत्यक्षार्षयोः अन्यतरस्मिन् एकस्मिन्नन्तर्भूतं मि[illegible]ति । एवं बुद्धिर्व्याख्याता इति शब्दः बुद्ध्युपसंहारे प्रदर्शि ॥

आर्षं (शब्दे प्रमाणम्) आह ॥ आम्नायेति = आम्नायो वेदः तद्विधातॄणाम् दृशोपदिष्टज्ञानसम्पादकानाम् ऋषीणां "ऋषयो मन्त्रद्रष्टारः" इति निरुक्ते तेषां वसिष्ठविश्वामित्रजमदग्निगालववामदेवादीनाम् अतीतानागतवर्तमानेषु अतीताश्च भूताश्च अनागताश्च भविष्यन्तश्च वर्तमानास्ते ऽतीतानागतवर्तमानाः तेषु अतीन्द्रियेषु इन्द्रियागोचरेषु अर्थेषु धर्मादिषु धर्माधर्मादिषु ग्रन्थोपनिबद्धेषु शास्त्रप्रतिपादितेषु अनुपनिबद्धेषु ग्रन्थाप्रतिपादितेषु आत्ममनसोः संयोगात् धर्मविशेषात् विशिष्यते इति विशेषः धर्म एव विशेषो धर्मविशेषः विद्यातपःसमाधिजातो धर्मः तस्मात् यत् प्रातिभं "इन्द्रलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा,, यद्वा "प्रसिद्धन्यायार्थयुक्तिबोधविधायिनी । प्रस्फुरन्ती कवेः बुद्धिः प्रतिभा सर्वतो मुखी,, प्रतिभा एव प्रातिभं यथार्थनिवेदनं संशयविपर्ययरहितं सत्यस्वरूपवत् ज्ञानमुत्पद्यते प्रादुर्भवति तदार्षमित्याचक्षते "ऋषीणां वसिष्ठगालवप्रभृतीनां यदतीतानागतवैषयिकं ज्ञानं तदार्षम्,, इति शङ्कर

मू॰ = आम्नायविधातॄणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगात् धर्मविशेषाच्च यत्प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत्तु प्रस्तारेण देवर्षीणाम् । कदाचिदेव लौकिकानाम् । यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति ॥

मिश्राः ॥ यथा च सूत्रम् "आर्षं सिद्धदर्शनञ्च धर्मेभ्यः,, वै॰द॰९।२।१३ तद् आर्षं केषां भवति ॥ तदिति = तद्ज्ञानं प्रस्तारेण बाहुल्येन देवर्षीणां देवानां ऋषीणाञ्च भवति । कदाचित् कस्मिंश्चित्काले लौकिकानां मनुष्याणामपि भवति । यथा कन्यका ऽविवाहिता कुमारी ब्रवीति कथयति अद्य वर्तमानदिवसे मे मम हृदयं चित्तं कथयति वदति श्वोदिने मे भ्राता सहोदरः आगन्ता इति कोटिद्वयस्पर्शविरहितत्वान्न संशयः हृदयस्पन्दसंवादात् न च विपर्ययः तस्मात् प्रमाणमेवेति दिक् ।

सिद्धदर्शनस्य प्रामाण्ये निराकुरुते ॥ सिद्धदर्शनमिति = सिद्धदर्शनं योगिदर्शनं न ज्ञानान्तरं न प्रमाणान्तरं कस्माद्धेतोः प्रयत्नपूर्वकं कृतिपूर्वकम् । अञ्जनपादलेपखड्गगुलिकादिसिद्धानाम् । अञ्जनञ्च "यस्याञ्जनस्य नेत्रयोः धारणादेव सूक्ष्मतरमपि वस्तु दृश्यते" पादलेपः "येन पादलेपेन सुदूरगमनादपि श्रमो न जायते" खड्गः — "यस्य धारणेन सर्वे शत्रवो हन्यन्तेऽसिश्च न नश्यति । गुलिका — "यस्याः मुखे धारणेन विषादिभयं नोत्पद्यते" आदिपदात् दण्डादयो गृह्यन्ते तेषु सिद्धानां निजेष्टफलप्राप्तिसमर्थानां दृश्यद्रष्टॄणां दृश्यानां दर्शनयोग्यानाम् स्वस्वरूपाणां पदार्थानां द्रष्टारो ये ते सिद्धा उच्यन्ते, तेषां दृश्यद्रष्टॄणां सिद्धानां सूक्ष्मव्यवहितविप्रकृष्टेषु स्वाञ्जनादिभिः बलात् सूक्ष्मेषु द्व्यणुकवत्सूक्ष्मेषु व्यवहितेषु अन्तरालयुक्तेषु विप्रकृष्टेषु वियुक्तेषु दूरेषु इतियावत् अर्थेषु विषयेषु यद्दर्शनम् इन्द्रियाधीनानुभवः तत्प्रत्यक्षमेव, न प्रमाणान्तरम् । यद्वा सिद्धदर्शनमनुमानेऽन्तर्भवति ॥ अथेति = दिव्यान्तरिक्षभौमानां दिवि भवं दिव्यं च अन्तरिक्षञ्च भौमञ्च भूमेरिदं भौमं तेषां प्राणिनां जीवानां ग्रहनक्षत्रसञ्चारादिनिमित्तं ग्रहाः सूर्यादयोऽष्टमभवनस्था एवं विदधति । नक्षत्रा-

मू = सिद्धदर्शनं न ज्ञानान्तरं कस्मात्, प्रयत्नपूर्वकमञ्जनपादलेपखड्गगुलिकादिसिद्धानां दृश्यद्रष्टॄणां सूक्ष्मव्यवहितविप्रकृष्टेष्वर्थेषु यद्दर्शनं तत्प्रत्यक्षमेव । अथ दिव्यान्तरिक्षभौमानां प्राणिनां ग्रहनक्षत्रसञ्चारादिनिमित्तं धर्माधर्मविपाकदर्शनमिष्टं तदप्यनुमानमेव । अथ लिङ्गानपेक्षं धर्मादिषु दर्शनमिष्टं तदपि प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतमित्येवं बुद्धिरिति ॥

णि अभिजिदादयः एवं कुर्वन्ति । सूर्यमघादीनामत्र सञ्चारेण एवं भविष्यति । आदिपदात् वक्रित्वशीघ्रगत्योर्ग्रहणम् । ग्रहनक्षत्रयोः सञ्चारादिनिमित्तं निमित्तकारणं यत्र तत् धर्माधर्मविपाकदर्शनं धर्मश्चाधर्मश्च धर्माधर्मौ तयोर्विपाको धर्माधर्मविपाकस्तस्य दर्शनं सिद्धदर्शनम् इष्टं ग्रहसञ्चारादिलिङ्गात् । तदप्यनुमानमेव भवति । सिद्धदर्शनमुक्त्वा बुद्धिमुपसंहरति ॥ अथेति = लिङ्गानपेक्षं लिङ्गापेक्षारहितं लिङ्गव्यतिरिक्तमितियावत् धर्मादिषु यद् दर्शनं प्रत्यक्षम् इष्टं अभीष्टं तत् तु अनुमानमेव । यत्र इन्द्रियाधीनं धर्मादिदर्शनं तत्प्रत्यक्षमेव अतः तदपि सिद्धदर्शनं प्रत्यक्षार्षयोः अन्यतरस्मिन् एकस्मिन्नन्तर्भूतमि[redacted]ति । एवं बुद्धिर्व्याख्याता इति शब्दः बुद्ध्युपसंहारे प्रदर्शि ॥

प्रश-भा
१२६
[illegible]

बुद्धिकार्ये सुखं प्रतिपाद्यते॥ अनुग्रहेति = अनुग्रहलक्षणम् अनुगृह्यते ऽनेनेति अनुग्रहः तस्य लक्षणे स्वरूपे तत्सुखमित्युच्य-
ते। विस्तरेण तल्लक्षयति = स्रगाद्यभिप्रेतविषयसांनिध्ये स्रगादयः स्रक् पुष्पमाला [illegible] चन्दनवनितादयो येऽभिप्रेता अभीष्टा
विषया अर्थास्तेषां सांनिध्ये सति संनिधेर्भावः सान्निध्यं तस्मिन् सान्निध्ये समीपे सति इष्टोपलब्धीन्द्रियार्थसन्निकर्षात्
इष्टस्य स्वाभिलषितस्य या उपलब्धिः तत्रेन्द्रियार्थसन्निकर्षात् इन्द्रियविषयसामीप्यात् , धर्माद्यपेक्षात् धर्म आदिपदात्
स्वास्थ्यग्रहणे तयोरपेक्षा अस्ति यत्र तथाभूतात् आत्ममनसोः संयोगात् संयोगविशेषात् अनुग्रहाभिष्वङ्गनयना-
दिप्रसादजनकम् अनुग्रहः सुखविषयं संवेदनम् , अभिष्वङ्गोऽनुरागः , नयनादिप्रसादः नयनयोः नेत्रयोः [illegible]
[illegible] प्रसादः प्रसन्नता , आदिपदात् चित्ताह्लादकलमुखो ज्वलते ग्राह्ये , एतेषां विश्लेषां
जनकं कारणं मुखादकस्मितियावत् उत्पद्यते यत् तत्सुखमिति। इतरेच्छानधीनेच्छाविषयत्वे सति भावत्वं सुखत्वम् ,, "धर्मप्रभव

मू = अनुग्रहलक्षणं सुखम्। स्रगाद्यभिप्रेतविषयसान्निध्ये सति इष्टोपलब्धीन्द्रियार्थसन्नि-
कर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगादनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्प-
द्यते तत्सुखम्। अतीतेषु विषयेषु स्मृतिजम्। अनागतेषु संकल्पजम्। यत्तु विदुषाम-
सत्सु विषयानेस्मरणेच्छासंकल्पेष्वाविर्भवति तद्विद्याशमसन्तोषधर्मविशेषनिमि-

त्तं सुखत्वम् ,वा ,, यद्वा "आत्मेन्द्रियार्थसन्निकर्षात् सुखदुःखे ,, वै.द. ५।२।१५ "सुखोत्पत्तिः कुतः तत्राह प्रमाणम् "इष्टानिष्टका-
रणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरर्थान्तरभावः ,, वै.द. १०।१।१ अतीतानागतविषयेषु कुतः सुखाविर्भा-
वः इत्यत आह॥ अतीतेष्विति = अतीतेषु गतेषु विषयेषु सुखसाधनेषु स्मृतिजं स्मरणजन्यं सुखं भवति। यथा "ओहो! कथं चन्दनलेपेन मह्यं तेन शांति-
रभूत् येनाहं सुखमन्वभवम् "। अनागतेषु आगामिषु विषयेषु संकल्पजं संकल्पः मानसी दशा तस्माज्जायते इति संकल्पजः तत्संकल्प-
जं सुखं भवति। यथा अहमेवंविधं धर्मं कर्म वा करिष्यामि यतः सुखमेव भविष्यतीति संकल्पजं सुखम्। यत्तु सुखं विदुषां विपश्चितां असत्सु
अविद्यमानेषु विषयाऽनुस्मरणेच्छासंकल्पेषु विषयश्चेत्तान स्मरणञ्चेच्छा च संकल्पश्चेति विषयाऽनुस्मरणेच्छासंकल्पास्तेषु आविर्भवति
जायते यत् तत्सुखम् विद्याशमसन्तोषधर्मविशेषनिमित्तम्। विद्याऽऽत्मज्ञानम् , शमो जितेन्द्रियत्वम् , सन्तोषः निजकर्मफललब्ध-
व्यतिरिक्तानभिलषत्वम् , धर्मविशेषः अपवर्गसाधकधर्मः एते चत्वारः निमित्तं कारणमात्रं यत् तत्सुखम् भवति। यथा च सूत्रम्
"अभूदित्यपि च ,, वै.द. १०।१।४।

दुःखं निर्वक्ति ॥ उपघातेति = उपघातलक्षणम् । उपहन्यतेऽनेनेत्युपघातः पीडा, तल्लक्षणं स्वरूपं यस्य तद्दुःखम् । विषाद्यनभिप्रेतविषयसांनिध्ये सति विषम् आदिपदात् सिंहव्याघ्रकादीनां ग्रहणम् विषादयोऽनभिप्रेताः अनभीष्टा ये विषयाः तेषां सांनिध्ये सामीप्ये सति अनिष्टोपलब्धीन्द्रियार्थसन्निकर्षात् । अनिष्टस्य अप्रियस्य या उपलब्धिः प्राप्तिः तत्रेन्द्रियार्थसन्निकर्षात् इन्द्रियाणामर्थस्य विषयस्य सन्निकर्षात् सामीप्यात् अधर्माद्यपेक्षात् अधर्मः पापम् आदिपदेन स्तेयहिंसादयो गृह्यन्ते तेषामपेक्षाऽस्ति यत्र तथाभूतात् आत्ममनसोः संयोगात् आत्मनो मनसश्च संयोगात्, अमर्षोपघातदैन्यनिमित्तम् । अमर्षोऽसहिष्णुता द्वेषो वा, उपघातः पीडा दैन्यम्

मू = उपघातलक्षणं दुःखम् । विषाद्यनभिप्रेतविषयसान्निध्ये सति अनिष्टोपलब्धीन्द्रियार्थसंनिकर्षादधर्माद्यपेक्षादात्ममनसोः संयोगात् यदमर्षोपघातदैन्यनिमित्तमुत्पद्यते तद्दुःखम् । अतीतेषु सर्पव्याघ्रचौरादिषु स्मृतिजम् । अनागतेषु संकल्पजमिति ॥

विह्वलयत्वम् । तेषां निमित्तं निमित्तकारणं यदुत्पद्यते प्रादुर्भवति तत् दुःखमित्युच्यते । "इतरद्वेषाऽनधीनद्वेषविषयत्वम् दुःखत्वम्", यद्वा "अधर्मप्रभवं दुःखम्", यद्वा "प्रतिकूलवेदनीयत्वम् दुःखम् । यथा च सूत्रम्" बाधालक्षणं दुःखम् न्या० १।१।२१ भूतभविष्यतोः दुःखयोः कथमुत्पत्तिरित्याह ॥ अतीतेष्विति = भूते स्मृतिजन्यम् भविष्यति काले संकल्पजन्यं दुःखं भवति यथा पूर्वं सर्पेणाहं दष्टोऽतोऽपुना स्मर्यते सर्पदंशनाद्दुःखं भवति ॥ अहं कंचिदपि मर्त्यं न हन्मि यतोऽयं पुना रहसि मां हनिष्यति, यथाऽस्य देहे दुःखं भविष्यति तथा मद्देहेऽप्येवमेवम् अन्यत्राऽप्यूह्यम् ॥

१८०

इच्छां निरूपयति ॥ स्वार्थमिति = स्वार्थे स्वनिमित्ते वा परार्थे परनिमित्ते ऽप्राप्तप्रार्थना अप्राप्तस्य अलब्धस्य वस्तुनः प्रार्थना ईशान्तु-
पातः इदं मे भूयात् - ईश्वरदयात् इदमस्य भूयात् इति या प्रार्थना सा इच्छा इति कथ्यते। सा इच्छा च आत्ममनसोः सं-
योगात् आत्मनः मनसश्च संयोगसम्बन्धात् सुखाद्यपेक्षात् सुखादीनामस्ति अपेक्षा यत्र तस्मात्। स्मृत्यपेक्षात् स्मृतेः
स्मरणस्य अस्ति अपेक्षा यत्र तस्मात् उत्पद्यते प्रादुर्भवति। प्रयत्नस्मृतिधर्माधर्महेतुः, उपादानेच्छातः तदनुगुणः प्रयत्नः
स्मरणेच्छातः स्मृतिः, स्वर्गादिसाधककृतुफलेहया प्रवृत्तस्य नरस्य धर्मो भवति। निषिद्धकर्मसेवनकस्य मनुष्यस्य
धर्मो जायते ऽत एषा प्रयत्नादीनां हेतुः कारणमिच्छा भवति। यथा "इच्छात्वसामान्यवतीच्छा,, तद्भेदानाह ॥ काम इति

मू = स्वार्थं परार्थं वाऽप्राप्तप्रार्थनेच्छा। सा चात्ममनसोः संयोगात् सुखाद्यपेक्षात् स्मृ-
त्यपेक्षादुत्पद्यते। प्रयत्नस्मृतिधर्माधर्महेतुः। कामोऽभिलाषः रागः संकल्पः
कारुण्यं वैराग्यम् उपधा भावः इत्येवमादय इच्छाभेदाः। मैथुनेच्छा कामः।
अभ्यवहारेच्छाऽभिलाषः। पुनः पुनर्विषयानुरञ्जनेच्छा रागः। अनासन्नक्रिये-
च्छा संकल्पः। स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम्। दोषदर्शनाद्विष-
यत्यागेच्छा वैराग्यम्। परवञ्चनेच्छा उपधा। अन्तर्निगूढेच्छा भावः। चिकीर्षा
जिहीर्षेत्यादिक्रियाभेदादिच्छाभेदा भवन्ति ॥

कामादिभेदादिच्छाऽनेकविधा। मैथुनेच्छा स्त्रीगमनेच्छा कामः १ अभ्यवहारेच्छा भोजनेच्छाऽभिलाषः। पुनः पुनर्विषयाऽनुरञ्जनेच्छा वारं वारं
विषयाणामर्थानामनुरञ्जनं प्रीतिप्रदर्शनं तदिच्छा रागः। भोगेच्छा वा रागः ३ अनासन्नक्रियेच्छा दूरवर्तिकर्मकरणेच्छा संकल्पः ४
स्वार्थं स्वकीयस्य अर्थं तत्त्वम् अनपेक्ष्य अदृष्ट्वा परदुःखप्रहाणेच्छा परस्य द्वितीयपुरुषस्य गतस्य दुःखस्य प्रहाणे विनाशकरणे
या इच्छा तत्कारुण्यम् उच्यते ५ दोषदर्शनात् परवस्तुषु दोषाणामवलोकनादेव विषयत्यागेच्छा विषयाणां परिवर्जने या इच्छा तद्वैरा-
ग्यम् ६ परवञ्चनेच्छा परप्रतारणेच्छा सा उपधा ७ यथा च सूत्रम् "भावदोष उपधाऽदोषोऽनुपधा,, वै॰ द॰ ६।२।४ अन्तर्निगू-
ढेच्छा मनसि गुप्ता चेष्टादिभिराविर्भाविता या इच्छा स भावः ८ चिकीर्षा कर्तुमिच्छा। जिहीर्षा हर्तुमिच्छा आदिपदात् [illegible] जिगमिषापि
पठिषादिभेदात् इच्छायाः भेदा भवन्तीति ॥

द्वेषमाचष्टे ॥ प्रज्वलनेति = प्रज्वलनात्मको [redacted] प्रज्वलनमेव आत्मा स्वरूपं यस्य स प्रज्वलनात्मकः दहनात्मकः द्वेषो भवति। यस्मिन् कर्मणि सति प्रज्वलितमिव दग्धमिव आत्मानं मन्यते स द्वेषः "द्वेष्मीत्यनुभवसिद्ध द्वेषत्वजातिमत्वं द्वेषत्वम्" यथा च पतञ्जलिनाऽप्युक्तम् "दुःखानुशयी द्वेषः" यो.द.२।८ स च द्वेषः कस्मादुत्पद्यते ॥ स चेति = स च द्वेषः [redacted] दुःखापेक्षात् दुःखस्यापेक्षा अस्ति यत्र तथाभूतात् स्मृत्यपेक्षात् स्मरणाऽपेक्षावतः आत्ममनसोः संयोगात् उत्पद्यते प्रादुर्भवतीति ॥ केषां हेतुरयम् ॥ प्रयत्नेति =

मू = प्रज्वलनात्मको द्वेषः। यस्मिन् सति प्रज्वलितमिव आत्मानं मन्यते सः द्वेषः। स चात्ममनसोः संयोगात् दुःखापेक्षात्स्मृत्यपेक्षाद्दुत्पद्यते। प्रयत्नस्मृतिधर्माधर्महेतुः। क्रोधो द्रोहः मन्युरक्षमाऽमर्षः इति द्वेषभेदाः॥

प्रयत्नश्च स्मृतिश्च धर्मश्च अधर्मश्च तेषां हेतुः कारणं यथा अस्य मदीयभ्रातुः महान् आदरः, यतोऽयं पण्डितोऽतोऽहमपि पठामि इति प्रयतते। कंसो द्वेषादेव सदा श्रीकृष्णं सस्मार। द्वेषाद्धर्मो यथा हिंसाऽनर्थकारिषु "अहिंसा परमो धर्मः" इति धर्ममुपदिशति ॥ द्वेषादधर्मो यथा हिंसापरिपालनादहिंसापरिपालनपरेषु द्वेषादधर्मो भवति ॥ तद्भेदाः के ॥ क्रोध इति = क्रोधः१ द्रोहः२ मन्युः३ अक्षमा ४ अमर्षः५ इति भेदाद्द्वेषः पञ्चधा भवति। क्रोधः देहेन्द्रियविकृतिहेतुः क्षणिकः१ पूर्वोक्तोऽपकृतिपाको द्रोहः२ अपकृतस्य प्रत्यपकारप्रदानाऽसमर्थस्य मनोऽवस्थितो द्वेषो मन्युः३ परगुणाऽसहिष्णुता अक्षमा ४ स्वगुणतिरस्कृतिजन्योऽमर्षः ५॥ श्रीः श्रीः श्रीः

प्रयत्नमाख्याति प्रयत्न इति= प्रयत्नः संरम्भः उत्साह इति नामत्रयवान् प्रयत्नः द्विविधः जीवनपूर्वकः १ इच्छाद्वेषपूर्वकश्च। शरीरेन्द्रियबुद्धीनां निकायविशिष्टः प्रादुर्भावो जन्म वा जीवनं तत्पूर्वकः प्रयत्नः जीवनपूर्वकः। इच्छाद्वेषपूर्वकश्च इच्छा द्वेषः वा पूर्वं यस्य स प्रयत्नः इच्छाद्वेषपूर्वकः, इच्छाद्वेषनिरूपणे प्राग् वर्णिते। जीवनपूर्वकमाह। तत्रेति= तत्र तयोर्मध्ये जीवनपूर्वकः सुप्तस्य निद्रांगतस्य पुरुषस्य प्राणापानसन्तानप्रेरकः प्राणापानोदानादिसञ्चालकः प्रबोधकाले पुरुषस्य जागरणसमयेऽन्तःकरणस्य चित्तस्य इन्द्रियान्तरप्राप्तिहेतुः मनो यदा कर्णेन्द्रियं परित्यज्य वाणीन्द्रियं याति तद् यत्कर्म तस्य हेतुः कारणम्। यथाऽनुमानद्वयम्। "सुप्तस्य प्राणापानक्रिया प्रयत्नकार्या क्रियात्वात्" "विषयोपलम्भानुमितान्तःकरणेन्द्रियसंयोगः प्रयत्नपूर्वकान्तःकरणक्रियाजन्योऽन्तःकरणेन्द्रियसंयोगत्वात् जागरान्तःकरणेन्द्रियसंयोगवत्" इति प्रयत्नपूर्वकतासिद्धिः। अस्य जीवनपूर्वकस्य धर्माधर्मापेक्षात् धर्माऽधर्मयोरपेक्षाऽस्ति यत्र तस्मात् तथाभूतात् आत्ममनसोः संयोगात् संमेलनात् उत्पत्तिर्भवति॥ द्वितीयं प्रयत्नमाचष्टे॥ इतर इति=

मू= **प्रयत्नः संरम्भ उत्साह इति पर्यायाः। स द्विविधो जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च। तत्र जीवनपूर्वकः सुप्तस्य प्राणापानसन्तानप्रेरकः प्रबोधकाले चान्तःकरणस्येन्द्रियान्तरप्राप्तिहेतुः। अस्य जीवनपूर्वकस्यात्ममनसोः संयोगाद्धर्माधर्मापेक्षादुत्पत्तिः। इतरस्तु हिताहितप्राप्तिपरिहारसमर्थस्य व्यापारस्य हेतुः शरीरविधारकश्च। स चात्ममनसोः संयोगादिच्छाऽपेक्षाद्द्वेषाऽपेक्षाद्वोत्पद्यते॥**

इतरस्तु प्रयत्नः इच्छाद्वेषपूर्वकस्तु प्रयत्नः हिताहितप्राप्तिपरिहारसमर्थस्य हितस्य मधुरभोजनराज्यप्राप्त्यादेः प्राप्तौ समीहायाम् यथा च सूत्रम् "**प्रवृत्तिर्वाग्बुद्धिशरीरारंभः**" न्या० द० १।१।१७ अहितस्य विषदिग्धान्नादेः परिहारे त्यागे समर्थस्य शक्तस्य व्यापारस्य क्रियायाः हेतुः कारणं शरीरविधारकश्च हस्तपादादिसंयुक्तस्य गुरोः शरीरस्य यद् धारणं तत्प्रयत्नकर्म अतः शरीरविधारक इत्युक्तम्। स च इच्छाद्वेषपूर्वकः प्रयत्नः इच्छाऽपेक्षात् हितसाधनोपादानेषु प्रयत्न इच्छापूर्वकः तदपेक्षाऽस्ति यत्र तथाभूतात्। दुःखसाधनपरित्यागे वा प्रयत्नो द्वेषपूर्वकः तदपेक्षाऽस्ति यत्र तस्मात् तथाभूतात् आत्ममनसोः संयोगात् आत्ममनसोः संमेलनात् उत्पद्यते जायते इति॥ श्री: श्री: श्री!

गुरुत्वमाचष्टे ॥ गुरुत्वमिति = गुरुत्वं जले भूमौ च वायौ गुरुत्वं नास्ति, तस्य भूम्युपरि वृत्तित्वात् । पतनकर्म कारणं पतनकर्म वस्तुनः उपरि भागाद् अधः पतनं यत्कर्म तस्य कारणमसमवायिकारणम् इतिभावः , असमवायिकारणत्वस्य गुणकर्ममात्रवृत्तित्वात् । तद् गुरुत्वम् अप्रत्यक्षं केनचि दिन्द्रियेण अग्राह्यम् अतीन्द्रियमितिभावः । तत्र त्वगिन्द्रियप्रत्यक्षं पाश्विर्णां मतेऽधःस्थद्रव्यस्य शैथिल्यपत्तिवत्तत्रापि प्रसंगः । तदप्रत्यक्षत्वे कुतो ग्राह्यं तत्राह पतनकर्मानुमेयम् पतनकर्मणाऽनुमीयते, यदा किञ्चिद् द्रव्यं पतति तदाऽनुमीयते क्रियां विनाऽन्यत्र किञ्चित्तदा यत् साध्यते तत्कारणं तदेव गुरुत्वमिति । तदेव संयोगप्रयत्नसंस्कारविरोधि । संयोगविरोधि यथा "संयोगे सति पतनाऽभावो यथा वृक्षाऽऽरूढस्य तद्धारणासंयोगात् अपतनं भवति संयोगाऽभावे पतनसंभवः यथा च सूत्रम् "**संयोगाभावे गुरुत्वात्पतनम्** " वै. द. ५।१।७ प्रयत्नविरोधि = प्रयत्ने सति पतनाऽभावः यथा प्रयत्नेनोद्धृतः शकुनेरपतनं " तथा प्रयत्नाऽभावे तत्पतनं दृश्यते । संस्कारविरोधि यथा " वेगाख्ये संस्कारे सति अदृष्टं पतनं, यथा धनुषो निःसृतस्य बाणस्यापतनं वेगाऽभावे पतनं दृष्टं यथा च सूत्रम्" सं

मू = गुरुत्वं जलभूम्योः पतनकर्मकारणम् । अप्रत्यक्षं पतनकर्मानुमेयं संयोगप्रयत्नसंस्कारविरोधि । अस्य चाबादिपरमाणुरूपादिवन्नित्यानित्यत्वनिष्पत्तयः ।

स्काराऽभावे गुरुत्वात्पतनम् " वै. द. ५।१।१८ पाश्चात्य वैज्ञानिका गुरुत्वं पृथिव्यादिगताकर्षणशक्तिविशेषं मन्यन्ते ॥ तमोगुणधर्म एव तदिति कापिलाः " एतन्नित्याऽनित्यते समाचष्टे ॥ अस्येति = अस्य गुरुत्वस्य नित्यता पृथिवीजल परमाणुषु अनित्यता च ~~[illegible]~~ पृथिवीजल~~[illegible]~~ द्व्यणुकादिषु । यथा पृथिव्यादिपरमाणुषु रूपादयो नित्यानित्यत्ववन्तः सन्ति । आश्रयविनाशाद् यथा रूपादयो नश्यन्ति तथा गुरुत्वमपि नश्यति ॥

द्रवत्वं वर्ण्यते ॥ द्रवत्वमिति = द्रवत्वं स्यन्दनकर्मकारणम् जलादेर्यत्स्यन्दनं दूरसंसरणं कर्म तस्य कारणम् असमवायिकारणं यथा अप्सु समवायिकारणत्वं द्रवत्वम् असमवायिकारणम् गुरुत्वं निमित्तकारणम् । यथा च सूत्रम् " द्रवत्वात्स्यंदनम् ,, वै॰ द॰ ५।२।४ द्रवत्वं त्रिद्रव्यवृत्ति त्रिषु पृथिव्यप्तेजःसु द्रव्येषु वृत्तिर्निवासो यस्य तत् । सांसिद्धिकनैमित्तिकभेदात्तद्द्विविधम् ॥ तद्द्विविधं कुत्र वर्तते इत्याह ॥ सांसिद्धिकमिति = सांसिद्धिकं स्वभावसिद्धं द्रवत्वं वर्तते अपां जलस्य विशेषगुणः असाधारणगुणः, पृथिवीतेजसोः सामान्यगुणः । पृथिवीतेजसोः नैमित्तिकं निमित्तं वह्निसंयोगः तस्येदं कार्यं, नैमित्तिकं निमित्तजन्यमिति यावत् सामान्यगुणः साधारणत्वात् । यथा गुरुत्वं नित्ये नित्यम् अनित्येऽनित्यं तथा सांसिद्धिकद्रवत्वमपि जलपरमाणौ नित्यं कार्यजले चानित्यम् । यथाऽऽश्रयविनाशादनित्यगुरुत्वं नश्यति तथाऽनित्यसांसिद्धिकद्रवत्वमपि नश्यति । हिमकरकादिषु सांसिद्धिकद्रवत्वस्यातिप्रसंगोऽत आह ॥ संघातेति = हिमादिषु संघातदर्शनात् काठिन्यदर्शनात् सांसिद्धिकं जले सांसिद्धिकद्रवत्वमयुक्तं भवितुमर्हति ॥ तदुत्तरमाह ॥ इतीचेति = जलसंघातत्वा न्न

मू= द्रवत्वं स्यन्दनकर्मकारणम् ॥ त्रिद्रव्यवृत्ति । तत्तु द्विविधम् सांसिद्धिकं नैमित्तिकञ्च । सांसिद्धिकमपां विशेषगुणः । नैमित्तिकं पृथिवीतेजसोः सामान्यगुणः । सांसिद्धिकस्य गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः । संघातदर्शनात्सांसिद्धिकमयुक्तम् । इति चेन्न, दिव्येन तेजसा संयुक्तानामाप्यानां परमाणूनां परस्परं संयोगो द्रव्यारम्भकः संघाताख्यः । तेन परमाणुद्रवत्वप्रतिबन्धात् । कार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः ॥

सांसिद्धिकं द्रवत्वं जले इति चेन्न । इति न भवति तत्रोत्तरमाह ॥ दिव्येन तेजसा विद्युता आप्यानां जलीयानां परमाणूनां परस्परं मिथः संयोगो द्रव्यारंभकः द्रव्यस्य जलद्व्यणुकादेः आरम्भो यत्र तथाभूतः संघाताख्यः काठिन्यं तेन हेतुना करकारम्भकाणां परमाणूनां द्रवत्वावरोधात् - दिव्यतेजःसंयोगेन परमाणूनां द्रवत्वं प्रतिबद्धमिति हेतोः कार्ये संघातकार्ये हिमकरकादौ द्रवत्वानुत्पत्तिः सांसिद्धिकद्रवत्वस्य तिरोभावः । ततः भौमाग्नेः संयोगात्तत्र करकादौ द्रवत्वं जायतेऽतः सिद्धमिदं जले प्रतिबन्धाभावात् सांसिद्धिकद्रवत्वमवबोध्यम् । यथा च सूत्रं "अपां संघातो विलयनञ्च तेजःसंयोगात् ,, वै॰ द॰ ५।२।८ परं प्रत्यक्षविरुद्धोऽयं सिद्धान्तः जलं शीतप्रदानाद् घनीभवति । घर्मप्रदानात् द्रवीभूतं प्रदृश्यते । एतत्प्रतिकूलं कदाऽपि न दृष्टं न च संश्रुतम् ॥

नैमित्तिकद्रवत्वं कुत्र कथं भवतीत्याह ॥ नैमित्तिकमिति = पृथिव्यां तेजसि च अग्निसंयोगजम् वह्निसंयोगात् जायमानं यद् द्रवत्वं तन्नैमित्तिकमित्युच्यते । कथं केन प्रकारेण भवति तदित्युत्तरयति । सर्पिर्जतुमधूच्छिष्टादीनां सर्पिः घृतं, जतुः लाक्षा, मधूच्छिष्टं सिक्थं (मोम इति हिन्दीभाषायां प्रसिद्धम्) आदिपदात् स्वर्णलोहादिधातूनां ग्रहणं तेषां पार्थिवतैजसानां कारणेषु समवायिकारणेषु परमाणुषु वेगाऽपेक्षात् वेगस्य वेगाख्यसंस्कारस्यापेक्षाऽस्ति यत्र तथाभूतात् अग्निसंयोगात् प्रकृष्टतेजःसंयोगाद्वा कर्मोत्पत्तौ क्रियोत्पत्तौ तज्जेभ्यः तस्मात्कर्मणो जायते इति तज्जः कर्मजः तेभ्यः तज्जेभ्यः कर्मजातेभ्यो विभागेभ्यः द्रव्यारम्भकसंयोगविनाशात् द्रव्यस्य सर्पिरादेर्यः आरम्भकसंयोगः तस्य विनाशात् कार्यद्रव्यनिवृत्तौ कार्यद्रव्यस्य स्थूलद्रव्यसर्पिरादेः या निवृत्तिः तस्यां सत्याम् औष्ण्यापेक्षात् उष्णस्यभावः औष्ण्यं तस्याऽपेक्षाऽभिलाषोऽस्ति यत्र तथाभूतात् अग्निसंयोगात् स्वतन्त्रेषु परमाणुषु द्रवत्वं संसृतिरुत्पद्यते प्रादुर्भवतीति, ततः कार्यद्रव्यविनाशपूर्वकद्रवोत्पत्त्यनन्तरं तेषु प्रादुर्भूतद्रवत्वेषु परमाणुषु भोगिनां प्राणिनां मम दृष्टाऽपेक्षात् धर्माऽधर्माऽपेक्षात्

मू॰ = **नैमित्तिकञ्च पृथिवीतेजसोरग्निसंयोगजम् । कथम् । सर्पिर्जतुमधूच्छिष्टादीनां कारणेषु परमाणुष्वग्निसंयोगाद्वेगाऽपेक्षात्कर्मोत्पत्तौ तज्जेभ्यो विभागेभ्यो द्रव्यारम्भकसंयोगविनाशात् कार्यद्रव्यनिवृत्तावग्निसंयोगादौष्ण्याऽपेक्षात् स्वतन्त्रेषु परमाणुषु द्रवत्वमुत्पद्यते । ततस्तेषु भोगिनामदृष्टाऽपेक्षादात्माणुसंयोगात्कर्मोत्पत्तौ तज्जेभ्यः संयोगेभ्यो द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यते तस्मिंश्च रूपाद्युत्पत्तिसमकालं कारणगुणप्रक्रमेण द्रवत्वमुत्पद्यते ॥**

आत्माणुसंयोगात् आत्मनः अणुनाश्च संयोगात् कर्मोत्पत्तौ क्रियायामुत्पन्नायां तज्जेभ्यः कर्मजातेभ्यः संयोगेभ्यः परस्परसंयोगेभ्यः द्व्यणुकादिप्रक्रमेण पूर्वं द्व्यणुकं ततस्त्र्यणुकं ततश्चतुरणुकमेवं क्रमेण कार्यद्रव्यमुत्पद्यते । तस्मिन् कार्यद्रव्ये जाते रूपाद्युत्पत्तिसमकालेम । यदा तत्र कार्यद्रव्ये रूपमुत्पद्यते तस्मिन्नेव काले कारणगुणप्रक्रमेण कारणगुणाः कार्यगुणान् आरभन्त इति क्रमेण कारणगुणद्रवत्वेभ्यः कार्यगुणद्रवत्वमुत्पद्यते । एवमन्यत्राऽप्यूह्यम् यथा च सूत्रम् **सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगात् द्रवत्वमद्भिः सामान्यम् ॥ वै॰द॰ २।१।६" त्रपुसीसलोहरजतसुवर्णानामग्निसंयोगाद्द्रवत्वमद्भिः सामान्यम् ॥ वै॰द॰ २।१।७ ॥**

स्नेहो व्याख्यायते॥ स्नेह इति= स्नेहः अपां जलस्य विशेषगुणः असाधारणगुणः अन्यत्राऽभावात्। स च स्नेहः संग्रहमृजादिहेतुः संग्रहः परस्परवियुक्तै कत्रीकरणम्। मृजा प्रोक्षणादिनाऽङ्गनिर्मलीकरणम्। आदिपदात् मृदुत्वोपसंग्रहः तेषां हेतुः कारणम्। अस्य स्नेहस्याऽपि गुरुत्ववत् परमाणौ नित्यता द्व्यणुकादौ चानित्यताऽऽश्रयविनाशादनित्यस्नेहो विनश्यति। यथा च सूत्रम् "रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च" वै० द० २।१।२ संस्कारं निरूपयति॥ संस्कार इति= सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कार उच्यते स च वेगः, भावना, स्थितिस्थापकः इति भेदात् त्रिधा। तत्र वेगो निर्दिश्यते॥ तत्रेति= तत्र तेषां मध्ये वेगाख्यः संस्कारः मूर्तिमत्सु पृथिव्यप्तेजोवायुमनांसि मूर्तद्रव्याणि तेषु पञ्चसु द्रव्येषु निमित्तविशेषाऽपेक्षात् कारणविशेषा नोदनाभिघातादयः तेषामपेक्षापूर्वकात् कर्मणः जायते। यथा यदा इषुः लक्ष्यते लक्ष्ये तदा ज्याकृष्टिसंयोगजन्मः इषुर्येन संस्कारेण गच्छति स प्रत्यक्षसिद्ध एव वेगाख्यः संस्कारः, तत्र इषुः समवायिकारणम् नोदनमसमवायिकारणम् प्रय

मू= स्नेहोऽपां विशेषगुणः। संग्रहमृजादिहेतुः। अस्यापि गुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः। संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्च॥ तत्र वेगो मूर्तिमत्सु पञ्चसु द्रव्येषु निमित्तविशेषाऽपेक्षात् कर्मणो जायते। नियतदिक्क्रियाप्रबन्धहेतुः। स्पर्शवद्द्रव्यसंयोगविशेषविरोधी क्वचित्कारणगुणपूर्वक्रमेणोत्पद्यते॥

त्नगुरुत्वे निमित्तकारणे भवतः। स च नियतदिक्क्रियाहेतुर्यस्यां दिशि कर्मणः वेगो जन्यते तन्नियतदिशाऽभिमुखेन कर्मसन्ततेः कारणमेव नान्यस्याः। स्पर्शवद्द्रव्यसंयोगविशेषविरोधी= यथा स्पर्शः द्रव्ये लब्ध्वा स्वयमेव विनश्यति तथा वेगोऽपि निबिडावयववन्ते द्रव्यसंयोगविशेषं समेत्य प्रणश्यति। यथा इषोर्वेगे नागच्छतो भित्तौ लग्नस्य वेगो विनश्यत्यतः द्रव्यसंयोगविशेषविरोधीत्युक्तम्। क्वचित् कदाचिद्बाहुल्येन न तु सर्वदा कारणगुणपूर्वक्रमेण कर्मजो वेग उत्पद्यते। यथा यदा बाणज्याविभागानन्तरं नोदननिवृत्तिस्ततः प्रथमकर्मप्रेरितात् वेगाख्यसंस्कारादेव कर्माणि भवन्ति तावद् यावत्तन्निरोधो न भवति। अत्र कर्मान्तरजननादेक एव संस्कारः कर्मव्यूहकारणं न तु कर्मसंततिवत् संस्कारसंततिरव सेया, गौरवप्रसंगात्। यथा च सूत्रम् "नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरञ्च" वै० द० ५।१।१७।

भावनासंस्कार माचष्टे ॥ भावनेति = भावनाख्यसंस्कार आत्मनो गुणोऽस्ति नान्यस्य । अयं भावनासंस्कारो दृष्टश्रुतानुभूतेषु अर्थेषु दृष्टेऽर्थे श्रुतेऽर्थेऽनुभूतेऽर्थे स्मृतिप्रत्यभिज्ञानहेतुः स्मृतेः कारणं प्रत्यभिज्ञानस्य कारणं भवति "प्रत्यभिज्ञानं नाम पूर्वापरयोर्विज्ञानयोरेकविषये प्रतिसन्धिज्ञानम्," यथा यमद्राक्षं तमेवैतर्हि पश्यामि यो स एवाऽयमर्थः, इति प्रत्यभिज्ञा । अयं भावनासंस्कारो ज्ञानविरोधी मदविरोधी दुःखविरोधी," आदिशब्देन सुखादिपरिग्रहः । ज्ञानविरोधी यथा विपरीतज्ञानेन संस्कारो नश्यति । द्यूतादिव्यासक्तस्य शपस्त्रा ~~[illegible]~~ विस्मरणमेवोपजायते । मदविरोधी यथा सुरामत्तस्य सुक्रियाव्यवहारलोपो दृश्यते दुःखविरोधी यथाऽधिभौतिकादिदुःखेन दुष्यन्तवन्नश्यति भावनासंस्कारः । भावनासंस्कारः कुतो जायते इत्याह ॥ पट्वभ्यासेति = पट्वभ्यासादरप्रत्ययजः पटुप्रत्ययात् । अभ्यासप्रत्ययात् आदरप्रत्ययात् भावनासंस्कारो जायते । तत्र पटुप्रत्ययापेक्षात् पटुप्रत्ययस्यास्ति अपेक्षा यत्र तथाभूतादात्ममनसोः संयोगात् । आश्चर्येऽर्थेऽद्भुतेऽर्थे पटुसंस्कारातिशयो जायते यथा दाक्षिणात्यस्य दक्षिणस्यां भवो दाक्षिणात्यः

मू॰ भावनासंज्ञकस्त्वात्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति ज्ञानमददुःखादिविरोधी । पट्वभ्यासादरप्रत्ययजः । पटुप्रत्ययापेक्षादात्ममनसोः संयोगादाश्चर्येऽर्थे पटुसंस्कारातिशयो जायते । यथा दाक्षिणात्यस्योष्ट्रदर्शनात् । विद्याशिल्पव्यायामादिष्वभ्यस्यमानेषु तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारमपेक्षमाणात उत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः संयोगात् संस्कारातिशयो जायते ॥

तस्य उष्ट्रदर्शनात् उष्ट्रपशुदर्शनात् । उष्ट्रः दाक्षिणात्यस्यात्यन्ताननुभूताकारत्वादाश्चर्यभूतोऽर्थः, तद्दर्शनात् तस्य पटुसंस्कारो जायते कालान्तरेऽप्युष्ट्रानुभवस्मृतिदर्शनादिति ॥ अभ्यासप्रत्ययजं संस्कारं दर्शयति ॥ विद्येति = विद्याशास्त्रं शिल्पं पत्रभङ्गप्रभृति कर्म व्यायामः शरीरक्रीडा शस्त्रसञ्चालनं वा आदिर्येषु तथाभूतेषु अभ्यस्यमानेषु अभ्यासं प्राप्नुवत्सु " एकविषयेऽनेकक्रियोत्पादनमभ्यासः," तस्मिन्नेवार्थे पूर्वपठिते पूर्वशिक्षिते पूर्वकृते पूर्वपूर्वसंस्कारमपेक्षमाणात् बहुकाले व्यतिक्रान्ते स्फुटं स्मरति पूर्वकृत्यं समभ्यस्यमानपूर्वसंस्कारापेक्षात् उत्तरोत्तरस्मात् प्रत्ययादस्योत्तरमिदं भवति अस्योत्तरमिदं भवतीति प्रत्ययो यत्र तथाभूतात् आत्ममनसोः संयोगात् संस्कारातिशयः संस्कारस्यातिशयः यत्र तथाभूतः अभ्यासप्रत्ययः जायते ॥

आदरप्रत्ययजे संस्कारे प्रमाणमाह ॥ प्रयत्नेनेति = प्रयत्नेन प्रयत्नहेतुना मनश्चित्तं चक्षुषि स्थापयित्वा धारयित्वाऽपूर्वमर्थं नवमर्थं दिदृक्षमाणस्य द्रष्टुमिच्छतो यद्विद्युत्सम्पातदर्शनवत् तडित्पतनाऽवलोकनमिव अर्थदर्शनमादरप्रत्ययं तमादरप्रत्ययमपेक्षमाणात् अपेक्षमाणात् आत्ममनसोः संयोगात् संस्कारातिशयो जायते, चिरकालातिक्रमेऽपि तस्याऽनुच्छेदात् । यथा देवह्रदे राजतपद्मस्य सौवर्णपद्मस्य चावलोकनादादरो भवति । यथा प्रसिद्धं देवह्रदे चैत्रमासीयनिरजनक्षत्रसंयुक्तायां पौर्णमास्यामर्धरात्रे राजतसौवर्णपद्मानि दृश्यन्ते इति वार्तां निश्चित्य तस्यां तिथौ प्राप्तायां दिदृक्षया मिलितानां सन्निधीयमानेऽर्धरात्रे प्रयत्नबाहुल्याच्चक्षुषि मनः स्थापयित्वाऽवस्थितानां मुत्थितेषु पद्मेषु क्षणमात्राऽवलोकनादादरप्रत्यया संस्कारातिशयो जायते, यः कालान्तरेऽपि स्फुटतरस्मृतिहेतुर्भवतीति ॥ स्थितिस्थापकसंस्कारमाह ॥ स्थितिस्थापक इति = स्थितिस्थापकसंस्कारः घनाऽवयवसन्निवेशविशिष्टेषु घनानां निबिडानामवयवानामङ्गानां सन्निवेशाः स्थितयः तैर्विशिष्टेषु युक्तेषु, तथा कालान्तराऽवस्थायिषु कालान्तरे समयान्तरेऽवस्थायिषु

मू = [redacted] प्रयत्नेन मनश्चक्षुषि स्थापयित्वाऽपूर्वमर्थं दिदृक्षमाणस्य विद्युत्सम्पातदर्शनवदादरप्रत्य[redacted] तमपेक्षमाणादात्ममनसोः संयोगात् संस्कारातिशयो जायते । यथा देवह्रदे राजतसौवर्णपद्मदर्शनादिति ॥ स्थितिस्थापकस्तु स्पर्शवद्द्रव्येषु वर्तमानो घनाऽवयवसन्निवेशविशिष्टेषु कालान्तराऽवस्थायिषु स्वाश्रयमन्यथाकृतं यथाऽवस्थितं स्थापयति । स्थावरजङ्गमविकारेषु धनुःशाखाशृङ्गदन्तास्थिसूत्रवस्त्रादिषु भुग्नसंवर्तितेषु तेषु स्थितिस्थापकस्य कार्यं लक्ष्यते । नित्यानित्यत्वनिष्पत्तयोऽस्याऽपि गुरुत्ववत् ॥

तिष्ठतस्तु स्पर्शवद्द्रव्येषु स्पर्शवन्तः पृथिव्यप्तेजोवायवः तेषु द्रव्येषु वर्तमानो निवसन् अन्यथाकृतं नीचोच्चैर्भूतं स्वाश्रयं स्वाधिकरणं यथावस्थापयति पूर्वस्थितिवत्स्थिरीकरोतीति पूर्ववदृजुं करोतीति यावत् । यथा वा "अन्यथाकृतस्य पुनस्तावदवस्थापकत्वं स्थितिस्थापकत्वम्" भुग्नसंवर्तितेषु भुग्नास्तिर्यक्कृताः संवर्तिताः पूर्वाऽवस्थां प्रापिताः ते भुग्नसंवर्तितास्तेषु स्थावरजङ्गमविकारेषु स्थावरा वृक्षादयो जङ्गमा मनुष्यादयः तेषां विकारास्तेषु तथाभूतेषु धनुःशाखाशृङ्गदन्तास्थिसूत्रवस्त्रादिषु धनुरादीनामाकर्षणानन्तरं यः तेषां स्वाऽवस्थानाश्रयोऽवलोक्यते सः स्थितिस्थापकसंस्कारो निश्चेतव्यः इति । गुरुत्ववत् परमाणुषु स च नित्यः कार्येषु अनित्य इति बोध्यम् ॥

धर्मं निरूपयति = धर्म इति = धर्मः "धारणाद्धर्म इत्युच्यते" स च पुरुषगुणः पुरुषस्य जीवात्मनः गुणः, न तु परमात्मनः। कर्तुः धर्मविधायकस्य पुरुषस्य प्रियहितमोक्षहेतुः - प्रियस्याऽभीष्टस्य सुखस्य हितस्य सुखसाधनस्य मोक्षस्यापवर्गस्य अपरप्राकृतजन्माभावस्येति यावत् हेतुः कारणम्। स धर्म इति धर्मादेव सुखादयो भवन्ति न च सुखादिभ्यो धर्म इतिविवेकः। यथा च सूत्रम् "आत्मान्तरगुणानामात्मान्तरेऽकारणत्वात्" वै० द० ६।१।५। अतीन्द्रियः स धर्मः न केनचिदपि बहिरिन्द्रियेण ग्राह्यः। अन्त्यसुखसंविज्ञानविरोधी धर्मः कार्यत्वात् क्षिणश्वर एव। यदा धर्मफलमन्तिमं भुज्यते, तदा चरमसुखसंविज्ञानादूर्ध्वं अयमपि विनश्यतीति सिद्धम्। स च धर्मः पुरुषान्तःकरणसंयोगविशुद्ध्याभिसन्धिजः, पुरुषस्य जीवस्यान्तःकरणे मनसि संयोगो व्यतिषङ्ग तथाभूतो विशुद्धो छलकपटशून्यः योऽभिसन्धिः संकल्पविशेषः तस्माज्जायते धर्म इति सुखादिवदयमपि जीवात्मविशेषगुणः। वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः - स च धर्मः वर्णा ब्राह्मणक्षत्रियविट्शूद्राः आश्रमिणो ब्रह्मचारिगृहस्थवानप्रस्थसंन्यासिनः तेषां वर्णाश्रमिणाम् अयं धर्मः इति प्रतिवर्णं वा प्रत्याश्रमं वा नियतानि लग्नानि विहितानीति यावत् यानि साधनानि हेतवः तेषां निमित्ते कारणमिति। यथा च सूत्रम् "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" वै० द० १।१।२ "चोदनालक्षणोऽर्थो धर्मः" मी० द० १।१।२

मू = धर्मः पुरुषगुणः। कर्तुः प्रियहितमोक्षहेतुः अतीन्द्रियोऽन्त्यसुखसंविज्ञानविरोधी पुरुषान्तःकरणसंयोगविशुद्ध्याऽभिसन्धिजः, वर्णाश्रमिणां प्रतिनियतसाधननिमित्तः। तस्य तु साधनानि श्रुतिस्मृतिविहितानि वर्णाश्रमिणां सामान्यविशेषभावेनाऽवस्थितानि द्रव्यगुणकर्माणि ॥

अतीन्द्रियस्य धर्मस्य साधनानि कुत इत्याह ॥ तस्येति = श्रुतिस्मृतिविहितानि श्रुतिविहितानि वेदप्रतिपादितानि, स्मृतिविहितानि मन्वादिधर्मशास्त्रकथितानि वर्णाश्रमिणां सामान्यविशेषभावेन ब्राह्मणादिवर्णानामयं सामान्यधर्मः अयं विशेषधर्मः। आश्रमिणां ब्रह्मचार्यादीनामयं सामान्यधर्मोऽयं विशेषधर्मश्चेति भावेन वस्तुतयाऽवस्थितानि स्थितिं प्राप्तानि द्रव्यगुणकर्माणि। विवेकख्यात्या एतत्परिज्ञानम् इमानि द्रव्याणि इमे गुणाः इमानि कर्माणि। एषां मिथः इदं साधर्म्यमिदमेषां वैधर्म्यम्। इमानि परिज्ञानविशिष्टानि तस्य धर्मस्य साधनानि सन्तीति ॥ श्रीः श्रीः श्रीः

तत्र कानि सामान्यसाधनानि इत्याह ॥ तत्रेति-तत्र तयोः सामान्यविशेषधर्मद्वयमध्ये सामान्यानि धर्मस्य सामान्यसाधनान्युच्यन्ते। यथा धर्मे श्रद्धाऽभिरुचिः, तत्करणेऽनुकूलव्यापारो मनःप्रसत्तिर्वा। अहिंसा-कायिकवाचिकमानसिकरीत्या प्राणिवधपरित्यागः यथा "पशून् पाहि„ यजुः १।१मं„ "गां मा हिंसीः„ यजुः-१३।४३ "अविं मा हिंसीः„ यजुः-१३।४४ "नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यः तस्मान्मांसं विवर्जयेत्„ मनुः-५।४८ सत्यवचनं यथार्थसम्भाषणम् अस्तेयं परधनापहरणे वैमनस्यम्। ब्रह्मचर्यं वीर्यरक्षणं स्त्रीसेवापरित्यागो वा उपस्थेन्द्रियसंयम इतिभावः। अनुपधा भावशुद्धिः भावः इच्छा, रागः प्रमादोऽश्रद्धा मदमानाऽसूयादय उपधासंज्ञका भावदोषास्तैः रहिताऽनुपधा। श्रद्धा मनःप्रसादः शास्त्रोद्दिष्टकर्मानुष्ठानाऽध्यवसायवतीति। यथा च सूत्रम् "चानुराश्रम्यमुपधा अनुपधाश्च„ वै·द·६।२।३ क्रोधवर्जनं कोपराहित्यम् अभिषेचनं प्रत्यहं स्नानम्। शुचिद्रव्यसेवनम् सात्त्विकभोजनभक्षणम्। शुचि शुद्धमभ्यवहारादिक्रियायै स्वीकर्तुं योग्यं द्रव्ये

मू· तत्र सामान्यानि धर्मे श्रद्धा अहिंसा भूतहितत्वं सत्यवचनमस्तेयं ब्रह्मचर्यमनुपधा क्रोधवर्जनमभिषेचनं शुचिद्रव्यसेवनं विशिष्टदेवताभक्तिः उपवासोऽप्रमादश्च ब्राह्मणक्षत्रियवैश्यानामिज्याऽध्ययनदानानि ॥

तस्य सेवनं स्वीकार इतियावत्। विशिष्टदेवताभक्तिः विशिष्टा सर्वोत्कृष्टा या देवता तस्याः भक्तिः उपासना परमात्मोपासनाऽइत्यर्थः। उपवासः एकादश्यादिव्रतेषु भोजनराहित्यम्। यदा कस्यचिन्नियमोऽस्ति। नाहमग्निहोत्रमन्तरेण भोक्ष्यामीति। अग्निहोत्रकालातिक्रान्ते तदुपवास एव धर्मसाधनम्। अप्रमादः नित्यनैमित्तिककर्मसु प्रमादपरित्यागः "अहरहः संध्यामुपासीत„ इति नित्यकर्म। "स्वर्गकामो यजेत„ इतिनैमित्तिकं कर्म। इमानि सर्वेषां सामान्यानि धर्मसाधनानि। ब्राह्मणक्षत्रियवैश्यानां तु इज्याऽग्निहोत्रकर्म, अध्ययनं वेदशास्त्रादिपठनम्। दानं पुनरन्यग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। इमानि त्रयाणां वर्णानां सामान्यधर्मसाधनानि। यथा च सूत्रम् "अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमंत्रकालनियमाश्चादृष्टाय„ वै·द·६।२।२॥

श्रीः श्रीः श्रीः

तत्र वर्णानां कानि विशेषधर्मसाधनानीत्याह ॥ ब्राह्मणस्येति = ब्राह्मणस्य ब्राह्मणमात्रस्य प्रतिग्रहः यथाविधि वेदविहितद्रव्यग्रहणम् याजनम् आर्त्विज्यम् अध्यापनम् वेदादिपाठनम् इमानि तथा स्ववर्णविहिताः स्ववर्णेन ब्राह्मणवर्णेन विहिताः कृताः संस्काराः यज्ञोपवीतिसंस्काराः; इमानि ब्राह्मणस्य विशिष्टानि धर्मविशेषसाधनानि। क्षत्रियस्य वर्णस्य सम्यक् यथारीति प्रजापालनं प्रजासंरक्षणम् असाधुनिग्रहः दुष्टपरिपीडनम् युद्धेषु अनिवर्तनम् अनिवृत्तिः स्वकीयाः आत्मवर्णानुकूलाः संस्काराः चौड़कर्मादिसंस्काराः। वैश्यस्य वैश्यवर्णस्य क्रयविक्रयपशुपालनानि क्रयः मूल्यं दत्वा परस्माद् द्रव्यग्रहणम्। विक्रयः मूल्यं गृहीत्वा परस्य स्वद्रव्यदानम् कृषिः हलाकर्षितायां महाम् बीजस्य वपनं रोपणं वा, इमानि विशेषधर्मसाधनानि तथा च स्वकीयाः स्ववर्णानुकूलाः संस्काराः। शूद्रस्य शूद्रवर्णस्य विशिष्टानि धर्मसाधनानि पूर्ववर्णपारतन्त्र्यम् ब्राह्मणक्षत्रियवैश्याधीनत्वम् क्रियाः सर्वे व्रतबन्धनादिसंस्काराः अमन्त्रिकाः वेदमन्त्रोच्चारणरहिताः अपितु पौराणिकश्लोकोच्चारणपूर्वकाः स्युः। यथाह मनुः वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। का

मू= ब्राह्मणस्य विशिष्टानि प्रतिग्रहाऽध्यापनयाजनानि स्ववर्णविहिताश्च संस्काराः।
क्षत्रियस्य सम्यक्प्रजापालनमसाधुनिग्रहः युद्धेष्वनिवर्तनं स्वकीयाश्च संस्काराः।
वैश्यस्य क्रयविक्रयकृषिपशुपालनानि स्वकीयाश्च संस्काराः। शूद्रस्य पूर्ववर्णपारतन्त्र्यममन्त्रिकाश्च क्रियाः। आश्रमिणां तु ब्रह्मचारिणो गुरुकुलनिवासिनो स्वशास्त्रविहितानि गुरुशुश्रूषाग्नीन्धनभैक्ष्याचरणानि मधुमांसदिवास्वप्नाञ्जन

र्यः शारीरसंस्कारः पावनः प्रेत्य चेह च „ अ. २ श्लो. २६ आश्रमिणां विशेषधर्मानाह ॥ आश्रमिणामिति = आश्रमिणां धर्मसाधनान्युच्यन्ते तेषां मध्ये ब्रह्मचारिणो धर्मस्य विशेषसाधनानीमानि। उपनीय शिष्यं यः सरहस्यं वेदमध्यापयति स गुरुः। यथाह मनुः "निषेकादीनि कर्माणि यः करोति यथाविधि। संभावयति चान्नेन स विप्रो गुरुरुच्यते „ तस्य गुरोः कुले गृहे वसनशीलस्य ब्रह्मचारिणः स्वशास्त्रविहितानि ब्रह्मचारिणमधिकृत्य शास्त्रेण प्रतिपादितानि। यथाह मनुः ब्रह्मचर्यधर्मेण " वर्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः। यानि सर्वाणि प्राणिनां चैव हिंसनम्। अभ्यङ्गमञ्जनेचाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधं च लोभञ्च नर्तनं गीतवादनम् द्यूतञ्च जनवादञ्च परिवादं तथाऽनृतम्। स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च। एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्वचित्। कामाद्धि स्कन्दयन् रेतो हिनस्ति व्रतमात्मनः „ अध्या. २ गुरुशुश्रूषा गुरुसेवाऽन्तेराचरणं प्रत्यहं मन्त्रैर्होमविधानम् इन्धनस्य काष्ठस्य आचरणं इन्धनार्थमरण्यात्काष्ठानयनम्। भैक्ष्याचरणं प्रत्यहं गुरुवृत्तिस्वोदरपूर्त्यै नगरात् भिक्षाटनम् इमानि सर्वाणि विशेषसाधनानि। मधुमद्यं मांसं दिवास्वप्नं दिवसे निद्राकरणम्। अञ्जनं नेत्रयोः धारणम् अभ्यञ्जनं निमित्तमन्तरेण उपस्थेन्द्रियादिस्पर्शः आदिपदात् गन्धमाल्यादीनां ग्रहणम् एषां सर्वेषां वर्जनं परित्याग एव ब्रह्मचारिणां धर्मः। यथा ना सूत्रम् " ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः „ यो. द.
२।३८।

गृहस्थधर्मानाह ॥ विद्येति = यो विद्याऽध्ययनार्थं गृहीते व्रते अधीते वेदे विसर्जितवान् स विद्याव्रतस्नातकः तस्य विद्याव्रतस्नातकस्य कृतदारस्य कृता दाराः येन तथाभूतस्य कृतदारस्य स्वीकृतभार्यस्य गृहस्थस्य गृहे तिष्ठतीति गृहस्थस्तस्य गृहस्थस्य पुरुषस्य द्वितीयाश्रमस्थस्येतिभावः। शालीनयायावरवृत्त्युपार्जितैः शालामर्हतीति शालीनो "प्रेष्यवान् स्याद् गृहग्रामधनधान्ययुक्तो लोकाऽनुवर्ती शालीनो वा, यद्वा यावता धान्येन कुशूलपात्रं कुम्भीपात्रं वा परिपूर्यते त्र्यहमेकाहं वा वर्तनं भवति तावन्मात्रस्य परेण स्वयमानीयमानस्य श्रद्धया दीयमानस्य यः परिग्रहः सा शालीना वृत्तिः। अतिशयेन याति देशान्तरमिति यायावरः, याजनाऽध्यापनप्रतिग्रहविषयसञ्चयवर्जको यायावरो वा, परस्मादप्रतिग्रहगतश्च क्रममादाय यत्प्रत्यहं उञ्छं भिक्षाटनं वा सा यायावरवृत्तिः। तयोः वृत्तिः आजीविका ताभ्यामुपार्जितैः लब्धैः अर्थैः धनैः। भूतमनुष्य देवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां। भूतयज्ञः भूतेभ्यो बलिदानम्, मनुष्ययज्ञः अतिथिपूजनम्। देवयज्ञो होमः, पितृयज्ञः श्राद्धं तर्पणञ्च। ब्रह्मयज्ञो वेदपाठस्तेषां महायज्ञानां सायं सूर्योस्तमनवेलायां प्रातः सूर्योदयकालेऽनुष्ठानं यथारीति धर्मकरणम्

मू॰ = विद्याव्रतस्नातकस्य कृतदारस्य गृहस्थस्य शालीनयायावरवृत्त्युपार्जितैरर्थैर्भूतमनुष्यदेवपितृब्रह्माख्यानां पञ्चानां महायज्ञानां सायम्प्रातरनुष्ठानम्। एकाग्निविधानेन पाकयज्ञसंस्थानाञ्च नित्यानां शक्तौ विद्यमानायामग्न्याधेयादीनां च हविर्यज्ञसंस्थानामग्निष्टोमादीनां सोमयज्ञसंस्थानाञ्च। ऋत्वन्तरेषु ब्रह्मचर्यमपत्योत्पादनञ्च ॥

एकाग्निविधानेन एकाग्निः औपासनिकः, यस्य विधानं विवाहकाले स्वीक्रियते तेन एकाग्निविधानेन। पाकयज्ञसंस्थानाम् अष्टकापर्वणीश्राद्धाश्वयुज्यादयः पाकयज्ञेन व्यवह्रियन्ते तेषां पाकयज्ञविशेषाणाम्। नित्यानां नित्यविधेयानां शक्तौ सामर्थ्ये विद्यमानायां वर्तमानायाम् अग्न्याधेयादीनाम् अग्न्याधानादीनाञ्च अनुष्ठानं यथारीतिकरणम्। हविर्यज्ञसंस्थानां दर्शपौर्णमासचातुर्मास्याग्रयणादिका इष्टयः हविर्यज्ञविशेषाः सन्ति, तेषामग्निष्टोमादीनाम् सोमयज्ञादिसंस्थानां च अनुष्ठानम्। अग्निष्टोमो वथ्यषोडशी वाजपेयातिरात्राप्तोर्यामाः सप्त इमे सोमयज्ञेनोच्यन्ते।
ऋत्वन्तरेषु ऋतुकालादन्यसमयेषु ब्रह्मचर्यसेवनम्। वीर्यस्तम्भनम् + व्रतरूपेण स्त्रीसेवनपरिवर्जनं धर्मसाधनम्। अपत्योत्पादनम् पुत्रोत्पत्तिकरणं पुत्रोत्पत्त्यनुष्ठानम् धर्मसाधनम्। "पुत्रेण लोकान् जयतीति श्रुतेः" ॥

श्रीः

श्रीः　　श्रीः　　श्रीः

वनस्थस्य धर्मसाधनं कथयति ॥ ब्रह्मेति= ब्रह्मचारिणः यथाविधि ब्रह्मचर्यपरिपालकस्य गृहस्थस्य गृहधर्मेव तो वा ग्रामान्निर्गतस्य वली पलित दर्शनमात्रत्यक्तग्रामस्य वनवासोऽरण्यवसनम्। वल्कलस्य वृक्षत्वचः अजिनस्य मृगचर्मणः, केशानां शिरोरुहाणां श्मश्रोः मुखबालानां नखानां रोमाणां कक्षोपस्थगतानां बालानां धारणं रक्षणमकर्तनमिति यावत्। वनस्थस्य पुरुषस्य नापितीयं सर्वमपि कर्म हेयमेवेतिभावः। वानप्रस्थस्य वने प्रतिष्ठतीति वनप्रस्थः वनप्रस्थ एव वानप्रस्थः तस्य वानप्रस्थस्य तृतीयाश्रमनिवासिनो मानवस्य वन्यमोजनं वनेभवं वन्यं फलमूलादिकं तस्य भोजनम्। हुतशेषभोजने, विनाग्निहोत्रकर्म विधेयं न कदाप्यशनमेव। अतिथिशेषभोजनम् अतिथिभोजनात्पश्चात् यदवशिष्टं शुद्धं भोजनं तदेव भोक्तव्यं नातिथेः प्राक्। इत्यत्र इयान् विशेषः, यः प्राजापत्यामिष्टिं निरूप्य पुत्रे भार्यादिकं न्यस्य वने समागच्छेत् तस्य हुताकर्म अवश्यंभावि। यस्तु साग्निभार्यो वनमागतस्तदर्थे हुतशेषादिकं कर्म आवश्यकम्। यथाच "ब्रह्मचर्याश्रमं समाप्य गृही भवेद् गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेत्,, शत. ब्रा. कां. १४ यथाह मनुः "गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः। अपत्यस्यैव चाऽपत्यं तदारण्यं समाश्रयेत् १ "संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम्। पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा। २ यद्भक्ष्यं स्यात्ततो दद्यात् बलिं भिक्षां च शक्तितः। आमूलफलभिक्षाभिरर्चयेदाश्रमाऽऽगतान् ३ अध्या. ६ श्लो. २।३।६

मू= ब्रह्मचारिणो गृहस्थस्य वा ग्रामान्निर्गतस्य वनवासो वल्कलाजिनकेशश्मश्रुनखरोमधारणञ्च। वन्याहुतातिथिशेषभोजनानि वानप्रस्थस्य। त्रयाणामन्यतमस्य श्रद्धावतः सर्वभूतेभ्यो नित्यमभयं दत्वा संन्यस्य स्वानि कर्माणि यमनियमेष्वप्रमत्तस्य षट्पदार्थप्रसंख्यानाद्योगप्रसाधनं प्रव्रजितस्येति ॥ दृष्टं प्रयोजनमनुद्दिश्यैतानि साधनानि भावप्रसादं चाऽपेक्ष्य आत्ममनसोः संयोगाद् धर्मोत्पत्तिरिति ॥

यतिधर्मं मा चष्टे ॥ त्रयाणामिति= त्रयाणां ब्रह्मचारिगृहस्थवानप्रस्थानां मध्येऽन्यतमस्यैकस्य श्रद्धावतो मनःप्रसादयुक्तस्य सर्वभूतेभ्यो विश्वप्राणिभ्योऽभयं दत्वा न कदाप्यहं प्राणिनो हनिष्यामीति प्रतिज्ञाय स्वानि कर्माणि स्वकाम्यकर्माणि संन्यस्य सम्यक्प्रकारेण विहाय यमनियमेषु यमाः अहिंसासत्यादयो यथाह पतञ्जलिः "अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहाः यमाः,, यो. २ पा. ३० सू. नियमाः शौचसंतोषादयो यथा "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः,, यो. द. २।३२ तेषु यमनियमेषु अप्रमत्तस्य प्रमादरहितस्य दत्तचित्ताऽवधानेति वा, षट्पदार्थप्रसंख्यानात् षट्पदार्थाः द्रव्यगुणकर्मसामान्यविशेषसमवायास्तेषां प्रसंख्यानात् तत्त्वज्ञानात् योगप्रसाधने योगस्यात्मत्व्यात्युत्पादकस्य "योगश्चित्तवृत्तिनिरोधः,, यो. द. १।२ इत्यात्मकस्य समाधिविशेषस्य प्रसाधनं सिद्धकरणं प्रव्रजितस्य संन्यासिनो धर्मसाधनमिति। यथाच सूत्रम् "धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्,, वै. द. १।१।४। यथोक्तं ब्राह्मणग्रन्थेषु "यदहरेव विरजेत्तदहरेव प्रव्रजेद्वनाद्वा गृहाद्वा ब्रह्मचर्यादेव प्रव्रजेत्,, यथा वाह यजुर्वेदे "प्राजापत्यां निरूप्येष्टिं तस्यां सर्ववेदसं हुत्वा ब्राह्मणः प्रव्रजेत्,, कथं धर्मं साधयन्त्येतानि ॥ दृष्टमिति= दृष्टमैहिकं प्रयोजनं पुत्रोत्पत्तिलाभादिप्रयोगमनुद्दिश्य अलक्ष्यीकृत्य एतानि पूर्वप्रकरणे कथितानि कृतानि च साधनानि अपेक्ष्य दृष्ट्वा अथ च भावप्रसादं चित्तप्रसन्नतां प्रयोजनं शुद्धमिति वाऽपेक्ष्य निर्वर्ण्य आत्ममनसोः संयोगात् धर्मस्योत्पत्तिर्भवति यथा च सूत्रम् "दृष्टाऽदृष्टप्रयोजनानां दृष्टाऽभावे प्रयोजनमभ्युदयाय,, वै. द. ६।२।१ यथा वा "तत्र ध्यानजमनाशयम्,, यो. द. ४ पा. ६ सू.।

प्रश· भा
पृ॰ ५५
भाष्य प॰

अधर्मो व्याख्यायते ॥ अधर्म इति = अधर्मः जीवात्मनो गुणः न तु परमात्मनः। कर्तुः अधर्मं विधाय कमत्र्येऽस्याहितं दुःखसाधने प्रत्यवायो दुःखं च तयोः अधर्मो हेतुः कारणम्। अन्तिमदुःखकर्मफलजन्यदुःखसंज्ञानादेव अधर्मो नश्यति। तस्याधर्मस्य साधनानि इमानि सन्ति, शास्त्रे प्रतिषिद्धानि निन्दितानि धर्मसाधनविपरीतानि धर्मसाधनप्रतिकूलानि हिंसा-प्राणिवधः, अनृत्यमसत्यभाषणम् स्तेयं चौर्यमित्यादीनि मूलोक्तानि तथा विहिताऽकरणं विहितस्य संध्यादेरकरणं, कर्तव्यकर्मभ्यः प्रमादः प्रतरणम्। यथा-च सूत्रम् "दुष्टं हिंसायाम्" वै·द·६।१।७। "तस्य समभिव्याहारतो दोषः" वै·द·६।१।८ अधर्मं कथमुत्पादयन्तीत्याह ॥ एतानीति = एतानि पूर्वोक्ताऽधर्मसाधनानि दुष्टाभिसन्धिं कामनापूर्वकहिंसाऽनृतादयनुष्ठानं च अपेक्ष्य लक्ष्यीकृत्यात्ममनःसंयोगात् अधर्मस्योत्पत्तिः। तदुक्ताऽधर्मयोः किं फलमित्याह ॥ अविदुष इति = कर्तृत्वभोक्तृत्वात्मस्वाभाविकगुणः इन्द्रियाणि स्वस्वविषयग्राहकाणि अत्रैव इन्द्रियरसाऽनुभवः सुखमिति यो निश्चिनोति न चापवर्गमभिलषति सोऽविद्वान् तस्याविदुषः मूढस्य रागद्वेषवतः यः सुखसाधनविषये रज्यते तदभाववति च द्वेष्टि तद्वतो रागद्वेषवतो मर्त्यस्य प्रकृष्टाद्बलवतो धर्मादहं देवः स्यामिन्द्रो वा स्यां गन्धर्वो वा स्यामिति प्रवर्तकात्

मू = अधर्मोऽप्यात्मगुणः। कर्तुरहितप्रत्यवायहेतुरतीन्द्रियोऽन्त्यदुःखसंविज्ञानविरोधी। तस्य तु साधनानि शास्त्रे प्रतिषिद्धानि धर्मसाधनविपरीतानि हिंसाऽनृतस्तेयादीनि विहिताऽकरणं प्रमादश्च। एतानि दुष्टाऽभिसंधिं चाऽपेक्ष्यात्ममनसोः संयोगादधर्मस्योत्पत्तिः। अविदुषो रागद्वेषवतः प्रवर्तकाद्धर्मात् प्रकृष्टात् स्वल्पाऽधर्मसहितात् ब्रह्मेन्द्रप्रजापतिपितृमनुष्यलोकेष्वाशयाऽनुरूपैरिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति। तथा प्रकृष्टादधर्मात् स्वल्पधर्मसहितात् प्रेततिर्यग्योनिस्थानेष्वनिष्टशरीरेन्द्रियविषयसुखादिभिर्योगो भवति। एवं प्रवृत्तिलक्षणाद्धर्मादधर्मसहिताद्देवमनुष्यतिर्यङ्नारकेषु पुनःपुनः

स्वल्पाऽधर्मसहितात् स्वल्पेन हिंसात्मकेन सकामकर्मात्मकेन अधर्मेण सहितात् आशयाऽनुरूपैः याऽऽशा धर्मसम्पादनकालेऽकारि तदनुरूपैस्तद्योग्यैरिष्टशरीरविषयसुखादिभिरिष्टं शरीरम् इष्टो विषयः इष्टं सुखादिकं तैर्ब्रह्मलोके इन्द्रलोके वा प्रजापतिलोके वा पितृलोके वा मनुष्यलोके वा योगो जन्म भवति यथा-च सूत्रम् "तत्संयोगो विभागः" वै·द·६।२।१६। अधर्मात् किं जन्मेति वदति ॥ तथा तेनैव प्रकारेण स्वल्पधर्मसहितात् स्वल्पो धर्मः स्वल्पधर्मः तेन सहितः स्वल्पधर्मसहितः तस्मात् स्वल्पधर्मसहितात् प्रकृष्टात् तीव्रात् अधर्मात् अनिष्टं शरीरम् अनिष्टानि इन्द्रियाणि अनिष्टः विषयः अनिष्टं सुखादिकं तैः प्रेतलोके तिर्यग्योनिषु पशुपक्षिसरीसृपयोनिषु वा मनुष्यस्य जन्म भवति। तिर्यगादियोनिषु यत्सुखं प्रतीयते तद्धर्मसम्बन्धत इति ॥ समूहप्रसमाह ॥ एवमिति = एवंप्रकारेण प्रवृत्तिलक्षणात् सकामस्वरूपवतोऽधर्मसहितात् अधर्मसम्मिलितात् धर्मो देव देवयोनिषु मनुष्ययोनिषु तिर्यग्योनिषु नारकीयोनिषु पुनः पुनर्जन्ममरणं वा भवति यतो ब्रह्मलोकादयः सर्वे विनश्वराः इति शास्त्रेषु प्रतिपादितम् "आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन।" इति श्रीकृष्णवाक्यात् तथा बृहस्पत्यादयो देवाः उच्चपदाऽभिलाषिणः सन्तीति ॥ श्रीः श्रीः

अपवर्गं प्रतिपादयति ॥ ज्ञानेति = ज्ञानपूर्वकात् कर्मणः, बाह्येन्द्रियकाः सर्वे विषयाः दुःखदाः, आध्यात्मिकविषयवत्योर्विचारणः श्रेयसो दृष्टाऽनु
श्रविकविषयसुखेषु वैतृष्ण्ययुक्तः फलाकांक्षामन्तरेण यः वैदिकं कर्म करोति तत् ज्ञानपूर्वकं कर्म तस्मात् ज्ञानपूर्वकात् कृतात् कर्मणः, असंक
ल्पितफलात् न संकल्पितं भाविपुत्रादिनिश्रयवत्फलं यत्र तथाभूतात् विशुद्धे कुलीने कुले वंशे जातस्योत्पन्नस्य दुःखविगमोपायजिज्ञासोः - दुःखाऽ
पघातके हेतौ ज्ञातुमिच्छा यस्य तथाभूतस्य मनुष्यस्य आचार्यं वेदशास्त्रोपदेष्टारं कथं मे दुःखहानिः स्यादिति निश्चित्य आचार्यं संगम्य
समित्पाणिः तत्पार्श्वे गत्वा उत्पन्नषट्पदार्थतत्त्वज्ञानस्य - तदुपदेशात् उत्पन्नम् आविर्भूतं षट्पदार्थानां द्रव्यगुणादीनां षण्णां पदार्थानां तत्त्व
ज्ञानं यथार्थज्ञानं यस्य तथाभूतस्य तेस्याज्ञाननिवृत्तौ सत्याम् अज्ञानस्य सवासनविपर्ययज्ञानस्य निवृत्तौ सत्यां दूरीभूते सति विरक्तस्य राग
द्वेषवर्द्धिः संस्कारैर्विरक्तस्य पुरुषस्य रागद्वेषाद्यभावात् "रागः सुखपूर्विका प्रीतिः" यथा "सुखानुशायी रागः" यो· २।७। द्वेषः दुःख
पूर्वकपरापकृतिस्मरणम् यथा च सूत्रम् "दुःखाऽनुशयी द्वेषः" यो· द· २।८। आदिपदात् मोहादीनां ग्रहणम् तेषामभावात् विरहयोगात् तज्जया
तेभ्यो रागद्वेषादिभ्यो जातयोर्धर्माधर्मयोः यदा न सुखं न च दुःखं तदा न धर्मस्योत्पत्तिः नाऽधर्मस्येति सत्यामनुत्पत्तौ निस्तुषतण्डुलवत्प्ररोहणे

मू॰= ज्ञानपूर्वकात्तु कर्मणः कृतादसंकल्पितफलाद्विशुद्धे कुले जातस्य दुःखविगमोपायजिज्ञासो
राचार्यमुपसंगम्योत्पन्नषट्पदार्थतत्त्वज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाद्य
भावात् तज्जयोर्धर्माधर्मयोरनुत्पत्तौ पूर्वसंचितयोश्चोपभोगात् निरोधे सन्तोष
सुखं शरीरपरिच्छेदं चोत्पाद्य रागादिनिवृत्तौ निवृत्तिलक्षणः केवलो धर्मः परमा-
र्थदर्शनजं सुखं कृत्वा निवर्तते ॥

शक्तयोः पूर्वसंचितयोः उपभोगार्थं पूर्वसम्पादितयोः तयोः धर्माधर्मयोः उपभोगात् फलाऽभ्यवहारात् निरोधे ~~निरुद्ध~~ प्रतिबन्धे सति निवृत्तिलक्षणः
निवर्त्यते संसारोऽनया इति निवृत्तिः, निवृत्तिः लक्षणं स्वभावो यस्येति निवृत्तिलक्षणः शान्तिस्वभावः केवलमेको धर्म एव सन्तोषसुखं सन्तोषः
सन्निहितसाधनात् अधिकस्य अनुपादित्सा स सन्तोषरूपं सुखमुत्पाद्य प्रत्यक्षीकृत्य, यथाह मनुः "सन्तोषं परमास्थाय सुखार्थी संयतो
भवेत्। सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः" अ· ४ श्लो· १२ यद्वा "सन्तोषादनुत्तमसुखलाभः" यो· द· २।४२। शरीरपरिच्छेदं शरी
रविभागं चरमकर्मफलभोगायेत्यर्थः। उत्पाद्य प्रादुर्भाव्य रागादिनिवृत्तौ भूतायां परमार्थदर्शनजं परमोऽन्तिमोऽर्थो विषयः पर
मार्थः, आत्मा तस्य दर्शने तस्माज्जातं परमार्थदर्शनजम् आत्मदर्शनजं सुखं मोक्षलक्षणं कृत्वा विधाय निवर्तते दूरीभवति। यथा च
सूत्रम् "सति मूले तद्विपाको जात्यायुर्भोगाः" यो· द· २पा· १३सू· यथा चापरे सूत्रम् "न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य"
न्या· द· ४।१।६४ यथा चापरं सूत्रकार आह "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" वे· द· ४।४।२२ यथा चोपनिषदि "न च पुनरावर्तते
न च पुनरावर्तते" छान्दो· प्र· ८ खं· १५ यथा भगवद्गीतायाम् "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" अ· श्लो· यथा च सूत्रम् "आत्मकर्मसु मोक्षो
व्याख्यातः" वै· द· ६।२।१६ "तदनारम्भ आत्मस्थे मनसि शरीरस्य दुःखाभावः" वै· द· ५।२।१६ ॥

अपवर्गं लक्षयति ॥ तदेति = यदाऽऽत्मदर्शनं कृत्वा निवृत्ते धर्माऽधर्मद्वये तदा तस्मिन् समये निरोधात् सकामकर्मप्रतिबन्धात् निर्बीजस्य धर्माऽधर्मबीजविवर्जितस्य आत्मनः जीवस्य शरीरादिनिवृत्तिः प्राकृतशरीरेन्द्रियाद्युपरमो भवति। पुनः शरीराद्यनुत्पत्तौ कर्मशान्तेः शरीरादेः शान्तौ सत्यां दग्धेन्धनानलवत् यथा भस्मीभूतकाष्ठवतोऽग्नेरुपशमः स्वयमेव तथा निष्कर्मणः जीवस्याप्यनुत्पत्तिरस्मिन् संसारे स एव मोक्ष इत्युमते यथा च सूत्रम् "तदभावे संयोगाऽभावोऽप्रादुर्भावश्च मोक्षः" वै· द· ५।२।१८। अपरञ्च "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः" न्या· द· १।१।२ "तदत्यन्तविमोक्षोऽपवर्गः" न्या· द· १।१।२२ यथा चापरं सूत्रम् "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" सां· द· अ· १ सू· १ यथा दर्शनान्तरे "पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" यो· द· ४· पा· ३४ सू· यथा साऽन्यत्र "संपद्याविर्भावः स्वेन शब्दात्" वे· द· ४।४।१ "भोगमात्रसाम्यलिङ्गाच्च" वे· द· ४।४।२१ यथा च वेदसंहितायाम् "वेदाऽहं सूत्रं विततं यस्मिन्नोताः प्रजा

मू = तदा निरोधात् निर्बीजस्यात्मनः शरीरादिनिवृत्तिः पुनः शरीराद्यनुत्पत्तौ दग्धेन्धनानलवदुपशमो मोक्ष इति ॥

इमाः। सूत्रं सूत्रस्याऽहं वेदाथो यद् ब्राह्मणं महत्" अथर्ववेद· १०।४।१८ अधुना केचित् मुक्तिभेदाः सर्वसाधारणज्ञानार्थं निर्दिश्यन्ते ॥ मृत्युरेव मोक्षः इति चार्वाकाः १ आत्मोच्छेदो मोक्ष इति शून्यवादिनो माध्यमिकाः २ अपराधीनता मोक्षः इति चार्वाकैकदेशिनः ३ विषयानन्दो मुक्तिरिति विषयिणः कामोपासकाः ४ धर्मिनिवृत्तौ निर्मलज्ञानोदयो मोक्ष इति विज्ञानवादिनो योगाचारप्रमुखाः सर्वे बौद्धाः ५ आवरणमोक्षो मोक्षः इति अनेकान्तवादिनो जैनाः ६ ब्रह्माऽऽभासजीवस्य अविद्योत्थभ्रान्तिकज्ञाननिवृत्तौ सच्चिदानन्दब्रह्मस्वरूपाधिगमो मोक्ष इति मायावादिनः शङ्कराचार्यमताऽनुयायिनः ७ जगत्कर्तृत्वं विहाय सर्वज्ञत्वादिसर्वकल्याणगुणानामाप्तिपूर्वकवासुदेवभगवद्याथात्म्यानुभवो मोक्ष इति विशिष्टाद्वैतवादिनो रामाऽनुजीयाः ८ जगत्कर्तृत्वलक्ष्मीपतित्वश्रीवत्सवर्जं भगवज्ज्ञानाद्यनन्तनिर्दुःखपूर्णसुखं मोक्ष इति द्वैतवादिनो माध्वाः ९ द्विभुजश्रीकृष्णेन सह (स्वांशिना ब्रह्मणा सार्द्धं) स्वांशभूतानां जीवानां सर्वकामाशनपूर्वकं गोलोके लीलाऽनुभवो मोक्ष इति शुद्धाद्वैतवादिनः श्रीवल्लभमताऽनुयायिनः १० स्वर्गादिमोक्ष इति मीमांसकाः ११ दुःखसाधनशरीरनाशे नित्यनिरतिशयसुखाऽभिव्यक्तिः मोक्ष इति तदेकदेशिनो भट्टसर्वज्ञादयः १२ सारूप्यसालोक्यसामीप्यसायुज्यभेदाच्चतुर्विधो मोक्ष इति सगुण

पासकाः **पौराणिकाः १२** परापश्यन्तीमध्यमावैखरीति वाणी चतुष्टये प्रथमायाः पराख्याया ब्रह्मरूपायाः वाण्याः दर्शने
मोक्ष इति **पाणिनीयाः शाब्दिकाः** १३ निर्लेपस्य पुरुषस्य कैवल्येनाऽवस्थाने मुक्तिरिति **पातञ्जलाः** १४ आत्मतत्त्वज्ञानेन दुः
खस्यात्यन्तनिवृत्त्या चिदात्मना स्वेन ब्रह्मण्याकाशे ब्रह्मानन्दोपभोगो मोक्ष इत्यार्यसामाजि**का दयानन्दीयाः** १५ एक-
विंशति दुःखध्वंसो मोक्ष इति **नूतननैयायिकाः** १६ मिथ्याभूतसंसाराऽभिनिवृत्तौ स्वस्वरूपाधिगमो मोक्ष इति **नवीनवेदा
न्तिनः** १७ "विष्णुः स्वर्गादिहेतुः सशब्दालङ्काररूपवान् । अपरा च पराविद्या तौ ज्ञात्वा मुच्यते भयात् ,, अनेन अलंकारेण
शब्दब्रह्मणो याथातथ्येनाऽवगमात् कैवल्यमिति **साहित्यतत्त्वज्ञा आलंकारिकाः** १८ निराकाराविर्भावो मोक्षः - वा सच्चि
दानन्दात्मस्वरूपप्रतिष्ठैव मुक्तिरिति **नानकाऽनुयायिनः उदासीनाः** १९ चतुर्थाकाशे वैवाहिकवैग्रहिक वाद्यवस्त्रादिव्यवहा-
रेण अखण्डविषयानन्दोपभोगो मोक्ष इति **ईसामसीहमताऽनुयायिनः कृश्चनाः** ,, स्वर्गे सप्तविधविविधोपभोगे भुक्ते पर
मात्मदर्शनं मोक्ष इति **रवीनाः यवनमतभेदाः** ,, खुदानामकेश्वरादधस्तने सप्तमे आकाशे त्रिंशद्वर्षीदप्सरावती अनेकशोऽ
प्सरोगणभोजनपानादिभोक्ताऽक्षयानन्दभाक् जीव एव मुक्तः , यद्वा पाश्चात्ताप एव मोक्षः इति **महम्मदीयाः कौ
रानिकाः** ॥ इति =

शब्दं लक्षयति ॥ शब्द इति = अम्बरगुणः आकाशगुणः शब्दः, श्रोत्रग्राह्यः श्रोत्रेन्द्रियेण गृह्यते, यथा च सूत्रम् "श्रोत्रग्रहणो योऽर्थः स शब्दः" वै. द. २।२।२१। स च क्षणिकः, क्षणं तिष्ठति अर्थात् विनाशी, शब्दोच्चारणमात्रे सति श्रोत्रग्रहणो विनश्यति मुहुरनुपलब्धेः। कार्यकारणोभयविरोधी, कार्यकारणोभयेन विनश्यति, कार्यविरोधी यथा "पूर्वः शब्दः शब्दान्तरमुत्पाद्य विनाशमेति। कारणविरोधी यथा "अन्तिमः शब्दः उपान्त्येन स्वकारणेन विरुध्यतेऽन्यस्य विनाशकारणस्याभावात्। माध्यमिकास्तु शब्दाः कार्यकारणाभ्यामेव नश्यन्ति। स च शब्दः संयोगविभागशब्दजः संयोगात् विभागात् शब्दाच्च जायते। संयोगात् शब्दः यथोत्पद्यते "मिथो हस्तद्वयताडनसंयोगात् तालिका उत्पद्यते यस्तालिकाशब्दः स संयोगजः। विभागाच्छब्दः यथा "वंशविदीर्णसमये यस्तद्विभागो जायते तस्मादपि शब्द उत्पद्यते स च विभागजः शब्दः। शब्दात् यथा "शब्दे उत्पद्यमाने आद्यशब्दात् पश्चाद्दाविनो मध्यवर्तिनो ये शब्दाः ते शब्दजन्या भवन्ति

मू = शब्दोऽम्बरगुणः श्रोत्रग्राह्यः क्षणिकः कार्यकारणोभयविरोधी संयोगविभागशब्दजः प्रदेशवृत्तिः समानासमानजातीयकारणः। स द्विविधो वर्णलक्षणो ध्वनिलक्षणश्च। तत्र अकारादिवर्णलक्षणः, शङ्खादिनिमित्तो ध्वनिलक्षणः।

यथा च सूत्रम् "संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः" वै. द. २।२।३१ स च शब्दः प्रदेशवृत्तिः एकदेशव्यापी उत्पद्यमानः शब्दः एकस्मिन् देशे उत्पद्यते। स शब्दः समानासमानजातीयकारणः, तत्र शब्दजः शब्दसमानजातीयकारणः। संयोगविभागजः शब्दोऽसमानजातीयकारणः इति। यथा च सूत्रम् "परिशेषाल्लिङ्गमाकाशस्य" वै. द. २।१।२७ तद्भेदानाह ॥ स इति = वर्णस्वरूपः शब्दः ध्वनिस्वरूपः शब्द इति भेदात् द्विविधः द्विप्रकारकः शब्दः। अ, आ, इ, ई – क, ख, प्रभृति वर्णाः सन्ति। शंखतालाद्युत्पन्नः शब्दः ध्वनिस्वरूप इति ॥

श्री: श्री: श्री: श्री

प्रश॰ भा॰
१५९
भाष्य प्र॰

शब्दं लक्षयति ॥ शब्द इति = अम्बरगुणः आकाशगुणः शब्दः, श्रोत्रग्राह्यः श्रोत्रेन्द्रियेण गृह्यते, यथा च सूत्रम् "श्रोत्रग्रहणो योऽर्थः स शब्दः" वै॰ द॰ २।२।२१। स च क्षणिकः, क्षणं तिष्ठति अर्थात् विनाशी, शब्दोच्चारणमात्रे सति श्रोत्रग्रहणसमानो विनश्यति मुहुरनुपलब्धेः। कार्यकारणोभयविरोधी, कार्यकारणोभयेन विनश्यति, कार्यविरोधी यथा "पूर्वः शब्दः शब्दान्तरमुत्पाद्य विनाशमेति। कारणविरोधी यथा "अन्तिमः शब्दः उपान्त्येन स्वकारणेन विरुध्यतेऽन्त्यस्य विनाशकारणस्याभावात्। माध्यमिकास्तु शब्दाः कार्यकारणाभ्यामेव नश्यन्ति। स च शब्दः संयोगविभागशब्दजः संयोगात् विभागात् शब्दाच्च जायते। संयोगात् शब्दः यथोत्पद्यते "मिथो हस्तद्वयताडनसंयोगात् तालिका उत्पद्यते यस्तालिकाशब्दः स संयोगजः। विभागाच्छब्दः यथा "वंशविदीर्णसमये यस्तद्विभागो जायते तस्मादपि शब्द उत्पद्यते स च विभागजः शब्दः। शब्दात् यथा "शब्दे उत्पद्यमाने आद्यशब्दात् पश्चाद्भाविनो मध्यवर्तिनो ये शब्दाः ते शब्दजन्या भवन्ति

मू = शब्दोऽम्बरगुणः श्रोत्रग्राह्यः क्षणिकः कार्यकारणोभयविरोधी संयोग-विभागशब्दजः प्रदेशवृत्तिः समानासमानजातीयकारणः। स द्विविधो वर्णलक्षणो ध्वनिलक्षणश्च। तत्र अकारादिर्वर्णलक्षणः, शङ्खादिनिमित्तो ध्वनिलक्षणः।

यथा च सूत्रम् "संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिः" वै॰ द॰ २।२।३१ स च शब्दः प्रदेशवृत्तिः एकदेशव्यापी उत्पद्यमानः शब्दः एकस्मिन् देशे उत्पद्यते। स शब्दः समानाऽसमानजातीयकारणः, तत्र शब्दजः शब्दसमानजातीयकारणः। संयोगविभागजः शब्दोऽसमानजातीयकारणः इति। यथा च सूत्रम् "परिशेषाल्लिङ्गमाकाशस्य" वै॰ द॰ २।१।२७ तद्भेदानाह ॥ स इति = वर्णस्वरूपः शब्दः ध्वनिस्वरूपः शब्द इति भेदात् द्विविधः द्विप्रकारकः शब्दः। अ, आ, इ, ई - क, ख, प्रभृति वर्णाः सन्ति। शंखतालाद्युत्पन्नः शब्दः ध्वनिस्वरूप इति ॥

श्री: श्री: श्री: श्री:

वर्णात्मकशब्दोत्पत्तिमाह ॥ तत्रेति = तत्र तयोर्वर्णशङ्खादिलक्षणशब्दयोः मध्ये वर्णात्मकशब्दोत्पत्तिरुच्यते। स्मृत्यपेक्षात् दृष्टश्रुताऽनुभूतवर्णस्मृत्याः अपेक्षात् आत्ममनसोः संयोगात् वर्णोच्चारेच्छा वर्णस्य अ, आ, क, खेत्याद्यक्षरस्य उच्चारणे सम्भाषणे इच्छा अभिलाषा वर्तते। ततः वर्णोच्चारणेच्छानन्तरं प्रयत्नः तं निमित्तकारणं प्रयत्नमपेक्षमाणात् आत्मवायुसंयोगात् असमवायिकारणात् वायौ प्राणोदानसंज्ञकवायौ कर्म जायते स च वायुः स्वस्थानात् ऊर्ध्वं गच्छन् कण्ठादीन् कण्ठोष्ठताल्वादीन् देशान् अभिहन्ति अभिघातयति, ततोऽभिघातानन्तरं स्थानवायुसंयोगाऽपेक्षमाणात् स्थानस्य कण्ठादेः

मू = तत्र वर्णलक्षणस्योत्पत्तिः। आत्ममनसोः संयोगात् स्मृत्यपेक्षाद् वर्णोच्चारेच्छा तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्मवायुसंयोगाद्वायौ कर्म जायते। स चोर्ध्वं गच्छन् कण्ठादीनभिहन्ति। ततः स्थानवायुसंयोगाऽपेक्षमाणात् स्थानाकाशसंयोगाद्वर्णोत्पत्तिः। अवर्णलक्षणोऽपि भेरीदण्डसंयोगाऽपेक्षाद्भेर्याकाशसंयोगादुत्पद्यते। वेणुपर्वाकाशविभागाच्च ॥

शारीरकवायुना सह यः संयोगो निमित्तकारणभूतः, तस्याऽपेक्षाऽस्ति यत्र तथाभूतात् स्थानाकाशसंयोगात् असमवायिकारणात् वर्णोत्पत्तिः, क, खाद्यक्षरोत्पत्तिः जायते। ध्वनिलक्षणे शब्दे निर्दिशति ॥ अवर्णेति = अवर्णलक्षणः ध्वनिलक्षणः शब्दः। भेर्याकाशसंयोगोऽसमवायिकारणम्, भेरीदण्डसंयोगो दण्डमतो वेगश्च निमित्तकारणम्। वेणुपर्वविभागात् वेण्वाकाशविभागात् शब्दः उत्पद्यते इति ॥

श्री:

श्री:   श्री:   श्री:

शब्दात् शब्दोत्पत्तिं साधयति ॥ शब्दादिति = संयोगविभागनिष्पन्नात् संयोगात् तालिकासंयोगात् प्रादुर्भूतात् विभागात् वेणुपर्वविभागोत्पन्नात् शब्दात् वीचीसन्तानवत् वीचीतरङ्गवत् शब्दसन्तानो भवति।यथा नदीकूलप्रचलित पूर्वतरङ्गः तरङ्गान्तरं जनयति स चाऽपरं स चाऽपरमेवं पूर्वशब्दः शब्दान्तरमुत्पाद्य विनश्यति, ततोऽपरोऽपरमेवं शब्दसन्तानो जायते इति एवं सन्तानेन श्रोत्रप्रदेशं कर्णस्थानमागतस्य प्राप्तस्य अन्त्यशब्दस्य ग्रहणं स्वीकारो ज्ञानमितियावद्भवति।

मू॰= शब्दाच्च संयोगविभागनिष्पन्नाद्वीचीसन्तानवच्छब्दसन्तान इत्येवं सन्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणम्। श्रोत्रशब्दयोर्गमनागमनाभावादप्राप्तस्य ग्रहणं नास्ति परिशेषात् सन्तानसिद्धिरिति ॥ इति श्रीप्रशस्तपादभाष्ये गुणपदार्थः समाप्तः ॥

द्वयोर्निष्क्रियत्वात् कथं शब्दग्रहणमित्याह ॥ श्रोत्रेति = न श्रोत्रे गमनागमने गत्यागती न च शब्दे गमनागमने भवतः श्रोत्रशब्दयोः निष्क्रियत्वात्। अप्राप्तस्य अलब्धस्य कदापि लोके ग्रहणं प्रत्यक्षं न भवति, परिशेषात् उपायान्तराऽभावात् सन्तानसिद्धिः शब्दसन्तानः कल्प्यते यथा वीची वीच्यन्तरमुत्पादयन्ती स्वयं विनश्यति यद्यपि, तथापि नदीपारंगतमनुष्येण निकषा तद्वृत्तिस्तदुपलब्धिश्च दृश्यते, तत्र वीचीसन्तानकल्पा प्रकल्प्यते एवं शब्दोऽपि शब्दान्तरमुत्पादयन् वीचीसन्तानवच्छब्दसन्तानोऽपि सिध्यति। इति श्री प्रशस्तपादमुनिप्रणीते प्रशस्तपादभाष्ये लैयावासि जगन्नाथशास्त्रिन्यायभूषणकृते भाष्यप्रकाशे गुणपदार्थः समाप्तः ॥

"गुणत्रयस्वरूपाय कर्मफलप्रदायिने
नमः जगत्प्रतिष्ठाय कृष्णाय [illegible]ज्ञानदायिने,, १

अथकर्मपदार्थनिरूपणम्॥ उत्क्षेपणेति= उत्क्षेपणादीनाम् उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानां पञ्चानां कर्मत्वसम्बन्धः कर्मत्वेन कर्मजात्या सह सम्बन्धः। उत्क्षेपणादयो जातिमन्त इत्यर्थः। अथकर्मस्वरूपमाह॥ एकेति= एकमेव कर्म एकस्मिन् द्रव्ये एकदा भवति अत एकस्मिन्नेव द्रव्ये वर्तते इत्येकद्रव्यवत्त्वम्। क्षणिकत्वम् तत्कर्म तूर्णविनाशि चतुःक्षणाऽवस्थायि सर्वं कर्म पञ्चमक्षणे विनश्यति, गुरुत्वप्रयत्नसंयोगेभ्यः पूर्वं द्रव्ये कर्म, ततो विभागः, ततः पूर्वसंयोगनाशः तत उत्तरसंयोगस्ततः कर्मनाशः इति कर्मनाशप्रक्रिया, तत्कर्म मूर्तद्रव्यवृत्तित्वम् अपकृष्टपरिमाणद्रव्ये वृत्तिर्वर्तनं यस्य तथाभूतं तत्। यथोक्तं सूत्रम् "तदलिङ्गमेकद्रव्यत्वात्कर्मणः,, वै·द· २।१।२१। तत्कर्म अगुणत्वं कर्मणि गुणाऽभावः यथा च सूत्रम् "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति,, वै·द· १।१।१७ * कर्मलक्षणम्

मू= अथ कर्मपदार्थनिरूपणम्। उत्क्षेपणादीनां पञ्चानामपि कर्मत्वसम्बन्धः। एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वम् अगुणवत्त्वम्। गुरुत्वद्रवत्वप्रयत्नसंयोगजत्वं स्वकार्यसंयोगविरोधित्वं संयोगविभागनिरपेक्षकारणत्वम् असमवायिकारणत्वम्।

गुरुत्वाद्द्रवत्वात् प्रयत्नात् संयोगाच्च कर्म जायते। यथा गुरुणो लोष्टादेः आत्मनः प्रयत्नेन हस्तादिसंयोगेन च कर्म उत्पद्यते। यथा च सूत्रम् "गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम्,, वै· १।१।२९। तत्कर्म स्वकार्यसंयोगविरोधि स्वकार्येण संयोगेन विरुध्यते कर्म विभागोत्पादनानन्तरमुत्तरसंयोगमुत्पाद्य विनश्यतीति कार्यविरोधि। यथा च सूत्रम् "कार्यविरोधि कर्म,, वै·द· १।१।१४ तत् कर्म संयोगविभागनिरपेक्षकारणत्वम् संयोगविभागेषु जनयितव्येषु स्वोत्पत्त्यनन्तरोत्पत्तिकं भावान्तरं नाऽपेक्षते कारणं च भवति। तत्कर्म असमवायिकारणम् गुणस्तु कदाचिन्निमित्तकारणमपि भवति परञ्च कर्म तु सर्वदाऽसमवायिकारणमेव यथा च सूत्रम् "कारणे समवायात् कर्माणि,, वै·द· १०।२।३॥

अपरमपि कर्मलक्षणं वदति॥ स्वपरेति= स्वपराश्रयसमवेतकार्यारम्भकत्वम् स्वाश्रये पराश्रये च समवेतं समवायसम्बन्धविशिष्टं यत् कार्यं संयोगविभागलक्षणात्मकं तदारम्भकत्वं तत्कर्म। तत्कर्म अपरां समानजातिं नारभते यथा गुणाः सजातीयान् अपरान् गुणान् आरभन्ते न तथा अवयवकर्माणि अवयविनि कर्म, यथा च सूत्रम् "गुणवैधर्म्यान्न कर्मणां कर्म" वै॰ द॰ १।१।२४। तत् कर्म

मू॰= स्वपराश्रयसमवेतकार्यारम्भकत्वं समानजातीयानारम्भकत्वं द्रव्यानारम्भकत्वञ्च प्रतिनियतजातियोगित्वम् दिग्विशिष्टकार्यारम्भकत्वं च विशेषः॥

तत्कर्म द्रव्याऽनारम्भकम् द्रव्याणां न कारणं कर्म तदानीं तन्निवृत्तेः। यथा च सूत्रम् "न द्रव्याणां कर्म" वै॰ द॰ १।१।२१। कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्" १।१।३१ तत्कर्म प्रतिनियतजातियोगित्वम्। प्रत्येकोत्क्षेपणादिषु जातियोगः उत्क्षेपणत्वम् अपक्षेपणत्वम् आकुञ्चनत्वमित्यादिविशिष्टकार्यारम्भकत्वम् यां दिशं लक्ष्यीकृत्य यदुत्क्षेपणादिकं कर्म विधीयते तां प्रति स्वकार्यारम्भकं कर्म नाऽपरां प्रतीति विशेषः॥

उत्क्षेपणादिकर्म पञ्चकं निर्दिशति ॥ तत्रेति = तत्र पञ्चसु कर्मसु मध्ये उत्क्षेपणं शरीरावयवेषु हस्तादिषु तत्सम्बद्धेषु तद्गतेषु मुसलादिषु यदूर्ध्वभाग्भिः प्रदेशैः ऊर्ध्वप्रदेशैः संयोगकारणं संयोगहेतुः । अधोभाग्भिः प्रदेशैः अधःस्थानैः विभागकारणं विभागहेतुः कर्मोत्पद्यते कर्म प्रादुर्भवति गुरुत्वप्रयत्नसंयोगेभ्यः गुरुणः लोष्टादेः आत्मनः प्रयत्नेन हस्तादिसंयोगेन तदुत्क्षेपणं भवति । अपक्षेपणमाचष्टे ॥ तदिति = तदुत्क्षेपणं विपरीतसंयोगविभागकारणम् अधोदेशसंयोगकारणम् ऊर्ध्वदेशविभागकारणं भवति । आकुञ्चनमाचष्टे ॥ ऋजुन इति = ऋजुनोऽवक्रस्य द्रव्यस्य अग्रावयवानां मुख्याऽवयवानां तद्देशैः अग्राऽवयवसम्बद्धाकाशादिदेशैः विभागः पृथग्भवनं मूलप्रदेशैः संयोगः एकीभवनं येन कर्मणा अवयवी वस्त्रमात्रं कुटिलः सञ्जायते तद् आकुञ्चनं कर्म भवति । प्रसारणं व्याख्यायते ॥ तदिति = तद्विपर्ययेण तस्य आकुञ्चनस्य प्रतिकूलेन संयोगविभागोत्पत्तौ मूलप्रदेशविभागोत्तरदेशसंयोगोत्पत्तौ येन कर्मणा अवयवी ऋजुः वक्ररहितः सम्पद्यते भवति तत्प्रसारणं कर्म भवति । गमनमुदाहरति । यदिति = गमनकर्मनिमित्ते न दिक्नियता न प्रदेशो नियतः न संयोगविभागौ नियतौ तेषामनियतदिगादीनां यत् कारणं तद्गमनमिति कथ्यते । एतत्पञ्चविधमपि कर्म शरीराऽवयवेषु सम्बद्धेषु मुसलादिषु च सत्प्रत्ययं प्रयत्नपूर्वकम्

मू = तत्रोत्क्षेपणं शरीराऽवयवेषु तत्सम्बद्धेषु च यदूर्ध्वभाग्भिः प्रदेशैः संयोगकारणमधोभाग्भिश्च प्रदेशैः विभागकारणं कर्मोत्पद्यते गुरुत्वप्रयत्नसंयोगेभ्यस्तदुत्क्षेपणम् । तद्विपरीतसंयोगविभागकारणं कर्म अपक्षेपणम् । ऋजुनो द्रव्यस्याग्राऽवयवानां तद्देशैर्विभागः संयोगश्च मूलप्रदेशैर्येन कर्मणाऽवयवी कुटिलः संजायते तदाकुञ्चनम् । तद्विपर्ययेण संयोगविभागोत्पत्तौ येन कर्मणाऽवयवी ऋजुः सम्पद्यते तत्प्रसारणम् । यदनियतदिक्प्रदेशसंयोगविभागकारणं तद्गमनमिति । एतत्पञ्चविधमपि कर्म शरीराऽवयवेषु तत्सम्बद्धेषु च सत्प्रत्ययमसत्प्रत्ययञ्च । यदन्यत्तदप्रत्ययमेव तेष्वन्येषु च तद्गमनमिति ॥

असत्प्रत्ययमप्रयत्नपूर्वकञ्च भवति । गमनमप्रयत्नपूर्वकमित्याह ॥ यदिति = तेषु शरीरेषु अन्येषु वा द्रव्येषु यदन्यत् सत्प्रत्ययात् यदन्यत् तदप्रत्ययमेव अप्रयत्नपूर्वकमेव भवति तद्गमनमिति व्यपदिश्यते ॥ उत्क्षेपणादिकं चतुर्विधं कर्म प्रयत्नपूर्वकं भवति पञ्चमं गमनं तु अप्रयत्नपूर्वकमेवेति भावः ॥

गमनमेवैकं कर्म किमन्यः कर्मभिरिति पूर्वपक्षयति ॥ कर्मणामिति = उत्क्षेपणादीनि पञ्चैव कर्माणि इत्युक्तं न सम्यक्। यतः गमनाऽविशेषात्। सर्वाणि एवैतानि गमनेऽन्तर्भवन्ति। सर्वं हि उत्क्षेपणादिकं कर्म क्षणिकं क्षणमेव स्थायि। उत्पन्नं गमनमात्रं कर्म स्वाश्रयस्य निजाऽधिकरणस्य ऊर्ध्वम् ऊर्ध्वप्राप्तिः, अधः, अपक्षेपणम्, तिर्यक् तिरश्चीनं वाऽणुमात्रैः प्रदेशैः साधारणतरस्थानैः संयोगविभागान् संयोगान् विभागांश्च करोति, कस्यचिद् देशस्य संयोगं कस्यचिद् देशस्य विभागं वा करोति। सर्वत्र उत्क्षेपणादिषु पञ्चसु कर्मसु गमनाविशिष्टः ऊर्ध्वं गच्छति अधो गच्छति इत्यादि प्रत्ययोऽविशिष्टो गमनादभिन्नः, तस्मात् कारणात् सर्वमुत्क्षेपणादिकं कर्म गमनमेव, न किञ्चिदपि प्रयोजनं तेषां पृथक् कथनेनेति ॥ एतत्परिहारमाचष्टे ॥ इति नेति = उत्क्षेपणादिकमपि गमनं इति यदुक्तं तन्नास्ति। वर्गशः प्रतिवर्गं प्रतिस्वरूपमिति यावत् प्रत्ययाऽनुव्यावृत्तिदर्शनात् प्रत्ययस्यानुवृत्तिर्वैतन्नेम उत्क्षेपणवर्गे अपक्षेपणस्य व्यावृत्तिर्निवृत्तिर्दृश्यते। यथा गोजातौ अश्वजातिव्यावृत्त्यैव लोकेनाश्वोजातिरेव कल्प्यते तथाऽत्राऽप्यूह्यम्। इहोर्ध्व

मू॰= कर्मणां जातिपञ्चकत्वमयुक्तम्। गमनाऽविशेषात्। सर्वं हि क्षणिकं कर्म गमनमात्रमुत्पन्नं स्वाश्रयस्योर्ध्वमधस्तिर्यग् वाऽप्यणुमात्रैः प्रदेशैः संयोगविभागान् करोति, सर्वत्र गमनप्रत्ययोऽविशिष्टस्तस्माद् गमनमेव सर्वम् इति न। वर्गशः प्रत्ययाऽनुवृत्तिव्यावृत्तिदर्शनात्। इहोत्क्षेपणं परत्राऽपक्षेपणमित्येवमादि सर्वत्र वर्गशः प्रत्ययाऽनुवृत्तिव्यावृत्ती दृष्टे तद्धेतुः सामान्यविशेषभेदोऽवगम्यते। तेषामुदाद्युपसर्गविशेषात् प्रतिनियतदिग्विशिष्टकार्यारम्भत्वादुपलक्षणभेदोऽपि सिद्धः ॥

गमनादुत्क्षेपणम् अधोगमनादपक्षेपणमित्येवं सर्वत्र सर्वस्मिन्नेव स्थाने वर्गशः वर्गक्रमेण प्रत्ययाऽनुवृत्तिः इदमेतत्तुल्या, इति प्रत्ययाऽनुवृत्तिः दृष्टा, व्यावृत्तिरिदमेतस्मात् पृथगिति व्यावृत्तिर्दृष्टा। तद्धेतुः तत्पृथक्त्वकारणं सामान्यविशेषभेदोऽवगम्यते इदमेतत्सामान्यमयमस्माद्विशेषः इत्युत्क्षेपणादिषु भेदोऽवगम्यतेऽवबुध्यते। प्रकारान्तरेण सिद्धान्तमाह ॥ तेषामिति = तेषामुत्क्षेपणादीनाम् उत्-अप-आ-प्र-इत्युपसर्गभेदात् प्रतिनियतदिग्विशिष्टकार्यारम्भत्वात् स्वस्वनिश्चितदिशि कार्यारम्भादपि उपलक्षणभेदः उपलक्ष्यतेऽन्यविलक्षणतया प्रतिपाद्यते व्यक्तिः अनयेत्युपलक्षणम् + जातिस्तद्भेदसिद्धः। यथा उत्क्षेपणे ऊर्ध्वदिक् नियता, अपक्षेपणेऽधो दिक्, आकुञ्चने स्वमूलप्रतिसर्पणम्। प्रसारणे स्वमूलाद्बहिर्निःसरणम् एवेति स्वस्वदिशा कार्यारम्भो नियतोऽतः। श्रीः
अतः पञ्चैव कर्माणि सिद्धानि न केवलं गमनमेवेति ॥ श्रीः

पुनः पूर्वपक्षमाह ॥ एवमिति = एवमपि पूर्वप्रकारेणाऽपि पञ्चैव कर्माणीति अवधारणाऽनुपपत्तिः निश्चयाऽसिद्धिः। निष्क्रमणप्रवेशनादिष्वपि निष्क्रमणेऽपि निष्क्रमणप्रत्ययानुवृत्तिः प्रवेशनव्यावृत्तिरिति। वर्गशः समूहरूपेण। यदि उत्क्षेपणादिषु प्रत्ययानुवृत्तिव्यावृत्तिदर्शनात् जातिभेदः कर्मपञ्चकत्वं स्वीक्रियते एवं तेनैव प्रकारेण निष्क्रमणप्रवेशनादिषु अपि जातिभेदः स्वीक्रियतामिति पूर्वः पक्षः। मध्यसिद्धान्तमाह ॥ कार्येति = तेषु निष्क्रमणप्रवेशनादिषु बहिर्निःसरणान्तःप्रवेशनकार्यभेदात् प्रत्ययाऽनुवृत्तिव्यावृत्ती भवतः, न जातिभेदादतो निष्क्रमणादयो न पृथक्जातय इति ॥ मध्यसिद्धान्ते निराकरोति। इतीति = कार्यभेदाच्चेत् प्रत्ययाऽनुवृत्तिव्यावृत्ती इति चेन्न। तर्हि उत्क्षेपणादिष्वपि ऊर्ध्वक्षेपणाधःक्षेपणादिकार्यभेदादेव प्रत्ययभेदः स्यान्न जातिभेदात्। एकदेशी पुनः पूर्वपक्षमाह ॥ अथेति = वर्गशः समूहरूपेण द्वयोः प्रत्ययाऽनुवृत्तिव्यावृत्तिसद्भावे समाने तुल्ये सति उत्क्षेपणादीनामेव जातिभेदोऽस्ति न निष्क्रमणप्रवेशनादीनामित्यत्र अस्मिन् विषये विशेषहेतुः उत्क्षेपणादीनामस्मात् कारणात् जातिभेदोऽस्ति निष्क्रमणादीनामस्मा-

मू॰ = एवमपि पञ्चैवेत्यवधारणाऽनुपपत्तिः। निष्क्रमणप्रवेशनादिष्वपि वर्गशः प्रत्ययाऽनुवृत्तिव्यावृत्तिदर्शनात्। यथोत्क्षेपणादिषु सर्वत्र वर्गशः प्रत्ययाऽनुवृत्तिव्यावृत्तिदर्शनाज्जातिभेद इष्यते एवञ्च निष्क्रमणप्रवेशनादादिष्वपि। कार्यभेदात्तेषु प्रत्ययाऽनुवृत्तिव्यावृत्ती। इति चेन्न। उत्क्षेपणादिष्वपि कार्यभेदादेव प्रत्ययाऽनुवृत्तिव्यावृत्तिप्रसंगः। अथ समाने वर्गशः प्रत्ययाऽनुवृत्तिव्यावृत्तिसद्भावे उत्क्षेपणादीनामेव जातिभेदो न निष्क्रमणादीनामित्यत्र विशेषहेतुर्नास्ति। इति न जातिसंकरप्रसंगात्। निष्क्रमणादीनां जातिभेदात् प्रत्ययाऽनुवृत्तिव्यावृत्तौ जातिसंकरः प्रसज्यते ॥

न्नास्तीति विशेषकारणं न विद्यते ॥ सिद्धान्तमाह सिद्धान्ती ॥ इति नेति = निष्क्रमणादि जात्यभावे न किञ्चिदपि कारणमिति चेन्न जातिसङ्करप्रसङ्गात् जातिसङ्करः प्राप्नोति। निष्क्रमणप्रवेशनादीनां जातिभेद इष्यते चेत्तर्हि प्रत्ययभेदे जातिसङ्करः। एकस्यां व्यक्तौ विरुद्धाऽनेकजातिसमवायः प्रसज्यते। सङ्करो जातिबाधको भवति। यथा च कारिका "व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसंबन्धो जातिबाधकसंग्रहः ॥" यथा च सङ्करो नाम "परस्परात्यन्ताऽभावसमानाधिकरणयोः धर्मयोरेकत्र समावेशः सङ्करः" ॥

जातिसङ्कर प्राप्तिमाचष्टे ॥ कथमिति = कथं केन प्रकारेण जातिसङ्करः प्राप्नोति । द्वयोः द्रष्ट्रोः एकस्मात् अपवारकात् कोष्ठात् अपवारकान्तरम् अपरम् गृहं गच्छतोर्मध्ये यदैकः द्रष्टा पूर्वस्मिन् कोष्ठे स्थितः अपरश्च अपरस्मिन् कोष्ठे तदा एकः पुरुषः पूर्वस्मात् कोष्ठात् निष्क्रम्य अपरस्मिन् कोष्ठे प्रविशति, तदा पूर्वकोष्ठस्थो जनः तस्य निष्क्रमणकाले तस्मिन् जने निष्क्रमणकर्मसमावेशकः पश्चिमकोष्ठस्थः जनः तत्प्रवेशनक्रियां प्रविशतीति क्रियाभावुक एव । इत्थमेकस्यां व्यक्तौ तदा विरुद्धद्वय निष्क्रमण त्वप्रवेशनत्वजातिसंस्थानमेव दोषः । यदा तु यस्मिन् काले तु प्रतिसीरायपनीतं मध्यस्थितं जवनिकाप्रभृतिभिः दूरीभूतमितिभावः, तदा तस्मिन्नेव काले तत्र न प्रवेशनप्रत्ययः न च निष्क्रमणप्रत्ययः भवति किन्तु अपितु गमनप्रत्यय एव प्रतीयतेऽनुभूयते इतिभावः उदाहरणान्तरमाह ॥ तथेति = तथा तेनैव प्रकारेण नालिकायां गर्ते यदा वंशपत्रं पतति तदा बहवो द्रष्टारश्चेत्स्युः तदा तत्र एकस्मिन्नेव वंशपत्रे कस्यचिद्गमनप्रत्ययः, कस्यचित्पतनप्रत्ययः, कस्यचित्प्रवेशनप्रत्ययः जायतेऽत एकस्मिन्नेव त्व क्रियासमावेशात्

मू = कथम् । द्वयोर्द्रष्ट्रोरेकस्मादपवरकादपवरकान्तरं गच्छतो युगपन्निष्क्रमणप्रवेशनप्रत्ययौ दृष्टौ तथा द्वारप्रदेशे प्रविशति निष्क्रामतीति च । यदा तु प्रतिसीरापनीतं भवति तदा न प्रवेशनप्रत्ययो नाऽपि निष्क्रमणप्रत्ययः किन्तु गमनप्रत्यय एव भवति । तथा नालिकायां वंशपत्रादौ पतति बहूनां द्रष्टॄणां युगपद्गमणपतनप्रवेशनप्रत्यया दृष्टा इति जातिसङ्करप्रसङ्गः । न चैवमुत्क्षेपणादिषु प्रत्ययसंकरो दृष्टः, तस्मादुत्क्षेपणादीनामेव जातिभेदात् प्रत्ययाऽनुवृत्तिव्यावृत्ती । निष्क्रमणादीनां तु कार्यभेदादिति ॥

जातिसङ्कर प्राप्तिर्भवति ॥ स्वपक्षे विशेषमाह ॥ नेति = उत्क्षेपणाऽपक्षेपणादिषु एवमनेनैव प्रकारेण प्रत्ययसङ्करः प्रत्ययस्य संकरः न च दृष्टो न चाऽवलोकितः । तस्मात् कारणात् विगतप्रत्ययसङ्करा उत्क्षेपणादयः सन्ति । तत्र जातिभेदात् प्रत्ययभेदाः स्वीक्रियन्ते । निष्क्रमणादिषु तु निष्क्रमणप्रवेशनकार्यभेदात् प्रत्ययभेदो दृष्टः नान्यथा इति ॥

अथ पूर्वपक्षमाह॥ कथं युगपदिति= कथं केन प्रकारेण युगपत्प्रत्ययभेदः, निष्क्रमणप्रवेशयोः युगपत् समकालमेव प्रत्यय
भेदोऽस्तीति चेत्। अथ मतमभीष्टमेतत्। यथा जातिसङ्करो नास्ति एकदा एकस्मिन् द्रव्ये एकमेव कर्म भवति न बहुधाऽतः जातिसङ्क
रोऽभावात्। अभावोऽनेककर्मसमावेशस्य। एकस्मिन् कर्मणि युगपद्द्रष्टृणां समकालीनाऽवलोकयतां जनानां भ्रमणपतनप्रवेशनप्रत्य
यः, भ्रमणप्रत्ययः प्रवेशनप्रत्ययः पतनप्रत्ययः एते इमे त्रयः कथं केन प्रकारेण भवन्तीति। सिद्धान्तमाचष्टे॥ अत्रेति= अत्र
अस्मिन् प्रश्ने ब्रूमः उत्तरं दद्मः। अनेककर्मसमावेशाऽभावो योऽवाचि स न भवति। अवयवाऽवयविनो दिग्विशिष्टसंयोगवि
भागानां कार्यभेदात्। अवयवानां दिक्संयोगात् अन्यत्कार्यं विभागादन्यच्च एवमवयविनोऽपि सम्बोध्यमिति। तत्स्पष्टमाह
यः हि द्रष्टा जनः अवयवानां हस्तपादादीनां पार्श्वतः एकदेशतः पर्यायेण यथाक्रमं दिक्प्रदेशैः संयोगे विभागे च पश्यति निरीक्षते त-
स्य पुरुषस्य भ्रमणप्रत्ययः भ्रमणनिश्चयः भवति। यो हि जनः अवयविनः वस्तुनः ऊर्ध्वप्रदेशैः विभागमधःप्रदेशैः संयोगं च
अवेक्षते पश्यति तस्य पुरुषस्य पतनप्रत्ययः भवति। यः जनश्च नालिकान्तर्देशे संयोगे संयोगसम्बन्धे बहिर्देशे बहिर्भागे च विभा

सू= कथं युगपत्प्रत्ययभेदः इति चेत्। अथ मतम्। यथा जातिसङ्करो नास्ति एवमनेककर्म-
समावेशोऽपि नास्तीत्येकस्मिन् कर्मणि युगपद्द्रष्टृणां भ्रमणपतनप्रवेशनप्रत्ययाः
कथं भवन्तीति। अत्र ब्रूमः। न। अवयवावयवावयविनोर्दिग्विशिष्टसंयोगवि
भागानां कार्यभेदात्। यो हि द्रष्टाऽवयवानां पार्श्वतः पर्यायेण दिक्प्रदेशैः संयोग
विभागान् पश्यति तस्य भ्रमणप्रत्ययो भवति। यो ह्यवयविनः ऊर्ध्वप्रदेशैर्विभागम
धः संयोगञ्चावेक्षते तस्य पतनप्रत्ययो भवति। यः पुनर्नालिकान्तर्देशे संयोगं बहि
र्देशे च विभागं पश्यति तस्य प्रवेशनप्रत्ययो भवति। तिसिद्धः कार्यभेदान्निष्क्रमणादी-
नां प्रत्ययभेद इति। भवतूत्क्षेपणादीनां जातिभेदात्प्रत्ययभेदो निष्क्रमणादीनां तु कार्य-

गं पश्यति अवलोकयति तस्य नरस्य प्रवेशनप्रत्ययो भवति। अतः निष्क्रमणप्रवेशनादीनां कार्यभेदात् निष्क्रमणकार्यात् निष्क्रम
णप्रत्ययभेदः प्रवेशनकार्यात् प्रवेशनप्रत्ययभेदः सिद्धः। न तु जातिभेदात् निष्क्रमणप्रवेशनादयः सिद्ध्यन्तीति भावः। स्वसिद्धा
न्तनिष्कर्षः समादिश्यते॥ भवत्विति= उत्क्षेपणाऽपक्षेपणादीनां जातिभेदात् प्रत्ययभेदः इदमुत्क्षेपणमिदमपक्षेपणमित्यादि
प्रत्ययः भवतु निष्क्रमणादीनां तु निष्क्रमणप्रवेशनादीनां तु कार्यभेदात् प्रत्ययः भवतु इति सिद्धान्तः॥

गमनविषये संशयमाह ॥ अथेति = गमनत्वं किं कर्मत्वपर्यायः कर्मत्वजात्या स्वीक्रियते आहोस्वित् अथवा किम् अपरं सामान्यं कर्मतो भिन्नलक्षणा जातिः। सिद्धान्ती पृच्छति ॥ कुत इति = कुतः कस्मात्कारणात् ते तव संशयः संदेहः। कुतः संशयदोलारूढो भवानिति ॥ पूर्वपक्षी स्वपक्षे प्रतिपादयति = उत्क्षेपणादिष्विति = यथा सर्वे उत्क्षेपणादयः कर्मप्रत्ययवन्तः सन्ति। कर्म च चलनात्मकप्रत्ययः, तेषु गमनप्रत्ययाविशेषात् गमनप्रत्ययस्याभेदात् कर्मत्वपर्याय एव गम्यतेऽवगम्यते। यतः यस्मात् कारणात् उत्क्षेपणापक्षेपणादयः विशेषसंज्ञयाऽभिहितम् ऊर्ध्वं गच्छति, अधो गच्छति मूलदेशं गच्छति तिर्यग्गच्छतीति पृथक् पृथक् उक्ताः। एवं गमनमपि विशेषसंज्ञया पृथक् अभिहितम् कथितम् तस्मात् अपरसामान्यं गमनमितिस्यात् भूयात्। एतत्संशयं मुनिः स्वयं निराकुरुते। नेति = उपरितनः संशयो न सम्पादनीयः। कर्मत्वपर्यायत्वात् गमनत्वस्य कर्मत्वपर्याय प्रतिपादनात्। यथा आत्मत्वस्य पर्यायः पुरुषत्वं तथा कर्मत्वस्य पर्यायो गमनत्वमिति। यदि कर्मत्वपर्यायो गमनत्वं तर्हि गमनत्वस्य पृथक्प्रतिपादनेन किं सिद्धमिति प्रश्नमाह ॥ विशेषेति = यदि गमनत्वं कर्मपर्याय एव, तर्हि गमनग्रहणं पृथक्कृतः समग्नाहि सूत्रकृता इति ॥

मू = अथ गमनत्वं किं कर्मत्वपर्यायः आहोस्विदपरं सामान्यमिति। कुतस्ते संशयः। समस्तेषूत्क्षेपणादिषु कर्मप्रत्ययवद्गमनप्रत्ययाऽविशेषात् कर्मत्वपर्याय इति गम्यते। यतस्तूत्क्षेपणादिवद्विशेषसंज्ञयाऽभिहितं तस्मादपरं सामान्यं स्यादिति। न, कर्मत्वपर्यायत्वात्। आत्मत्वपुरुषत्ववत्कर्मत्वपर्याय एव गमनत्वमिति। विशेषसंज्ञया किमर्थं गमनग्रहणं कृतमिति। न, भ्रमणाद्यवरोधार्थत्वात्। उत्क्षेपणादिशब्दैरनवरुद्धानां भ्रमणपतनस्पन्दनादीनामवरोधार्थं गमनग्रहणं कृतमिति। अन्यथा हि यान्येव चत्वारि विशेषसंज्ञयोक्तानि तान्येव सामान्यविशेषसंज्ञाविषयाणि प्रसज्येरन्निति ॥

उत्तरमाचष्टे। नेति = गमनत्वपृथक्स्वीकारे यो दोषो भवताऽभ्यधायि स न भवति। भ्रमणाद्यवरोधार्थत्वात् भ्रमणादीनाम् अवरोधार्थत्वात् यथा भ्रमणादयोऽपि स्वीक्रियेरन् तथाग्रहणात्। उत्क्षेपणापक्षेपणादिशब्दैः इदमुत्क्षेपणमिदमपक्षेपणमित्यादिशब्दैः अनवरुद्धानाम् अगृहीतानां भ्रमणादीनाम् अवरोधार्थं स्वीकारार्थं गमनग्रहणं कृतमिति। अन्यथा, यदि गमनग्रहणं न क्रियेत तदा यानि एव चत्वारि उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणानि विशेषसंज्ञयोक्तानि विशिष्टसंज्ञाप्रतिपादितानि सन्ति। तान्येव उत्क्षेपणादीनि सामान्यविशेषसंज्ञाविषयाणि सामान्यसंज्ञा कर्मत्वं विशेषसंज्ञा उत्क्षेपणत्वादिसंज्ञा, तथाभूतानि प्रसज्येरन् प्राप्नुयुः, अतः भ्रमणादीनि कर्माणि लोकप्रसिद्धानि अतस्तत्परिग्रहार्थं पृथक् गमनग्रहणं कृतमिति ॥

गमनत्वस्य जात्यन्तरत्वमस्तु ॥ अथवेति = अथवा यद्वा गमनत्वम् अपरं सामान्यं अभिन्नजातित्वमस्तु । अनियतदिग्देशसंयोगविभाग
कारणेषु अनियतः अनिश्चितः दिशां देशानां वा संयोगो वा विभागो वा यत्र तयोः अनियतदिग्देशविभागयोः कारणं तेषु भ्रमण
दिषु आदिशब्दात् पतनादयः गृह्यन्ते तेष्वेव गमनत्वं वर्तते विद्यते । उत्क्षेपणादिषु गमनशब्दो भाक्तः औपचारिकः द्रष्टव्यः अव
लोकनीयः । तत्र हेतुमाह स्वाश्रयसंयोगविभागकर्तृत्वसामान्यात् = यथा गमनं स्वाश्रयस्य स्वाधिकरणस्य संयोगकृत् विभागकृ
त् च, एवमुत्क्षेपणाऽपक्षेपणद्वयोऽपि स्वाश्रयस्य संयोगविभागौ विदधाति, एतावत्कर्मसाधर्म्यादुत्क्षेपणादिषु गमनव्यवहारो विधी
यते इति । प्रयत्नपूर्वककर्मविधिमाह ॥ तत्रात्मेति = प्रयत्नपूर्वककर्मविधिः कथं भवतीति कथ्यते । चिकीर्षितेषु कर्तुमभि
प्रेतेषु यज्ञाध्ययनकृष्यादिषु यज्ञश्चाध्ययनञ्च कृषिश्च यज्ञाऽध्ययनकृषयः ते आदिर्येषु ते यज्ञाऽध्ययनकृष्यादयः तेषु
तेषु यज्ञाऽध्ययनकृष्यादिषु सत्सु यदा मर्त्यः हस्तं करमुत्क्षेप्तुमुच्चैः कर्तुं वाऽपक्षेप्तुं नीचैः कर्तुं मिच्छति अभिलषति, तदा

मू॰ = अथवाऽस्त्वपरं सामान्यम् । गमनत्वमनियतदिग्देशसंयोगविभागकारणेषु भ्रम
णादिष्वेव वर्तते । गमनशब्दश्चोत्क्षेपणादिषु भाक्तो द्रष्टव्यः स्वाश्रयसंयोगविभा
गकर्तृत्वसामान्यादिति । तत्रात्मवत्कर्मविधिः । कथम् । चिकीर्षितेषु यज्ञाऽध्य
यनकृष्यादिषु यदा हस्तमुत्क्षेप्तुमिच्छति, अपक्षेप्तुं वा, तदा हस्तवत्यात्मप्रदेशे
प्रयत्नः सञ्जायते तं प्रयत्नं गुरुत्वं चाऽपेक्षमाणात् आत्महस्तसंयोगाद्धस्ते कर्म
भवति, हस्तवत्सर्वशरीराऽवयवेषु पादादिषु शरीरे च ॥

तस्मिन् समये हस्तवति हस्तविशिष्टे आत्मप्रदेशे = शरीरप्रदेशे इत्यत्रात्मशब्देन शरीरमवबोध्यम् प्रयत्नः सञ्जायते उत्पद्यते
तं प्रयत्नं निमित्तकारणं गुरुत्वञ्च अपेक्षमाणात् अभिलषतः आत्महस्तसंयोगात् शरीरहस्तसंयोगात् असमवायिकारणात् हस्ते
कर्म भवति । पादादिषु पादे कर्मोत्पत्तौ पादवति आत्मप्रदेशे प्रयत्नो निमित्तकारणं, पादात्मसंयोगोऽसमवायिकारणम् । एवं
शिरसि क्रियोत्पत्तौ शिरोवदात्मप्रदेशे प्रयत्नो निमित्तकारणम् । शरीरात्मसंयोगोऽसमवायिकारणं भवति । एवं सर्वत्रोह्यम् ।
यथा च सूत्रम् " आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म " वै॰ द॰ ५।१।१।

करोत्क्षेपणमभिधाय तदधीनं मुसलोत्क्षेपणमाह ॥ तदिति = तत्सम्बद्धेषु हस्तलग्नेषु मुसलादिषु कथं कर्मोत्पत्तिर्भवति । यदा यस्मिन्काले हस्तेन करेण मुसलं मुसलं गृहीत्वाऽऽदायं हस्तेन मुसलम्॥ उत्क्षिपामि उच्चैः करोमि, इतीच्छां करोति, तदनन्तरं तस्याः इच्छायाः अनन्तरम् हस्तमुसलयोः युगपदुत्क्षेपणेच्छातः प्रयत्नः उत्पद्यते उद्भवति, तं प्रयत्नं निमित्तकारणमपेक्षमाणाद् अपेक्षां कुर्वतः आत्महस्तसंयोगात् शरीरहस्तसंयोगात् असमवायिकारणात् यस्मिन् समये हस्ते उत्क्षेपणकर्म उत्पद्यते जायते, तदा हस्तमुसलसंयोगात् असमवायिकारणात् मुसलेऽपि कर्म क्रिया भवति । यथा च सूत्रम् । "तथा हस्तसंयोगात् मुसले कर्म,, वै० द० ५।१।२ ततस्तदनन्तरं मुसले दूरं विप्रकृष्टस्थाने मुत्क्षिप्ते सति तदर्थेच्छा उत्क्षेपणेच्छा निवर्तते दूरी भवति । पुनरपि भूयोऽपि अपक्षेपणेच्छा मुसलस्य अपक्षेपणेच्छा उत्पद्यते सञ्जायते । तदनन्तरम् अपक्षेपणेच्छायाः अनन्तरं प्रयत्नः जायते, तं प्रयत्नं निमित्तकारणमपेक्षमाणात् यथोक्तात् पूर्वप्रकारकथितात् संयोगात् आत्महस्तसंयोगात् हस्तमुसलसंयोगाच्च हस्तमुसलयोः युगपत् समकालमेव अपक्षेपकर्मणी भवतः ।

मू० = तत्सम्बद्धेष्वपि कथम् । यदा हस्तेन मुसलं गृहीत्वेच्छां करोति उत्क्षिपामि हस्तेन मुसलमिति, तदनन्तरं प्रयत्नस्तमपेक्षमाणात् आत्महस्तसंयोगाद्यस्मिन्नेव काले हस्ते उत्क्षेपणकर्मोत्पद्यते, तस्मिन्नेव काले तमेव प्रयत्नमपेक्षमाणाद्धस्तमुसलसंयोगान्मुसलेऽपि कर्मेति । ततो दूरमुत्क्षिप्ते मुसले तदर्थेच्छा निवर्तते, पुनरप्यपक्षेपणेच्छोत्पद्यते, तदनन्तरं प्रयत्नस्तमपेक्षमाणाद्यथोक्तात् संयोगाद्धस्तमुसलयोर्युगपदपक्षेपणकर्मणी भवतः । ततोऽन्त्येन मुसलकर्मणोलूखलमुसलयोरभिघाताख्यः संयोगः क्रियते । स संयोगो मुसलगतवेगमपेक्षमाणोऽप्रत्ययं मुसले उत्पतनकर्म करोति ॥

ततोऽपक्षिप्तस्य मुसलस्य अन्त्येन अन्ते भवः अन्त्यः तेन अन्त्येन मुसलकर्मणा, मुसलप्रहारकर्मणा उलूखलमुसलयोः अभिघाताख्यः ताडनाख्यः संयोगः क्रियते विधीयते अर्थात् उलूखलमुसलसमवेतः मुसलोत्पतनहेतुः संयोगः क्रियते इति भावः । सः मुसलोत्पतनहेतुसंयोगः मुसलगतवेगं मुसलप्राप्तवेगाख्यं संस्कारम् अपेक्षमाणः अपेक्षां कुर्वन् अप्रत्ययम् अप्रयत्नपूर्वकं प्रत्ययं मुसले उत्पतनकर्म करोति । इत्यत्र "मुसलं समवायिकारणम् । उलूखलाऽभिघातोऽसमवायिकारणम् । वेगो निमित्तकारणम् । यथा च सूत्रम् "अभिघातजे मुसलादौ कर्मणि व्यतिरेकादकारणं हस्तसंयोगः,, वै० द० ५।१।३ ।

अपरमपि विविनक्ति॥"तत्कर्मेति तत्कर्म, तदुत्पतनकर्म स्वकारणमभिघाताख्यं संयोगमपेक्षमाणं मुसले संस्कारं वेगाख्यं संस्कारम् आरभते। तं वेगाख्यसंस्कारं मुसलहस्तसंयोगोऽसमवायिकारणभूतः अप्रत्ययम् अप्रयत्नपूर्वकं कर्म हस्तेऽपि उत्पतनकर्म करोति विधत्ते। यद्यपि प्राक्तनः पूर्वतनः संस्कारः वेगाख्यः संस्कारः विनष्टः विनाशं प्राप्तः। तथापि मुसलोलूखलयोः मुसलस्य उलूखलस्य च यः संयोगः पटुकर्मोत्पादकः पटुकर्म वेगाख्यसंस्कारकर्म तस्योत्पादकः जनको भवति। तत्र हेतुमाह। संयोगविशेषभावात् संयोगगुणविशेषसत्वात्। तस्य उत्पतनकर्मणः संस्कारारंभे संस्कारस्य वेगाख्यसंस्कारस्य आरंभे कर्तव्ये साचिव्यसमर्थः साहाय्यशक्तः सचाऽभिघातः भवति। इत्यत्र हस्तमुसलादिसंयोगोऽसमवायिकारणं वेगाख्यसंस्कारो निमित्तकारणम्। यथा च सूत्रम् "अभिघातान्मुसलसंयोगाद्धस्ते कर्म" वै॰द॰५।१।५ पुनरुत्पतनकर्मणि प्रकारान्तरमाह॥ अथवेति = अथवा यद्वा प्राक्तनः पूर्व एव पटुः संस्कारः वेगाख्यः संस्कारः अभिघातात् "येन संयोगविशेषेण जनिते कर्म संयोगिनोरुभयोः परस्परं विभागं करोति स्वयञ्चोत्पद्यन् शब्दमुत्पा

मू॰ तत्कर्म अभिघातापेक्षं मुसले संस्कारमारभते तमपेक्ष्य मुसलहस्तसंयोगोऽप्रत्ययं हस्तेऽप्युत्पतनकर्म करोति। यद्यपि प्राक्तनः संस्कारो विनष्टस्तथापि मुसलोलूखलयोः संयोगः पटुकर्मोत्पादकः संयोगविशेषभावात्। तस्य संस्कारारंभे साचिव्यसमर्थो भवति। अथवा प्राक्तन एव पटुः संस्कारोऽभिघातादविनश्यन्नवस्थित इति। अतः संस्कारवति पुनः संस्कारारंभो नास्तीति यस्मिन् काले संस्कारापेक्षादभिघातादप्रत्ययं मुसले उत्पतनकर्म, तस्मिन्नेव काले तमेव संस्कारमपेक्षमाणात् मुसलहस्तसंयोगादप्रत्ययं हस्तेऽप्युत्पतनकर्मेति॥

दयति सोऽभिघातः" तस्मात् अविनश्यन् नाशमप्राप्नुवन् अवस्थितः तिष्ठति विशेषकारणोत्पत्तेः अतिवीर्यवान् संस्कारः स्पर्शवत् संयोगेन न प्रणश्यति। अतोऽस्मात्कारणात् संस्कारवति प्राक्तनसंस्कारवति मुसले पुनरभिनवः संस्कारारंभः संस्कारान्तरारंभो नास्ति पूर्वसंस्कारशान्तेः। यस्मिन् काले यस्मिन् समये संस्कारापेक्षात् संस्कारस्य अपेक्षाऽस्ति यत्र तथाभूतात् अभिघातात् अप्रत्ययं प्रयत्नरहितं मुसले उत्पतन कर्म उत्पद्यते। तस्मिन्नेव काले तस्मिन्नेव समये तं संस्कारम् अपेक्षमाणात् अपेक्षां कुर्वतः मुसलहस्तसंयोगात् मुसलहस्तयोः संयोगात् अप्रत्ययं प्रयत्नरहितं हस्तेऽपि उत्पतन कर्म भवति। यदा मुसले कर्म, तदा तत्संयुक्ते हस्तेऽपि कर्म। किं बहुना। "यथा मुसले उत्पतति मुसलमुपस्थमयः उद्गच्छति तथा हस्तोऽप्युत्पतति। अवशः करो मुसलेन सह उत्पततीति भावः॥

हस्तमुक्ते इत्यादौ गमनविधिमाह "पाणिमुक्तेष्विति = पाणिमुक्तेषु हस्तपरिच्युतेषु तोमरादिद्रव्येषु गमनविधिः गमनप्रकारः कथं भवतीति प्रश्नः। तत्रोत्तरमाह "यदेति = यदा यस्मिन् समये हस्तेन तोमरं लोहदण्डमस्त्रविशेषं गृहीत्वाऽऽदाय उत्क्षेप्तुम् उच्चैः निरसितुम् इच्छा उत्पद्यते। तदनन्तरं तस्या इच्छायाः उत्पत्त्यनन्तरं प्रयत्नः जायते। तं प्रयत्नं निमित्तकारणमपेक्षमाणाद् भिलषतः यथोक्तात् पूर्वकथितप्रकारात् संयोगद्वयात् संयोगद्वयं शरीरहस्तसंयोगः, हस्ततोमरसंयोगश्च एतद्द्वयात् तोमरहस्तयोः तोमरस्य हस्तसंयोगवतः तोमरस्य हस्तस्य च शरीरसंयोगवतो हस्तस्य च युगपत् एकस्मिन्नेव काले आकर्षणकर्मणी आकर्षणक्रिये भवत इति। हस्ते प्रसारिते तदाकर्षणार्थः। तस्य हस्तस्य तोमरस्य च समाकर्षणहेतुकः प्रयत्नो निवर्तते दूरीभवति। तदनन्तरं हस्तप्रसारणानन्तरं तिर्यग् उत्क्षिपामि, ऊर्ध्वमुत्क्षिपामि, दूरमुत्क्षिपामि आसन्नं समीपमुत्क्षिपामि इत्येवंविधे इच्छा सञ्जायते उत्पद्यते। तदनन्तरं तस्या इच्छाया उत्पत्त्यनन्तरं तदनुरूपः इच्छाधीनः प्रयत्नः उत्पद्यते। यथा ऊर्ध्वेच्छायामूर्ध्वक्षेपणप्रयत्नः तिर्यगिच्छायां तिर्यक्क्षेपणप्रयत्नो जायते। एवमत्रेऽपि चिन्त्यम्। तमिच्छाऽनुरूपं प्रयत्नमपे

मू = पाणिमुक्तेषु गमनविधिः कथम्। यदा तोमरं हस्तेन गृहीत्वोत्क्षेप्तुमिच्छोत्पद्यते तदनन्तरं प्रयत्नस्तमपेक्षमाणाद्यथोक्तात् संयोगद्वयात्तोमरहस्तयोः युगपदाकर्षणकर्मणी भवतः। प्रसारिते च हस्ते तदाकर्षणार्थः प्रयत्नो निवर्तते, तदनन्तरं तिर्यगूर्ध्वं दूरमासन्नं वा क्षिपामीतीच्छा संजायते, तदनन्तरं तदनुरूपः प्रयत्नस्तमपेक्षमाणस्तोमरहस्तसंयोगो नोदनाख्यः, तस्मात्तोमरे कर्मोत्पन्नं नोदनाऽपेक्षं तस्मिन् संस्कारमारभते

क्षमाणोऽभिलषन् तोमरहस्तसंयोगः तोमरस्य हस्तस्य च यः संयोगो नोदनाख्यः संयोगसम्बन्धविशेषो नोदनं यद्वा "गुरुत्वद्रवत्ववेगादीन् समस्तान् व्यस्तान् वा गुणान् अपेक्षमाणो नोद्यनोदकयोः संयोगिनोः उभयोः अविभागकृतः कर्मणः कारणं यः संयोगविशेषः स नोदनमित्युच्यते", नोद्यं तोमरं नोदकः हस्तः, तयोः सहगामित्वात्। तस्मात् नोदनाख्यात् यथोक्तात् इच्छाऽधीनप्रयत्नाऽपेक्षात् तोमरे कर्मोत्पन्नं तत् कर्म नोदनाऽपेक्षं तस्मिन् तोमरे संस्कारं वेगाख्यं संस्कारमारभते। इत्यत्र समवायिकारणं तोमरं, नोदनमसमवायिकारणं, प्रयत्नो निमित्तकारणम्। यथा च सूत्रम् "प्रयत्नविशेषान्नोदनविशेषः" वै·द·५।१।८। "नोदनविशेषादुदसनविशेषः" वै·द·५।१।१०,

ततः किं भवतीत्याह ॥ तत इति = ततस्तदनन्तरं संस्कारः वेगो नोदनं संयोगसम्बन्धविशेषः ताभ्यां तावत्पर्यन्तं कर्माणि वेग-
कर्माणि भवन्ति, यावत्पर्यन्तं हस्तस्य तोमरस्य च विभागो भवतीति । ततस्तदनन्तरं विभागात् तोमरविभागमात्रात् नोदने संस्कारे

मू- ततः संस्कारनोदनाभ्यां तावत्कर्माणि भवन्ति यावद्धस्ततोमरविभागः
इति, ततो विभागान्नोदने निवृत्ते संस्कारादूर्ध्वं तिर्यग्दूरमासन्नं वा
प्रयत्नाऽनुरूपाणि कर्माणि भवन्त्यापतनादिति ॥

निवृत्ते दूरीभूते सति संस्कारात् वेगाख्यसंस्कारात् प्रयत्नाऽनुकूलम् ऊर्ध्वप्रयत्नः ऊर्ध्वं तिर्यक्प्रयत्नः तिर्यक् दूरप्रयत्ने दूरं समीप
प्रयत्ने समीपं वाऽऽपतनात् तोमरपतनपर्यन्तं तत्तत्प्रयत्नाऽनुकूलानि कर्माणि भवन्ति इति ॥ श्री:

श्री: श्री: श्री:

यंत्रमुक्ते वस्तुनि गमनविधिः कथम्। तथेति = यथा हस्तमुक्तगमनप्रकारं प्रपृच्छ, तथा तेनैव प्रकारेण पृच्छति यंत्रमुक्तेषु धनुरादिभ्यः परिच्युतेषु गमनविधिः गमनप्रकारः कथं केन प्रकारेण भवतीति प्रश्नः। तत्रोत्तरमाह ॥ य इति = कृतव्यायामः - कृतः शिक्षितः व्यायामः अस्त्राभ्यासो येन तथाभूतः बलवान् बलसंयुक्तः यः पुरुषः वामेन करेण हस्तेन धनुश्चापं विष्टभ्य प्रबलं गृहीत्वा दक्षिणेन अपसव्येन करेण शरं बाणं सन्धाय गुणे धारयित्वा सशरां बाणसहितां ज्यां मौर्वीं मुष्टिना गृहीत्वा सज्येषु ज्या मौर्वी इषुर्बाणः ताभ्यां सह वर्तते इति सज्येषु तथाभूतमेव धनुः चापं आकर्षयामि आकर्षणं करोमि इति आकर्षणेच्छुः आकर्षणस्याकाङ्क्षां करोति विधत्ते। तदनन्तरं तस्या इच्छाया उत्पत्त्यनन्त

मू = तथा यंत्रमुक्तेषु गमनविधिः कथम्। यो बलवान् कृतव्यायामो वामेन करेण धनुर्विष्टभ्य दक्षिणेन शरं सन्धाय सशरां ज्यां मुष्टिना गृहीत्वा आकर्षणेच्छुः करोति सज्येषु आकर्षयाम्येतद्धनुरिति। तदनन्तरं प्रयत्नस्तमपेक्षमाणादात्महस्तसंयोगादाकर्षणकर्म हस्ते यदैवोत्पद्यते, तदैव तमेव प्रयत्नमपेक्षमाणाद्धस्तज्याशरसंयोगाज्ज्यायां शरे च कर्म, प्रयत्नविशिष्टहस्तज्याशरसंयोगमपेक्षमाणाभ्यां ज्याकोटिसंयोगाभ्यां कर्मणी भवतो धनुष्कोट्योः।

प्रयत्नः निमित्तकारणभूतः उत्पद्यते। तदैव तस्मिन् एव समये तमेव प्रयत्नमपेक्षमाणात् प्रयत्नमभिलषतः आत्महस्तसंयोगात् आत्मनः शरीरस्य हस्तस्य करस्य च संयोगात् यदा यस्मिन् काले हस्ते करे आकर्षणकर्म आकृष्टिकर्म जायते उत्पद्यते। तदैव तस्मिन्नेव काले तमेव प्रयत्नमपेक्षमाणात् तमेव प्रयत्नमभिलषतः हस्तज्याशरसंयोगात् हस्तस्य, ज्यायाः, शरस्य च त्रयाणामिति भावः संयोगात् ज्यायां गुणे मौर्व्यां वा शरे बाणे कर्म जायते। प्रयत्नविशिष्टहस्तज्याशरसंयोगम्, प्रयत्नविशिष्टो हस्तः प्रयत्नविशिष्टा ज्या, प्रयत्नविशिष्टः शरस्तेषां संयोगमपेक्षमाणाभ्यामभिलषद्भ्यां ज्याकोटिसंयोगाभ्याम् ज्यायाः मौर्व्याः धनुष्कोट्योश्च यः संयोगः ताभ्यां धनुष्कोट्योः धनुरन्तभागयोः कर्मणी क्रिये भवत इत्येतत्सर्वं हस्तज्यादिकर्म युगपत्समकालमेव भवति कारणैक्यात् ॥ श्रीः

अत्र किं भवतीत्याचष्टे ॥ एवमिति = एवम्प्रकारेण आकर्णात् कर्णपर्यन्तं धनुषि चापे आकृष्टे सति, अतःपरं एतदाकर्षणादधिकमनेन
हस्तेन गन्तव्यम् इति यत् ज्ञानं विचारः विवेकः भवति। ततस्तस्मात् आकर्षणार्थस्य धनुराकर्षणस्य प्रयत्नस्य उद्योगस्य विनाशः प्रध्वंसः
ततस्तदनन्तरं पुनर्भूयः मोक्षणेच्छा शरगुणयोर्मोक्षणस्य इच्छा सञ्जायते उत्पद्यते। ततो मोक्षणेच्छाया मुत्पन्नायां प्रयत्नः मोक्षणार्थः प्रयत्नः
जायते तं प्रयत्नं निमित्तकारणमपेक्षमाणात् अपेक्षां कुर्वतः आत्माङ्गुलिसंयोगात् *आत्मनः शरीरस्य अङ्गुल्याश्च यः संयोगः, तस्मादङ्गुलिकर्म
तस्मात् कर्मणः ज्याङ्गुलिविभागः, ज्यायाः अङ्गुल्याश्च विभागो जायते। ततो विभागात् तस्माद्विभागात् संयोगविनाशः शरगुणाङ्गुलिसंयोग
विनाशः तस्मिन् संयोगे विनष्टे विनाशं प्राप्ते सति प्रबन्धकाऽभावात् प्रतिबन्धकस्य विनाशकस्याभावात् यदा यस्मिन् समये धनुषि चापे
वर्तमानः विद्यमानः स्थितिस्थापकः संस्कारः मण्डलीभूतं गोलाकारवद्यथास्थितं धनुश्चापं स्थापयति स्वच्छीकरोति तदा तस्मिन्नेव समये
तमेव संस्कारं स्थितिस्थापकमेव संस्कारमपेक्षमाणात् आकांक्षां कुर्वतः, धनुर्ज्यासंयोगात् धनुषः संयोगात् ज्यासंयोगात् च ज्यायां
यां शरे च कर्म क्रिया उत्पद्यते आविर्भवति। तत् तत्कर्म स्वकारणाऽपेक्षं स्वकारणाऽनुवर्ति धनुर्ज्यासंयोगाऽनुकूलमिति भावः ज्यायां संस्कारं

मू = एवमाकर्णादाकृष्टे धनुषि नाऽतःपरमनेन गन्तव्यमिति यज्ज्ञानं ततस्तदाकर्षणार्थस्य
प्रयत्नस्य विनाशस्ततः पुनर्मोक्षणेच्छा संजायते तदनन्तरं प्रयत्नस्तमपेक्षमाणादा
त्माङ्गुलिसंयोगादङ्गुलिकर्म, तस्माज्ज्याङ्गुलिविभागः, ततो विभागात् संयोगवि-
नाशः तस्मिन् विनष्टे प्रतिबन्धकाऽभावाद्यदा धनुषि वर्तमानः स्थितिस्थाप
कः संस्कारो मण्डलीभूतं धनुर्यथाऽवस्थितं स्थापयति, तदा तमेव संस्कारमपे-
क्षमाणाद्धनुर्ज्यासंयोगाज्ज्यायां शरे च कर्मोत्पद्यते, तत्स्वकारणाऽपेक्षं ज्यायां
संस्कारं करोति, तमपेक्षमाण इषुज्यासंयोगो नोदनं तस्मादिषावाद्यं कर्म नोद
नाऽपेक्षमिषौ संस्कारमारभते ॥

वेगाख्यसंस्कारं करोति तं वेगसंस्कारमपेक्षमाणः अभिलषन् इषुसंयोगो ज्यासंयोगश्च नोदनं संयोगसम्बन्धविशेषो भवति।
तस्मात् नोद्यस्य इषोः नोदकस्य गुणस्य सहगतिहेतुत्वात् नोदनात् इषौ बाणे आद्यं कर्म, नोदनाऽपेक्षमिषौ संस्कारं वेगाख्यसं-
स्कारमारभते। यथा च सूत्रम् "नोदनाद्यमिषोः कर्म, तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरश्च" वै. द.
५।१।१७ ॥

*संस्काराऽभावे गुरुत्वात् पतनम्, वै॰द॰ ५।१।१८

ततः किं भवतीत्याह ॥ तस्मादिति = तस्मात् नोदनसहायात् नोदनं संयोगसम्बन्धविशेषः सहायो यस्य तथाभूतात् संस्कारात् वेगसंस्कारात् तावत् तावत्पर्यं कर्माणि क्रियाः भवन्ति, यावत् यावत्पर्यन्तं इषुज्याविभागेषु इषोः बाणस्य ज्यायाश्च मौर्व्याश्च विभागः पार्थक्यं भवति विभागात् इषुज्याविभागात् नोदने निवृत्ते शान्ते सति आपतनात् बाणपतनपर्यन्तं इषुसंस्कारात् इषुवेगाख्यसंस्कारात् एवोत्तरोत्तराणि द्वितीयं तृतीयं चतुर्थमित्यादि कर्माणि भवन्तीति । इत्यत्र समवायिकारणमिषुः, असमवायिकारणं प्राथमिकः संस्कारः, निमित्तकारणं प्रयत्नो गुरुत्वञ्च वै॰द॰ सूत्रं पूर्वं लिप्तमेव ५।१।१७* पूर्वपक्षमाह ॥ बहूनीति = ज्याविमुक्तस्य इषोर्मध्ये क्रमशः यथाक्रमं बहूनि अनेकानि कर्माणि क्रियाः कस्माद्धेतोर्जायन्ते । सिद्धान्तमाह ॥ संयोगेति = संयोगबहुत्वात् प्रक्षिप्तस्य वस्तुनो मध्ये बहवः संयोगः अवलोक्यन्ते तस्मात् बहूनि कर्माणि भवन्ति । संस्कारस्तु तत्र एक एव भवति, सर्वदा नोदनाभिघातयोरन्यतराऽपेक्षं कर्म संस्कारमारभते न कर्ममात्रम् । अन्तराले प्रक्षिप्तवस्तुमध्येऽपेक्षाकारणं नास्ति । गमनमध्ये न नोदनस्याऽऽवश्यकता, नवाऽभिघातस्य तस्मादेक एव संस्कारः प्रथमे आपतनं

मू॰ = तस्मात्संस्कारान्नोदनसहायात्तावत्कर्माणि भवन्ति यावदिषुज्याविभागो विभागान्निवृत्ते नोदने कर्माण्युत्तरोत्तराणि इषुसंस्कारादेवापतनादिति । बहूनि कर्माणि क्रमशः कस्मात् । संयोगबहुत्वात् । एकस्तु संस्कारोऽन्तराले कर्मणोऽपेक्षाकारणाभावादिति । एवमात्माऽधिष्ठितेषु सत्प्रत्ययमसत्प्रत्ययञ्च कर्मोक्तम् । अनधिष्ठितेषु बाह्येषु चतुर्षु महाभूतेषु अप्रत्ययं कर्म गमनमेव नोदनादिभ्यो भवति ।

भवति, नाऽपरेषां संस्काराणामाऽऽवश्यकता कर्मवदिति । स्वकृत्यमुपसंहरति ॥ एवमिति = एवं पूर्वोक्तप्रकारेण आत्माऽधिष्ठितेषु जीवाश्रितेषु शरीराश्रितेषु वा सत्प्रत्ययं कर्म प्रयत्नपूर्वकं गमनकर्म, असत्प्रत्ययञ्च कर्म अप्रयत्नपूर्वकं गमनकर्मोक्तं सम्यक्तया प्रत्यपादि । जीवभिन्नेषु अपि गमनकर्म भवति न वा तत्राह ॥ अनधिष्ठितेष्विति = अनधिष्ठितेषु आत्मनाऽनधिष्ठितेषु अनाश्रितेषु चतुर्षु महाभूतेषु पृथिवीजलतेजोवायुषु अप्रत्ययं कर्म अप्रयत्नपूर्वकं गमनमेव कर्म नोदनादिभ्यः नोदनाऽभिघाताभ्यां भवति नोत्क्षेपणाऽपक्षेपणादिकं कर्म जायते इति ॥ श्रीः

श्रीः

श्रीः श्रीः श्रीः

नोदनस्वरूपमाह "तत्रेति = तत्र तस्मिन् गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तव्यस्तान् समस्तानेकदैवापेक्षते यद्वा व्यस्तान् विभक्तान् पृथक्पृथग् इत्यर्थः। यः संयोगविशेषः गुरुत्वं वा द्रवत्वं वेगं प्रयत्नं वाऽपेक्षते तन्नोदनं, तन्नोदनमविभागहेतोः अविभागकृतः कर्मणः कारणमेव भवति। संयोगिनोरुभयोः मिथो न विभागकृदिति भावः। तस्मात् नोदनात् चतुर्षु चतुःसंख्याकेषु महाभूतेषु पृथिव्यप्तेजोवायुषु कर्म क्रिया भवति। पृथिव्यां यथा = यथा येन प्रकारेण पंकाख्यायां पङ्कवत्यां भूमौ स्थापितं पाषाणं सपङ्कमधो याति, तदा गुरुत्वविशिष्टपाषाणपङ्कसंयोगो नोदनमेव, प्रयत्नेनोच्चैः कृत्य पाषाणेनाभिहन्यते यदा, तदा गुरुप्रयत्नवेगा[redacted]पेक्षैः संयोगो नोदनं जलेनाहन्यमानः समस्ताऽपेक्षः संयोगो नोदनमेवेति। इत्यत्र पङ्कः समवायिकारणम्, नोदनमसमवायिकारणम् गुरुत्वं निमित्तकारणम्। यथा च सूत्रम् "नोदनाऽभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म,, वै· द· ५।२।१ अभिघातस्वरूपमाचष्टे। वेगेति = वेगापेक्षः वेगाख्यसंस्कारमपेक्ष्य यः संयोगविशेषः अभिघात्याभिघातकयोः मिथः विभागकारणस्य एकस्य कर्मणः कारणं हेतुर्भवति सोऽभिघातः तस्मादभिघातादपि चतुर्षु भूम्यप्तेजोवायुषु महाभूतेषु कर्म गमनकर्म भवतीति। यथा उदाहरणम् "निष्ठुरे वस्तुनि कठिनवस्तूपरि पाषाणकुठारादिषु अभिपतितेषु अभिघातात् कर्म सञ्जायते इत्यत्र कठोरवस्तु समवायिकारणमभिघातोऽसमवायिकारणं, गुरुत्ववेगादयो निमित्तकारणमिति। तथा तेन प्रकारेण पादादिभिः, पादहस्तादिभिः नुद्यमानायां संयोगसम्बन्धविशिष्टायाम् अभिहन्यमानायाम् अभिघातवत्यां पङ्काख्यायां पङ्किलायां वा पृथिव्यां नोदनाभिघातयोः अन्यतराऽपेक्षः उभयाऽपेक्षो वा = नोदनमपेक्ष्य अभिघातं नाऽपेक्ष्य नोदनाभिघातौ वाऽपेक्ष्य यः संयोगो वर्तते सः संयुक्तसंयोगः कर्मजन्यसंयोग इति यावत्, तस्मात् संयुक्तसंयोगात् पृथिव्यादिचतुर्षु गमनकर्म भवतीति, यथाऽश्वसंयुक्ता या रज्जुः, तया युक्ते रथे गमनकर्म प्रदृश्यते। यथा च सूत्रम् "नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म,, वै· द· ५।२।१ "पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम्" वै· द· ५।२।१२"

मू = तत्र नोदनं गुरुत्वद्रवत्ववेगप्रयत्नान् समस्तव्यस्तान् अपेक्षमाणो यः संयोगविशेषो नोदनमविभागहेतोः एकस्य कर्मणः कारणम्। तस्माच्चतुर्ष्वपि महाभूतेषु कर्म भवति। यथा पंकाख्यायां पृथिव्याम्। वेगाऽपेक्षो यः संयोगविशेषो विभागहेतोरेकस्य कर्मणः कारणं सोऽभिघातः। तस्मादपि चतुर्षु महाभूतेषु कर्म भवति। यथा पाषाणादिषु निष्ठुरे वस्तुन्यभिपतितेषु। तथा पादादिभिर्नुद्यमानायामभिहन्यमानायां वा पङ्काख्यायां पृथिव्यां यः संयोगो नोदनाभिघातयोरन्यतराऽपेक्षः उभयाऽपेक्षो वा सः संयुक्तसंयोगः पृथिव्यादिषु कर्म भवति॥

नोदनाभिघातरहितेष्वपि वस्तुषु संयुक्तसंयोगात् कर्म भवति॥ य इति= ये च प्रदेशाः स्थानानि हस्तपादादिभिः न नुद्यन्ते न प्रेर्यन्ते न वाऽभिहन्यन्ते तेषु प्रदेशेषु अपि गमनकर्म जायते। यथा सति भूकम्पे तत्स्था भूधरादयोऽपि गतिमन्तोऽवगम्यन्ते इति। गुरुत्वस्य कर्मकारणत्वमाह पृथिवीति= पृथिव्युदकयोः पृथिव्याम् उदके जले च गुरुत्वविधारकसंयोगप्रयत्नवेगाऽभावे सति, गुरुत्वस्य विधारकः धारकः यः संयोगः यः प्रयत्नः यश्च वेगः, तस्याभावे सति गुरुत्वस्थापकप्रयत्नेऽविद्यमाने इतिभावः गुरुत्वविधारके वेगेऽसतीतिभावश्च। गुरुत्वात् गुरुत्वसम्बन्धात् अधोगमनं स्वस्थानादधोगतिः, तत्पतनं भवति। परञ्च पाश्चात्याः मरुति अपि गुरुत्वं संगिरन्तेऽनुभावयन्ति च [redacted] वायुपूर्णपादकन्दुकप्रतोलनेन। वायुरहितस्य पादकन्दुकस्य भारः अन्य भवति। वायुपरिपूर्णस्य पादकन्दुकस्य भारोऽन्य इति, तद्भ्रम एव, यतः पादकन्दुके भारः प्रतीयते स च वायुमिश्रितपार्थिवजलीयपरमाणुद्व्यणुकादीनां भार एवः, न तु वायोः। तथा च सूत्रम् "संयोगाऽभावे गुरुत्वात्पतनम्" वै० द० ५।१।७ "संस्काराऽभावे गुरुत्वात् पतनम्" वै० द० ५।१।१८ उदाहरणमाह॥ यथा असति हस्तसंयोगे

मू= ये च प्रदेशा न नुद्यन्ते नाऽप्यभिहन्यन्ते तेष्वपि कर्म जायते। पृथिव्युदकयोः गुरु
त्वविधारकसंयोगप्रयत्नवेगाऽभावे सति गुरुत्वादधोगमनं तत्पतनम्। यथा
मुसलशरीरादिपतनम्। तत्राद्यं गुरुत्वाद्द्वितीयादीनि तु गुरुत्वसंस्काराभ्याम्। स्रो-
तोभूतानामपां स्थलान्निम्नाभिसर्पणं यत्तद्द्रवत्वात्स्यन्दनम्।

गुरुत्वोऽवरोधकस्य यदधोगमनं मुसलस्य तत्पतनं गुरुत्वाद्भवति। प्रयत्नेऽविद्यमाने भवति यत्पतनं शरीरस्य, तद्गुरुत्वात्। प्रक्षिप्तस्य बाणस्य गच्छतो मध्ये क्षीणे वेगे पतनं यज्जायते तद्गुरुत्वादेव बोध्यम्। तत्र तेषु मुसलादिषु आद्यं प्रथमं गमनकर्म गुरुत्वाद्भवति। तदनु द्वितीयादीनि उत्तरकर्माणि गुरुत्ववेगाख्यसंस्काराभ्यामेवोत्पद्यन्ते इति। अप्सु गमनकर्म प्रदर्श्यते॥ स्रोत इति= स्रोतोभूतानां प्रवाहरूपभूतानाम् अपां जलानां स्थलात् स्थलदेशात् निम्नाऽभिसर्पणम् अवनतप्रदेशे चलनं तत् स्यन्दनं द्रवत्वात् जायते। इत्यत्र आपः समवायिकारणम् द्रवत्वमसमवायिकारणम्, गुरुत्वं निमित्तकारणम्॥ यथा च सूत्रम् "द्रवत्वात् स्यन्दनम्" वै० द० ५।२।३ "अपां संयोगाऽभावे गुरुत्वात् पतनम्" वै० द० ५।२।३। श्रीः श्रीः
श्रीः श्रीः श्रीः श्रीः

तत्स्पन्दने कथं भवतीत्याह ॥ कथमिति ॥ स्यन्दनं कथं भवतीति प्रश्नः समन्तात् सर्वतः रोधः संयोगेन तीरसंयोगेन अवयविद्रवत्वम् अवयविनो जलस्य द्रवत्वं द्रवीभवनं प्रतिबद्धं निरुद्धमेव । अवयवद्रवत्वम् इत्यवयविगतद्रवत्वे संरुद्धे एकार्थे समवायसम्बन्धविशिष्टमवयवगतद्रवत्वमपि तेनैव रोधःसंयोगेन प्रतिबद्धमिति । उत्तरोत्तराऽवयवद्रवत्वानि परस्परापेक्षया उत्तरोत्तराणि अवयवद्रवत्वानि जलद्रवणकादिगत द्रवत्वानि संयुक्तसंयोगैः रोधःसंयुक्ता येऽवयवाः तत्संयोगात् अवयवान्तरस्य द्रवत्वं निरुद्धं भवति अतः उत्तरोत्तरद्रवत्वानि प्रतिबद्धानि भवन्ति ॥ प्रतिरुद्धे स्रोतसि कथं द्रवत्वं जायते इत्याह ॥ यदेति = यदा यस्मिन् काले मात्रया लेशेन सेतुभेदः सेतुभङ्गः कृतो भवति, तदा तस्मिन् काले समन्तात् चतुर्दिक्षु जलं प्रतिबद्धं भवति, तस्य जलस्य प्रतिबद्धत्वात् अवयविद्रवत्वस्य अवयविनः जलस्य द्रवत्वस्य स्यन्दनस्य कार्यारम्भः कार्यस्य स्यन्दनस्यारंभः न भवति, किन्तु पूर्वं सेतुसमीपस्थस्य जलस्य छिद्रद्वारा निःसरणं भवति, अल्पे छिद्रे सञ्जाते तन्मार्गेण जले निःसृते सति उत्तरोत्तरेषामपरेषामवयवद्रवत्वानाम् असति प्रतिबन्धके वृत्तिलाभः तत्स्यन्दनकार्यकर्तृत्वं प्राप्यते इति । ततः स्यन्दनक मौनन्तरं क्रमशो यथाक्रमं संयुक्तानाम् संयोगसम्बन्धवतामभिसर्पणम् अभिगमनं भवति । ~~[illegible]~~ "पूर्वं छिद्रासन्नवर्तिनि जले

मू॰ = कथम् । समन्ताद्रोधः संयोगेनाऽवयविद्रवत्वं प्रतिबद्धम् । अवयवद्रवत्वमप्येकार्थसमवेतं तेनैव प्रतिबद्धमुत्तरोत्तराऽवयवद्रवत्वानि संयुक्तसंयोगैः प्रतिबद्धानि । यदा तु मात्रया सेतुभेदः कृतो भवति तदा समन्तात् प्रतिबद्धत्वादवयविद्रवत्वस्य कार्यारंभो नास्ति । सेतुसमीपस्थस्याऽवयवद्रवत्वस्य उत्तरोत्तरेषामवयवद्रवत्वानां प्रतिबन्धकाऽभावाद्वृत्तिलाभः । ततः क्रमशः संयुक्तानामेवाभिसर्पणं ततः पूर्वद्रव्यविनाशे सति प्रबन्धेनावस्थितैरवयवैः दीर्घं द्रव्यमारभ्यते, तत्र च कारणगुणपूर्वक्रमेण द्रवत्वमुत्पद्यते, तत्र च कारणानां संयुक्तानां प्रबन्धेन गमने यदवयविनि कर्मोत्पद्यते तत्स्यन्दनाख्यामिति ॥

निःसृते तत्संयुक्तस्य जलस्य वारं समायाति, तदनु तत्समीपस्थं निःसरति एवं सर्वेऽवयवा अभिसर्पन्ति तावत्तदभिसर्पणम् ज्ञेयं यावत्तेऽपि अवयवाः संयुक्ताः सन्ति संयोगव्यतिरिक्तानां व्यवहितानां तादृशानुकूल्येनावयवानां न कदाऽपि स्यन्दनमितितात्पर्यम् । ततस्तदनन्तरं पूर्वद्रव्यविनाशे पूर्वद्रव्यस्य विनष्टे सति प्रबन्धेन संयुक्तीभावेन अवस्थितैः स्थितिं प्राप्तैः अवयवैः दीर्घं द्रव्यमारभ्यते । तत्र च द्रव्ये कारणगुणपूर्वक्रमेण "कारणगुणाः कार्यगुणानारभन्ते" इतिन्यायेन यदि कारणद्रव्ये द्रवत्वं विद्यते तर्हि कार्ये महति द्रव्येऽपि द्रवत्वं जायते इति । तत्र च तस्मिन् द्रव्ये उत्पन्ने सति कारणानां संयुक्तानां प्रबन्धेन संयुक्तीभावेन गमनेऽभिन्नदेशतया गमने यदवयविनि जले द्रवत्वात् कर्म उत्पद्यते गमनकर्म जायते तत्स्यन्दनाख्यं कर्म भवतीति । यथा च सूत्रम् "द्रवत्वात् स्यन्दनम्" वै॰ ५।२।१४ ॥ श्री ।

वेगात् कर्म कथं भवति॥संस्कारादिति= संस्कारात् वेगसंस्कारात् इष्वादिषु बाणादिषु उत्कम् यथा कर्मोत्क्षे भवति। भ्रमणं कथं भवतीत्याह तयोरिति= यथा बाणादिषु गमनकर्म भवति तथा चक्रादिषु रथचक्रेऽपि भवति अवयवानामङ्गानां पार्श्वतः प्रतिनियतदिग्देश संयोगविभागोत्पत्तौ नियतौ यौ दिग्देशौ ताभ्यां सह यः संयोगो विभागश्च तयोः उत्पत्तौ सत्यां यदवयविनः दण्डस्य संस्कारात् वेगाख्यसंस्कारात् नियमरहितयोः दिग्देशयोः संयोगविभागनिमित्तं संयोगविभागहेतुकं यत्कर्म तद्भ्रमणमिति। पूर्वं चक्राऽवयविनि दण्डसंयोगात् कर्म, ततः उत्तरोत्तरकर्माणि भवन्ति। वेगाद्दण्डसंयुक्ते चक्राऽवयवे आद्यं कर्म, दण्डसंयोगात् अवयवान्तरेषु च संयुक्तसंयोगात् दण्डसंयुक्तस्य अवयवस्योत्तरोत्तरकर्माणि भवन्ति, इत्यादयो गमनविशेषाः सन्ति। वायौ गमनकर्म कथं भवतीत्याह॥प्राणाख्ये इति= इच्छाद्वेषपूर्वकप्रयत्नाऽपेक्षात् - इच्छाप्रयत्नः कुम्भकपूरकादि प्राणायामविधानाऽवस्थायां भवति, तदनुविधानात् अथवा द्वेषपूर्वकप्रयत्नः झंझावातोद्धृतरजसो नासिकाप्रविष्टस्य निरासे उत्पद्यते, तस्मात् आत्मवायुसंयोगात् जीवात्मवायुसम्बन्धात् प्राणाख्ये वायौ कर्म गमनकर्म भवति। जाग्रतो निद्राविरहितस्य इच्छा

मू= संस्कारात् कर्म इष्वादिषूक्तम्। तथा चक्रादिष्ववयवानां पार्श्वतः प्रतिनियतदिग्देशसंयोगविभागोत्पत्तौ यदवयविनः संस्कारादनियतदिग्देशसंयोगविभागनिमित्तं कर्म तद्भ्रमणमिति। एवमाद्यो गमनविशेषाः। प्राणाख्ये तु कर्म, आत्मवायुसंयोगादिच्छाद्वेषपूर्वकप्रयत्नाऽपेक्षाज्जाग्रतः इच्छाऽनुविधानदर्शनात् सुप्तस्य तु जीवनपूर्वकप्रयत्नाऽपेक्षात्। आकाशकालदिगात्मनां सत्यपि द्रव्यभावे निष्क्रियत्वं सामान्यादिवदमूर्तत्वात्। मूर्तिः असर्वगतद्रव्यपरिमाणम्। तदनुविधायिनी च क्रिया, सा चाकाशादिषु नास्ति तस्मान्न तेषां क्रियासम्बन्धोऽस्तीति॥

द्वेषौ भवतः अतः इच्छाऽनुविधानदर्शनात् इत्युक्तम्। सुप्तस्य निद्रागतस्य पुरुषस्य तु जीवनपूर्वकस्य प्रयत्नस्य अपेक्षा यत्रास्ति, तथाभूतात् आत्मवायुसंयोगात् प्राणाख्ये वायौ कर्म। यदि सुप्ते नरे जीवनपूर्वकः प्रयत्नो वायुसंचारे कारणं न स्यात्तदा शवेऽपि प्राणगतिरवगम्येत तत्र तु न दृश्यतेऽतो जीवनपूर्वकप्रयत्नाऽपेक्षादित्युक्तम्। यथा च सूत्रम् "पृथिवीकर्मणा तेजःकर्म वायुकर्म च व्याख्यातम्" वै•द•५।२।१२।

आकाशादिष्वपि कर्मास्ति नवा। आकाशेति= आकाशकालदिगात्मनां आकाशस्य कालस्य दिशश्च आत्मनां च द्रव्यभावे सत्यपि द्रव्यत्वे सति अपि निष्क्रियत्वं कर्मरहितत्वं सामान्यादिवदमूर्तत्वात् यथा सामान्यविशेषसमवायाः अमूर्ताः सर्वदेशव्यापिनः, तथाऽऽकाशादयोऽपि ज्ञेयाः। मूर्तिः असर्वगतद्रव्यपरिमाणम् न सर्वे द्रव्येषु प्राप्तिमती दृष्टा यत्र मूर्तित्वं दृष्टं तत्र क्रियात्वं दृष्टम्। सा च क्रियाऽऽकाशादिषु नास्ति तस्मात्तेषामाकाशकालदिगात्मनां न कर्मसम्बन्धः दृष्टः। यथा च सूत्रम् "दिक्कालावाकाशञ्च क्रियावद्वैधर्म्यान्निष्क्रियाणि" वै•द•५।२।२१।

मनसि कर्मकारणमाह ॥ सविग्रहे इति = जाग्रतो विनिद्रस्य पुरुषस्य सविग्रहे देहसंयुक्ते मनसि इन्द्रियान्तरसम्बन्धार्थम् अन्यत् इन्द्रियम् इन्द्रियान्तरम् इन्द्रियान्तरस्य सम्बन्धः इन्द्रियान्तरसम्बन्धः, इन्द्रियान्तरसम्बन्धस्यार्थम् इन्द्रियान्तरसम्बन्धार्थम् चक्षुषोऽप्रत्यक्षीकृतात् द्रव्यात् चक्षुरिन्द्रियं विहाय स्पर्शेन्द्रियसम्बन्धार्थं कर्म आत्ममनःसंयोगात् भवति। यत्र आत्ममनःसंयोगे अभीष्टवस्तुनि इच्छापूर्वकः प्रयत्नः जायते हेयवस्तुनि च द्वेषपूर्वकः प्रयत्नः उत्पद्यते तथाभूतात् इच्छाद्वेषपूर्वकप्रयत्नापेक्षात् आत्ममनःसंयोगात्। निष्कर्षोऽयमवसेयः, तस्य मनसः तत्तदिन्द्रियप्रदेशे या इयं तत्तदिन्द्रियवृत्तिप्राप्तिः तदेव सम्बन्धविशेषप्रयोजकत्वात् कर्म भवति। अन्वभिप्रायमात्मनोऽभिप्रायाऽनुरोधेन इन्द्रियान्तरेण ~~स्पर्शेन्द्रियेण स्पर्श[illegible]~~ विषयान्तरोपलब्धिदर्शनात् विषयान्तरस्योपलब्धेः अवलोकनात् यथा स्पर्शेन्द्रियेण स्पर्श ज्ञाने जाते चक्षुरादिनाऽपि अवलोकनान्तरस्य विषयोपलब्धिर्दृश्यते। रूपजिघृक्षुः रूपं गृह्णाति रसजिघृक्षुः स्वीकरोति रसम्। अन्तःकरणसम्बन्धेन एव नान्यथेति। सुप्तस्य नरस्य प्रबोधकाले ज्ञानकाले मनसि कर्म जीवनपूर्वकप्रयत्नमपेक्ष्यात्ममनसः संयोगाद्भवति नान्यथेति दिक्। यथा च सूत्रम्

मू = सविग्रहे मनसीन्द्रियान्तरसम्बन्धार्थं जाग्रतः कर्म, आत्ममनसः संयोगादिच्छाद्वेषपूर्वकप्रयत्नाऽपेक्षात्। अन्वभिप्रायमिन्द्रियान्तरेण विषयान्तरोपलब्धेर्दर्शनात् सुप्तस्य प्रबोधकाले जीवनपूर्वकप्रयत्नापेक्षात्। अपसर्पणकर्म। पसर्पणकर्म च आत्ममनःसंयोगाददृष्टाऽपेक्षात् ॥

"हस्तकर्मणा मनसः कर्म व्याख्यातम्" वै॰ द॰ ५।२।१४। मनोऽपसर्पणोपसर्पणे प्रदर्शयति ॥ अपसर्पणेति = अदृष्टाऽपेक्षात् अदृष्टे धर्माधर्मौ तयोः अस्ति अपेक्षा यत्र तथाभूतात् आत्ममनसःसंयोगात् मनसः अपसर्पणकर्म भवति। भोगेन प्रारब्धक्षये सति विनश्यतो देहात्वियुक्तस्य मनसो बहिरुत्क्रमणमपसर्पणम्। तथोपसर्पणकर्म भवति "देहान्तरोत्पत्तौ तत्र प्राणमनसोः प्रवेशनमुपसर्पणकर्म भवति। मनःप्रभृति समवायिकारणम्, अदृष्टवदात्मसंयोगोऽसमवायिकारणम्, अदृष्टं निमित्तकारणम् च ॥ यथा च सूत्रमाह कणादः।
"अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगश्चेत्यदृष्टकारितानि" वै॰ द॰ ५।२।१७॥

श्रीः श्रीः श्रीः

मनसोऽपसर्पणकर्मविधिमाचष्टे ॥ कथमिति= कथमिति प्रश्ने। तदुत्तरमाह ॥ यदा यस्मिन् काले उपभोगात् तत्कर्मणः तत्तत्फलसेवनात् जीवनसहकारिणो आत्मा मनश्च, तयोः संयोगः तज्जीवनं, तस्य स्वकार्यकरणे धर्माधर्मौ सहकारिणौ, तयोर्जीवनसहकारिणोः धर्माधर्मौ एव जीवनकारिणा विति भावः। तयोः प्रक्षयः नाशः वा यद्वाऽन्योऽन्याभिभवः मिथः स्वकार्यकरणे प्रतिबन्धकत्वं भवति। तदा तस्मिन् समये जीवनसहाययोः जीवनाऽऽधारभूतयोः धर्माधर्मयोः वैकल्यात् अभावात् तत्तत्पूर्वकप्रयत्नवैकल्यात् तत्तत्पूर्वकस्य जीवनपूर्वकस्य प्रयत्नस्याऽभावात्। प्राणनिरोधे सति प्रतिबद्धे सति देहे विनश्वरे सतीति भावः। लब्धवृत्तिभ्याम् लब्धा प्राप्ता देहान्तरोपभोग्या वृत्तिः स्वव्यवहारो याभ्यां तथाभूताभ्याम् आत्ममनःसंयोगसहायाभ्याम् आत्ममनःसंयोगस्य सहायभूताभ्याम् ऐहिकदेहोपभोग्यात् कर्मणोऽन्याभ्यां विलक्षणाभ्यां धर्माधर्माभ्यां मृतशरीरात् प्रारब्धकर्मक्षीणदेहात् मनसो विभागकारणम् अपसर्पणकर्म जायते। इत्यत्राऽपसर्पणकर्मणि आत्ममनःसंयोगोऽसमवायिकारणम्। मनः समवायिकारणम्। अदृष्टं निमित्तकारणमिति। उपसर्पणकर्मोत्पद्यते

मू= यदा जीवनसहकारिणोर्धर्माधर्मयोरुपभोगात् प्रक्षयोऽन्योन्याऽभिभवो वा। तदा जीवनसहाययोर्वैकल्यात् तत्पूर्वकप्रयत्नवैकल्यात् प्राणनिरोधे सति अन्याभ्यां लब्धवृत्तिभ्यां धर्माधर्माभ्यामात्ममनःसंयोगसहायाभ्यां मृतशरीराद्विभागकारणमपसर्पणकर्मोत्पद्यते। ततः शरीराद्बहिरपगतं ताभ्यामेव धर्माधर्माभ्यां समुत्पन्नेनाऽऽतिवाहिकशरीरेण सम्बध्यते तत्संक्रान्तञ्च स्वर्गं नरकं वा गत्वाऽऽशयाऽनुरूपेण सम्बध्यते तत्संयोगार्थं कर्मोपसर्पणमिति ॥

तत इति= ततस्तदुत्क्रमणानन्तरं शरीरात् मृतदेहात् बहिरपगतं बहिर्यातं मनः ताभ्यामेव प्राप्ताऽपरदेहोपभोग्याभ्यां धर्माऽधर्माभ्यां समुत्पन्नेन जातेन अतिवाहिकशरीरेण अतिवाहयति आत्मानमित्यतिवाहिकं सूक्ष्मं शरीरं तेन अतिवाहिकेन सूक्ष्मेण शरीरेण देहेन सम्बध्यते प्राप्यते। तत् मनः संक्रान्तं निर्गतं सत् स्वर्गं लोकविशेषं "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्पदं स्वःपदास्पदम् ॥" शरीरत्यागमन्तरेण स्वर्गो प्राप्नोति। यथोक्तमथर्ववेदे "येन देवाः स्वरारुरुहुर्हित्वा शरीरममृतस्य नाभिम्। तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन तपसा यशस्यवः ॥" अथर्व. कां. ४ अनु. ३ सू. ११ मं. ३ पुण्यात्मभिः प्राप्यं स्थानं नरकं नीचैर्गमनीयं स्थानं गत्वाऽऽशयाऽनुरूपेण स्वकर्माऽनुसारेण शरीरेण स्थूलशरीरेण सम्बध्यते जीवसंपृक्तं तन्मनः स्थूलशरीरवद्भवतीति भावः। तत्संयोगार्थं स्वर्गनरकयोः स्वस्वकर्माऽनुरूपजातेन शरीरेण तस्य मनसः संयोगार्थं यत् कर्म तदुपसर्पणमिति जेगीयते प्रेक्षावद्भिरिति। यथा च सूत्रमाह कणादः "अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥" वै. द. ५।२।१७ ॥

योगिनां मनसोऽपसर्पणोपसर्पणे आचष्टे ॥ योगिनामिति = योगिनां वशीकृतचित्तवृत्तीनां मनुष्याणां बहिरुद्रेचितस्य बहिर्निःसारितस्य मन
सः चित्तस्य अभिप्रेतदेशगमनम् अभिप्रेते ऽभीष्टे देशे गमनम् गतिः, अपसर्पणमितियावत् प्रत्यागमनमुपसर्पणञ्च भवति । सृष्ट्यादौ मनःकर्म
कारणं किं भवतीत्याभणति ॥ तथेति = यथैकस्माद्देहात् अपरस्मिन् देहे मनसः गमनकारणमदृष्टमेव । तथा तेनैवप्रकारेण सर्गकाले सृष्टिस
मयेऽपि प्रत्यग्रेण शरीरेण सृष्ट्यादौ उत्पन्नेन अभिनवेन शरीरेण सह सम्बन्धार्थं सम्बन्धप्राप्तये मनसः कर्म गमनकर्म अदृष्टकारितं भव
ति । पृथिव्यादिभूतचतुष्टयगमनकर्मणि किं कारणम् ॥ एवमिति = यथा सर्गादौ मनोगतिः अदृष्टकारिता एवं पृथिव्यां स्वात्तं परितो भ्रमणम्
रवेः जलाकृष्टिः, अप्सु तरङ्गोद्भूतिः, वायौ वायुसंमूर्छनादिकं कर्मजातं यद्दृश्यते । येषां कर्मणाञ्च न प्रत्यक्षेण कारणमुपलभ्यन्ते न चा
नुमानेन अनुमीयन्ते । कानिचित्कर्माणि उपकाराय भवन्ति, कतिपयानि अपकाराय, यथा रवेर्जलाकर्षणं वृष्टये उपलभ्यते, शनिपातश्च
हानये सर्वञ्चैतत् अदृष्टकारितं भवति नान्यत्कारणमेषाम् । इत्यत्र पृथिव्यादिकं समवायिकारणम् आकर्षक्रियाप्रयोजकादित्यादिसंयोगविशेषो,

मू० = योगिनां बहिरुद्रेचितस्य मनसोऽभिप्रेतदेशगमनं प्रत्यागमनञ्च । तथा सर्गकाले प्रत्यग्रेण शरीरेण सम्बन्धार्थं कर्मादृष्टकारितम् । एवमन्यदपि महाभूतेषु यत्प्रत्यक्षानुमानाभ्यामनुपलभ्यमानकारणमुपकारापकारसमर्थञ्च भवति, तदपि अदृष्टकारितम् । यथा सर्गादावणुकर्म, अग्निवाय्वोरूर्ध्वतिर्यग्गमने, महाभूतानां प्रक्षोभणम्, अभिषिक्तानां मणीनां तस्करं प्रतिगमनम्, अयसोऽयस्कान्ताभिसर्पणञ्चेति ॥ इति श्री प्रशस्तपादमुनिप्रणीते प्रशस्तपादभाष्ये कर्मपदार्थः समाप्तः ।

समवायिकारणमदृष्टं निमित्तकारणम् । यथा च सूत्रम् "तद्विशेषेणादृष्टकारितम्" वै० द० ५।२।२ यथा येन प्रकारेण सर्गादौ सृष्ट्यादौ अणुकर्म
अणूनां परमाणूनामाद्यं कर्म अदृष्टकारितम्, परमाणुकर्मेति मनः कर्मेति च जीवानां भोगहेतुः पुण्यापुण्यात्मकं कर्म अदृष्टकारितम् प्रतिफलम् । अग्नेः ऊर्ध्व
गमनम् अग्नेरूर्ध्वज्वलनं कर्म वायोः तिर्यग्गमनं कर्म चादृष्टकारितम् । महाभूतानां भूगोलादीनां प्रक्षोभणमाद्यं कर्म अदृष्टकारितम् । यथा च सूत्रम्
अग्नेरूर्ध्वज्वलनं । वायोस्तिर्यक्पवनमणूनां मनसश्चाद्यं कर्मादृष्टकारितम्" वै० द० ५।२।१३ अथ च तस्करपरीक्षाकरणेऽभिषिक्तानामभिमं
त्रितानां मणीनां कांस्यादिमणीनां यत् तस्करं प्रति चौरं प्रति गमनं तददृष्टकारितम् । यथा चाहुरन्ये वृद्धाः "यत्र चोदितं वस्तु न ज्ञायते तत्स्वामिभिः । तत्रे
यं क्रियते, कांस्यमणिः मन्त्राभिमन्त्रितोऽभिमन्त्रितः मुषितवित्तगतं प्रत्यभिसर्पति तस्करोऽभिमुखं वा । इत्यत्र मणेः तस्कराभिगमने स्वयं मणिः
समवायिकारणम् । अदृष्टं तस्करात्ममनसि संयोगोऽसमवायिकारणम् अदृष्टं निमित्तकारणम् । अथ च अयसः लोहस्य अयस्कान्ताभिसर्पणम् अयस्का
न्तस्य चुम्बकस्याभिसर्पणं समीपगमनम् अदृष्टकारणम् दृष्टविलक्षणात् शक्तिभूताऽदृष्टकारणकमित्यर्थः । अत्र अयः समवायिकारणम्, तत्संयोगोऽसमवायि
कारणम् अदृष्टं निमित्तकारणम् । यथा च सूत्रम् "मणिगमनं सूच्यभिसर्पणमदृष्टकारणकम्" वै० द० ५।१।१५ ॥ इति श्री लैयावासिन्यायभूषणो
पपदविशिष्ट जगन्नाथशास्त्रे भाष्यप्रकाशे कर्मपदार्थः समाप्तः

"सत्तावतेऽप्यसत्ताय निर्गुणाय गुणात्मने।
निराश्रयाश्रयेशाय नमः स्युः परमात्मने॥" १

अथ सामान्यपदार्थो निरूपणम्। सामान्यमिति॥ पराऽपरभेदात् सामान्यं द्विविधम्। तत्स्वरूपमाह। स्वविषयसर्वगतम्। यत्सामान्यं यत्र निवसति सः तस्य विषयस्तत्र सर्वस्मिन् विषये गतं प्राप्तं समवेतं भवति। अभिन्नात्मकम्। अभिन्नं भेदरहितमात्मा स्वरूपं यस्य तत् स्वविषयाऽभेदात्मकमित्यर्थः। अनेकवृत्ति अनेकेषु पदार्थेषु समवायसम्बन्धेन वृत्तित्वम्। एकद्विबहुषु आत्मस्वरूपाऽनुगमप्रत्ययकारि एकस्मिन् अश्वे यत्सामान्यं तदेव द्वयोः अश्वयोः तदेव बहुषु अश्वेषु विद्यते तदेव सामान्यं स्वस्वरूपानुगामिनं प्रत्ययं करोति नान्यगामिनमितिनिष्कर्षः। भिन्नेष्वधिकरणेषु यत् समानां बुद्धिं प्रसूते येन च बहुनीतरेतरतो न व्यावर्तन्ते तत्सामान्यमिति यावत्। पुनः कीदृशं तत् स्वरूपाऽभेदेन, न भेदः अभेदः स्वरूपस्य अभेदः अपार्थक्यं स्वरूपाऽभेदः तेन स्वरूपाऽभेदेन एकस्मिन् पिण्डे यत्स्वरूपं तत्पिण्डान्तरेऽपि विद्यते तस्मादभेदेनेति। आधारेषु आश्रयेषु प्रबन्धेन पूर्वपूर्वव्यक्तपरित्यागेन वर्तमानं भवति। तथाऽनुवृत्तिप्रत्ययकारणम् अनुवृत्तिः अनुगमनं तस्य प्रत्ययः प्रतीतिः तस्याऽनुगमनप्रत्ययस्य कारणमिति। यद्वा "यद्वियव

मू = सामान्यं द्विविधं परमपरञ्च। स्वविषयसर्वगतमभिन्नात्मकमनेकवृत्ति एकद्विबहुषु आत्मस्वरूपाऽनुगमप्रत्ययकारि, स्वरूपाऽभेदेनाधारेषु प्रबन्धेन वर्तमानमनुवृत्तिप्रत्ययकारणम्। कथम्। प्रतिपिण्डं सामान्याऽपेक्षं प्रबन्धेन ज्ञानोत्पत्तावभ्यासप्रत्ययजनिताच्च संस्कारादतीतज्ञानप्रबन्धप्रत्यवेक्षणात् यदनुगतमस्ति तत्सामान्यमिति॥

हारभूमौ नित्यं सत् अनेकासु व्यक्तिषु समवैति तत्सामान्यमिति तत्त्वम्। तथा च सूत्रम् "भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव" वै॰ द॰ १।२।४ कथमनेकपिण्डेषु सामान्यवृत्तेरवगतिरिति पृच्छति। कथमिति = कथमिति प्रश्ने। अनेकपिण्डेषु एकस्य सामान्यस्य केन प्रकारेणोपलब्धिरिति पृष्ठः सन् उत्तरमाह॥ प्रतिपिण्डं प्रतिशरीरम् सामान्याऽपेक्षं यत् सामान्यदृष्टिर्यथा जायेत तथा प्रबन्धेन पूर्वपूर्वव्यक्तपरित्यागेन ज्ञानोत्पत्तौ जातायां गोत्वं गवि संतिष्ठते, अश्वत्वम् अश्वे संतिष्ठते इत्यभ्यासनिश्चयजातात् संस्कारात् भावनाख्यसंस्कारात् अतीतस्य भूतस्य ज्ञानस्य यः प्रबन्धः प्रवाहः, तस्य प्रत्यवेक्षणात् मुहुः मुहुः स्मरणात् यदनुगतमनुकूलताऽस्ति तत्सामान्यमिति॥

श्री: श्री: श्री:

परसत्तास्वरूपमाह ॥ तत्रेति = तत्र सत्तासामान्यस्य परमित्यपि नाम कथ्यते, तत्परं सामान्यं सर्वदाऽनुवृत्तिप्रत्ययं कुरुते न तु व्यावृत्तिप्रत्ययम्। यथा च
परस्परविशिष्टेषु परस्परभिन्नेषु चर्मवस्त्रकम्बलादिषु सत्सु एतेषु नीलसम्बन्धो द्रव्यसम्बन्धः सामान्यं वर्तते ऽत एकस्मात् नीलसम्बन्धादेव नीलं नील
मिति नीलत्वप्रत्ययस्यानुवृत्तिः अस्ति न च भेदवत्सु अपि तेषु नीलत्वस्य व्यावृत्तिरिति तत्त्वम्। यथा चाऽनुमानम् "द्रव्यादिषु सत् सत् इतिप्रत्ययाऽ
नुवृत्तिः अतिरिक्तप्रत्ययनिबन्धना भिन्नेषु प्रत्ययाऽनुवृत्तित्वात् चर्मवस्त्रादिषु नीलप्रत्ययाऽनुवृत्तिवत्। तथा च द्रव्यगुणकर्मसु सत्सत् इतिप्रत्य
याऽनुवृत्तिः सद्द्रव्यं सन् गुणः सत्कर्म इत्याकारकः यः प्रत्ययः शब्दप्रयोगः तस्याऽनुवृत्तिः अनुगमनं अविशिष्टा समाना सत्ता भवति। सा च
सत्ता द्रव्यगुणकर्मभ्योऽर्थान्तरात् पृथक्त्वात् भवितुमर्हतीति यत्तदर्थान्तरम्। द्रव्यगुणकर्मस्वरूपायां सत्यां तस्यां गुणकर्मसु न वसेत् सा द्रव्य
गुणकर्मत्वं गुणकर्मसु वृत्तित्वात्ऽसिद्धेः। सत्ता च गुणकर्मसु वर्तते तस्मात्तेभ्यः पदार्थान्तरं सत्तेति सिद्धं नः समीहितम्। यथा च सूत्रमाह
सदिति यतो द्रव्यगुणकर्मसु सा सत्ता,, वै· द· १।२।७।" द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता,, वै·द·१।२।८ सम्बन्धं द्रढयति ॥
सत्तेति = सत्ताऽनुसम्बन्धात् द्रव्यादिषु त्रिषु सत् द्रव्यं सन् गुणः सत्कर्मेति सत्ता प्रत्ययाऽनुवृत्तिं करोति न च व्यावृत्तिं तस्मात् कारणात्सामान्यमेव

मू = तत्र सत्ता सामान्यं परमनुवृत्तिप्रत्ययकारणमेव। यथा परस्परविशिष्टेषु चर्मवस्त्रकम्ब
लादिष्वेकस्मात् नीलद्रव्याभिसम्बन्धात् नीलं नीलमिति प्रत्ययाऽनुवृत्तिः। तत्र पर
स्परविशिष्टेषु द्रव्यगुणकर्मस्वविशिष्टा सत्सदिति प्रत्ययाऽनुवृत्तिः सा चाऽर्थान्तरा
द्भवितुमर्हतीति यत्तदर्थान्तरं सा सत्तेति सिद्धा। सत्ताऽनुसम्बन्धात् सत्सदिति प्रत्य
याऽनुवृत्तिः तस्मात्सामान्यमेव। अपरं द्रव्यत्वगुणत्वकर्मत्वादि अनुवृत्तिव्यावृत्तिहे
तुत्वात् सामान्यं विशेषश्च भवति। तत्र द्रव्यत्वं परस्परविशिष्टेषु पृथिव्यादिषु अनुवृ
त्तिहेतुत्वात्सामान्यम्। गुणकर्मभ्यो व्यावृत्तिहेतुत्वाद्विशेषः।

न विशेष इति। यथा च सूत्रम् "भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव,, वै·द·१।२।४ अपरसामान्यमाह ॥ अपरमिति = द्रव्यत्वगुणत्व
कर्मत्वादि द्रव्यत्वं गुणत्वं कर्मत्वम् अनुवृत्तिहेतुत्वात् सामान्यानि व्यावृत्तिहेतुत्वात् अयमस्माद्व्यावृत्तः २ इति हेतुत्वाद्विशेषा भवन्तीति यथा च सू
त्रम् "द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च,, वै·द·१।२।५ द्रव्यत्वे सामान्यविशेषौ कथं भवतः। तत्रेति = द्रव्यत्वं
परस्परविशिष्टेषु परस्परभिन्नेषु पृथिव्यादिषु अनुवृत्तिहेतुत्वात् अनुवर्तनकारणत्वात् सामान्यमेव अधिकदेशवृत्तित्वात् सामान्यमेव।
द्रव्यत्वं गुणकर्मभ्यो व्यावृत्तिहेतुत्वात् अल्पदेशवृत्तित्वात् विशेष इति ॥ श्रीः।

श्रीः

श्रीः

गुणकर्मत्वे: सामान्यविशेषौ कथं भवतः॥ तथेति= गुणत्वं परस्परविशिष्टेषु परस्परभिन्नेषु रूपादिषु अनुवृत्तिहेतुत्वात् बहुदेशवृत्तित्वात् सामान्यम्
अर्थात् गुणत्वं रूपत्वाऽपेक्षयाऽधिकदेशवृत्तित्वात् सामान्यम्। द्रव्यकर्मभ्योऽल्पदेशवृत्तित्वात् विशेष इति। तथा कर्मत्वमपि उत्क्षेपणत्वाद्यपे
क्षयाऽधिकदेशवृत्तित्वात् सामान्यं द्रव्यगुणेभ्योऽल्पदेशवृत्तित्वात् विशेष इति। अपरसामान्यमपि निर्दिशति। एवमिति= प्राण्यप्राणिगतानाम् पृथिवीत्वरू
पत्वोत्क्षेपणत्वगोत्वघटत्वादीनां प्राणिगतानि सामान्यानि गोत्वादीनि, अप्राणिगतानि सामान्यानि घटत्वादीनि एवं द्रव्यत्वादिवत् पृथिवीत्वादी-
नामपि अनुवृत्तिहेतुत्वात् सामान्यम् व्यावृत्तिहेतुत्वात् विशेषत्वं सिद्धम् यथा पृथित्वं घटत्वाऽपेक्षया बहुदेशवृत्तित्वात् सामान्यं द्रव्यत्वाऽ
पेक्षयाऽल्पदेशवृत्तित्वात् विशेष इति। रूपत्वं शुक्लत्वाऽपेक्षया सामान्यं गुणत्वाऽपेक्षया विशेष एवमन्यत्राप्यूह्यम्। द्रव्यत्वादीनां किं
सामान्यस्वरूपं वास्तविकम् विशेषस्वरूपता वाऽऽहोस्विदुभयस्वरूपत्वमित्यत्राह॥ एतानीति= द्रव्यत्वादीनि द्रव्यत्वं गुणत्वं कर्मत्व
मिमानि प्रभूतविषयत्वात् बहुविषयत्वात् प्राधान्येन मुख्यया वृत्त्या सामान्यानि। तत्र स्वाश्रयविशेषकत्वात् स्वस्याश्रयस्य विशेष-

मू-तथा गुणत्वं परस्परविशिष्टेषु रूपादिषु अनुवृत्तिहेतुत्वात् सामान्यम्। द्रव्यकर्मभ्यो
व्यावृत्तिहेतुत्वाद्विशेषः। तथा कर्मत्वं परस्परविशिष्टेषूत्क्षेपणादिषु अनुवृत्तिप्रत्यय
हेतुत्वात् सामान्यं द्रव्यगुणेभ्यो व्यावृत्तिहेतुत्वाद्विशेषः। एवं पृथिवीत्वरूपत्वोत्क्षेप-
णत्वगोत्वघटत्वादीनामपि प्राण्यप्राणिगतानामनुवृत्तिव्यावृत्तिहेतुत्वात् सामा
न्यविशेषभावः सिद्धः। एतानि तु द्रव्यत्वादीनि प्रभूतविषयत्वात् प्राधान्येन सा-
मान्यानि। स्वाश्रयविशेषकत्वाद्भक्त्या विशेषाख्यानि इति। लक्षणभेदादेषां
द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वं सिद्धम्। अत एव नित्यत्वम्। द्रव्यादिषु वृत्तिनि
यमात् प्रत्ययभेदाच्च परस्परतश्चान्यत्वम्।

कत्वात् विशेषस्तु भाक्त एव गौण एव। विशेषो हि स्वाश्रयं सर्वतो विशिनष्टि द्रव्यत्वादिकमपि विजातीयेभ्यः स्वाश्रयस्य विशेषणमित्येतावता साधर्म्यात्
कत्वात् विशेषस्तु भाक्त एव गौण एव। विशेषो हि स्वाश्रयं सर्वतो विशिनष्टि द्रव्यत्वादिकमपि विजातीयेभ्यः स्वाश्रयस्य विशेषणमित्येतावता साधर्म्यैक
उपचारवृत्तिरिति। सामान्यं द्रव्याद्यतिरिक्तं नवेत्याह। लक्षणेति= अनुवृत्तिबुद्धिवेद्यानि द्रव्यत्वादीनि व्यावृत्तिबुद्धिवेद्याश्च द्रव्यादयः। अतः एषां
द्रव्यत्वादीनां लक्षणभेदात् स्वस्वप्रतिपाद्यविषयविलक्षणत्वात् द्रव्यगुणकर्मभ्यः पदार्थान्तरत्वमन्यः पदार्थः द्रव्यमन्यः पदार्थः द्रव्यत्वमन्यः
पदार्थ इतिभावः तद्वृत्तिमती [illegible]ता इति सिद्धम्। अतः सामान्यस्य द्रव्यादिभ्यो भेदाभित्यत्वं सिद्धमभेदे तन्नाशे तन्नाशो दृष्टः न च भेदे। तस्य सा-
मान्यस्य द्रव्यादिषु निवासः तस्मात् प्रत्ययभेदात् द्रव्यात् इतो विलक्षणनिश्चयभेदात् परस्परतोऽन्यत्वम्। द्रव्यादीनां सामान्याद्भेदः। सामा-
न्यस्य द्रव्यादिभ्यश्चेति विवेकः। द्रव्यत्वादीनामपि परस्परतो भेद एव॥

सतैकत्वं साधयति प्रत्येकमिति = स्वाश्रयेषु स्वकीयस्य ये आश्रयाः द्रव्यगुणकर्माणि तेषु प्रत्येकं प्रतिपिण्डं लक्षणाविशेषात् लक्ष्यतेऽनेनेति लक्षणं लिङ्गं सत् द्रव्यम् सन् गुणः सत्कर्म इत्याकारकव्यवहारात्मकं सत्ताऽनुमापकलिङ्गं तस्या विशेषात् विशेषो भेदः तदभावात् विशेषलक्षणाऽभावात् विशेषः सामान्यभेदः तत्र लिङ्गस्य प्रमाणस्याभावोऽनुपलब्धिः तस्मादेकत्वं सामान्यस्य। अभिभस्त्वभाववत् सामान्यमित्यर्थः। यथा च सूत्रम् "सदिति लिङ्गाविशेषाद् विशेषलिङ्गाऽभावाच्चैको भावः" वै· द· १।२।२७। यद्यपि सामान्यानि यत्र कुत्रोपजायमानैः पिण्डैः सम्बन्धात् अपरिच्छिन्नदेशानि सर्वदेशव्यापकानि भवन्ति, तथाऽपि उपलक्षणनियमात् उपलक्षणस्य अभिव्यञ्जकस्य अवयवसंस्थानविशेषस्य नियमात् नियतत्वात् कारणसामग्रीनियमाच्च पिण्डोत्पादककारणसामग्रीनियमात् स्वविषयसर्वगतानि स्वयं सामान्यं यत्र निवसति तस्य सः स्वविषयः तत्र सर्वत्र स्वविषये गतानि भवन्ति नान्यत्र। यथा सामान्यं यदि गवि वर्तते तदा गोत्वमश्वत्वे

मू = प्रत्येकं स्वाश्रयेषु लक्षणाविशेषाद्विशेषलक्षणाऽभावाच्चैकत्वम्। यद्यप्यपरिच्छिन्नदेशानि सामान्यानि भवन्ति तथाऽपि उपलक्षणनियमात् कारणसामग्रीनियमाच्च स्वविषयसर्वगतानि। अन्तराले च संयोगसमवायवृत्त्यभावादव्यपदेश्यानीति। इतिश्री प्रशस्तपादमुनिविरचिते प्रशस्तपादभाष्ये सामान्यपदार्थः समाप्तः।

न जातुचिदपि भविष्यति। अभिव्यञ्जकत्वं यथा सास्नात्वम् गोत्वस्य कंबुग्रीवत्वं घटस्य च व्यञ्जकम्। न च हस्तमश्वादीनां संभविष्यतीति। सामान्ये संयोगादेरव्याप्यते स्वतः सिद्धा वा॥ अन्तराले इति = अन्तराले आकाशान्तराले दिगन्तराले वा द्रव्यान्तराले वा न संयोगवृत्तिः नवा समवायवृत्तिर्भवति। वियुक्तानां तेषामवस्थाने न किञ्चिदपि प्रमाणत्वमुपलभ्यतेऽतोऽन्तराले सामान्यानि अव्यपदेश्यानि व्यपदेष्टुमनर्हाणीति॥ अप्राप्तयोः प्राप्तिः संयोगः, तत्रैव अवस्थितस्य च वा जायते। समवायस्तु तद्विलक्षणोऽयुतसिद्ध इति तत्वम्। इतिश्री लैयावास्तव्यन्यायभूषणोपपदजगन्नाथशास्त्रिकृते भाष्यप्रकाशे सामान्यपदार्थः समाप्तः। हरिः ओम्।

श्रीः

श्रीः

प्रश॰ भा
१६०९
भाषा प

"सुविशेषस्वरूपाय विशेषाणां प्रचालिने।
नमो जगदधीशाय शेषाय शेषशायिने॥१॥"

अथ विशेषपदार्थनिरूपणम्॥ अन्तेष्विति = अन्तेषु उत्पत्तिविनाशयोः अन्तेषु अवसानेषु भवा विद्यमानाः तिष्ठन्ति अन्त्याः। स्वाश्रयविशेषकत्वात् स्वाश्रयस्येतरस्मात् भेदकत्वात् विशेषा एव घटादयः द्व्यणुकपर्यन्ताः स्वस्वाऽवयवभेदात् मिथो भिन्नाः सन्तीमे तु परस्परभेदकाः स्वतो व्यावृत्ताः सन्तीति। विनाशारम्भरहितेषु अविनश्वरेषु नित्येषु इतिभावः। नित्यद्रव्याणि यानि पृथिव्यादिचतुष्टयपरमाणवः आकाशः दिक् आत्मा मनः इमानि सन्ति, तेषु प्रति द्रव्यं द्रव्यं द्रव्यं प्रति एकैकशो वर्तमानाः प्रतिद्रव्ये एकसंख्याविशिष्टा अत्यन्तव्यावृत्तिबुद्धिहेतवः अत्यन्ता सर्वथा या व्यावृत्तिः बुद्धिरितरभेदिका बुद्धिस्तस्याः हेतवः कारणानीमे इति। यथा उदाहरणे। गवादिषु अश्वादिभ्यः तुल्याकृतिनिमित्ता गौरिति तुल्यगुणनिमित्ता शुक्लः इति तुल्यक्रियानिमित्ता, शीघ्रगतिरिति, तुल्याऽवयवनिमित्ता पीनककुद्मानिति, तुल्यसंयोगनिमित्ता महाघण्ट इति प्रत्ययव्यावृत्तिः निश्चयभेदः दृष्टेति, यथा गौराकृत्याऽश्वेन सदृशः गुणेन वा कर्मणा वेति भेदः प्रत्यक्षमेवास्माकं

मू = अन्तेषु भवा अन्त्याः, स्वाश्रयविशेषकत्वाद्विशेषाः। विनाशारम्भरहितेषु नित्यद्रव्येषु अण्वाकाशदिगात्ममनःसु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतवः। यथाऽस्मदादीनां गवादिषु अश्वादिभ्यस्तुल्याकृतिगुणक्रियाऽवयवसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा गौः शुक्लः शीघ्रगतिः पीनककुद्मान् महाघण्ट इति। तथाऽस्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनस्सु चाऽन्यनिमित्ताऽसंभवाद् येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोऽयं विलक्षणोऽयमिति प्रत्ययव्यावृत्तिः देशकालविप्रकर्षे च परमाणौ स एवाऽयमिति प्रत्यभिज्ञानं च भवति तेऽन्त्याः विशेषाः॥

भवति। दार्ष्टान्तमाह॥ तथेति = ~~तेन प्रकारेण अस्मद्विशिष्टा~~नामस्मदादीनां गवादिव्यक्तिषु प्रत्ययभेदो भवति, तथा तेनैव प्रकारेणाऽस्मद्विशिष्टानां निरुद्धचित्तानां योगिनां तुल्याकृतयः, तुल्यगुणाः, तुल्यक्रिया ये नित्याः परमाणवस्तेषु नित्येषु परमाणुषु मुक्तात्ममनस्सु कैवल्यभोक्तृषु चाऽन्यनिमित्ताऽसंभवात् कारणान्तरमन्तरेण येभ्यो निमित्तेभ्यो निमित्तकारणेभ्यः प्रत्याधारं प्रतिव्यक्ति विलक्षणोऽयं विलक्षणोऽयमस्मादिन्नोऽयमस्माद्भिन्न इति प्रत्ययव्यावृत्तिः भेदसाधिका बुद्धिर्जायते। देशकालविप्रकर्षे देशविप्रकृष्टे कालविप्रकृष्टे परमाणौ स एवाऽयमिति प्रत्यभिज्ञानमनुभवज्ञानं भेदप्रत्यायकं चेद्भवति तेऽन्त्या विशेषा इति निर्निमित्तः प्रत्ययभेदो न क्वचिज्ज्ञातश्चेन अवलोकितः। तस्मात् यदेतत्कारणं स विशेष इति यथाचोक्तं सूत्रम् "अन्यत्रान्त्येभ्यो विशेषेभ्यः" वै॰ द॰ १।२।६॥ मानम्" देशकालविप्रकर्षेण दृष्टाः परमाणवः कस्यचित्प्रत्यभिज्ञाविषयाः सामान्यविशेषवत्त्वात् घटवदिति, यथा च सूत्रम् १६०

कोऽऽवश्यकताऽन्त्यविशेषाणामिति परिपृच्छति ॥ यदीति = यथा योगिनां पुरुषाणां योगोत्पन्नधर्मात् अतीन्द्रियज्ञानं भवति तथा यदि अन्त्यविशे
षहेतुं विहाय विशेषेषु प्रत्ययव्यावृत्तिर्भेदज्ञानं प्रत्यभिज्ञानमनुभवज्ञानञ्च स्यात्ततः का हानिर्भविष्यति अपि तु न काऽपीति। विशेषपदार्थस्य निरू
पणसिद्धान्ते दृष्टान्तं वदति। नैवमिति = नैवम् यत् त्वया उक्तं तदेवं न भवति। यथा योगजाद्धर्मात् योगजधर्मशक्तेः अशुक्ले शुक्लताव्यतिरिक्ते गुणे
शुक्लप्रत्ययः शुक्लगुणनिश्चयः न संजायते न संभवति। अत्यन्ताऽनवलोकिते जने च प्रत्यभिज्ञानं परिचितिज्ञानं नोत्पद्यते। यदि अदृष्टे नरि प्रत्यभि
ज्ञानं जायेत चेत्तर्हि तत् ज्ञानं मिथ्याप्रत्ययो भविष्यति एवमन्त्यविशेषेऽपि संगमनीयो विधिः। दार्ष्टान्तमाह ॥ तथेति = यथा योगजधर्मशक्तेः अशुक्ले
न शुक्लप्रत्ययो भवितुमर्हति तथा तेन प्रकारेण इहापि अन्त्यविशेषमन्तरेण अन्त्यविशेषं विना योगिनां योगजधर्मात् योगोत्पन्नात् धर्मात् न
प्रत्ययव्यावृत्तिः प्रत्ययभेदः नवा प्रत्यभिज्ञानं स्वरूपाऽनुभवज्ञानं भवितुमर्हति। अतः सिद्धमिदम्। अन्त्यविशेष एव विशेषपरिज्ञानसाधनमिति
दिक्। अन्त्यविशेषवत् परमाणवोऽपि तथा भवेयुरिति पृच्छति। अथेति = यथाऽन्त्यविशेषेषु विशेषान्तरं विनाऽपि स्वतः स्वयमेव प्रत्ययव्यावृत्तिः
उद्भाव्यते, तथा परमाणुषु अपि स्वतः प्रत्ययव्यावृत्तिः परमाण्वन्तरमन्तरेण कुतो न कल्प्यते विशेषकल्पनया किं सेत्स्यतीति। उत्तरमाह। अन्त्य

मू= यदि पुनरन्त्यविशेषमन्तरेण योगिनां योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानञ्च
स्यात् ततः किं स्यात्। नैवं भवति। यथा न योगजाद्धर्माद्शुक्ले शुक्लप्रत्ययः संजायते
अत्यन्तादृष्टे च प्रत्यभिज्ञानम्। यदि स्यान्मिथ्या भवेत्। तथेहाप्यन्त्यविशेषमन्तरेण
योगिनां न योगजाद्धर्मात् प्रत्ययव्यावृत्तिः प्रत्यभिज्ञानं वा भवितुमर्हति। अथान्त्य
विशेषेष्विव परमाणुषु कस्मान्न स्वतः प्रत्ययव्यावृत्तिः कल्प्यते। इति चेन्न। तादात्म्या
त्। इह तदात्मकत्वेनान्यनिमित्तः प्रत्ययो भवति यथा घटादिषु प्रदीपात् न तु प्रदीपे प्र
दीपान्तरात्। यथा गवाश्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषाम्। तथेहापि ता
दात्म्यादन्त्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः, तद्योगात् परमाण्वादिष्विति। इतिश्री

विशेषवत् परमाणुषु अपि भूयादिति यदुक्तं तन्न भवति। कुतः, तादात्म्यात्, स एवात्मा तदात्मा, तदात्मनः भावः, तादात्म्यं तस्मात् तादात्म्यात् अभेदसम्बन्
धात् ऐक्यरूपादिति यावत्। अतदात्मकेषु भेदसम्बन्धविशिष्टेषु अन्यनिमित्तः प्रत्ययोऽन्यकारणकः प्रत्ययो भवति न तदात्मकेषु दृष्टान्तः यथा घटादयोऽ
न्धकारस्था प्रदीपादेवोपलभ्यन्ते सर्वदा सर्वत्र, न तु प्रदीपः प्रदीपान्तरेणोपलभ्यते तस्य स्वतः प्रकाशत्वात्। दृष्टान्तं सदृशं स्वसिद्धान्तमुपसंहरति।
यथेति = यथा गवाश्वमांसादयः स्वतः एव अशुद्धाः, स्पर्शव्यवहारादिकतः समादिष्टाः। तद्योगात् तन्मांससम्बन्धात् अन्येषामपि वस्तूनामशुचित्वं
जायते। तथा इहाऽपि तादात्म्यात् एकस्वरूपहेतुत्वात् अत्यन्तव्यावृत्तिस्वभावत्वाद्वा अन्त्यविशेषेषु स्वत एव स्वरूपादेव प्रत्ययव्यावृत्तिः
भेदजनकत्वं भवति न विशेषान्तरसंभवात्। परमाण्वादिषु साधारणधर्मिषु तद्योगात् विशेषसम्बन्धात् प्रत्ययव्यावृत्तिर्नानाविधा न स्व
रूपमात्रादिति ॥ इतिश्री वैशेषिकन्यायभूषणोपपदनामाथर्वशाखिकृते [illegible] विशेषपदार्थः समाप्तः ॥

"जन्माद्यस्य यतः, लोके ओतप्रोतैः समन्वयात्
न यस्य व्यतिरेकोऽस्ति तस्मै जन्मभिदे नमः,, १

अथसमवायपदार्थनिरूपणम् ॥ अयुतेति = एतद्व्याख्यानं पदार्थोद्देशनिरूपणभाष्यप्रकाशे प्रादर्शि। यथाच सूत्रम् "इहेदमिति यतः कार्यकारणयोः सः समवायः,, वै द० ७।२।२६। समवायसद्भावे प्रमाणं निर्दिशति ॥ इहेति = कार्यकारणभूतानाम् अकार्यकारणभूतानां वाऽयुतसिद्धानाम् आधार्याधारभावेन अवस्थितानां द्रव्यादिपञ्चानामिहेदमिति तन्तुषु पटः, पटे पटत्वं, घटे रूपमित्येवं प्रकारिका बुद्धिः प्रत्ययः इत्यर्थः यतो यन्निमित्तको भवति। कार्यकारणभूतानां यथा समवायः नियमः। "अवयवावयविनाम्,, "अनित्यद्रव्यतद्गुणानाम्,, "नित्यद्रव्यतत्समवेतानाम्,, "अनित्यगुणानाम्,, "कर्मतद्गतां भवति। अकार्यकारणभूतानां समवायो यथा "नित्यद्रव्यतद्गुणानाम्,, सामान्यतद्गताम्,, "अन्त्यविशेषतद्गतानाञ्च,, भवति। यतश्च यस्माच्च असर्वगतानाम् अनियतदेशकृतवासानाम्, अनधिगतान्यत्वानाम्

मू० = अथसमवायपदार्थनिरूपणम्। अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्धः इह प्रत्ययहेतुः स समवायः। द्रव्यगुणकर्मसामान्यविशेषाणां कार्यकारणभूतानां वाऽयुतसिद्धानामाधार्याधारभावेनावस्थितानामिहेदमिति बुद्धिर्यतो भवति यतश्चासर्वगतानामधिगतान्यत्वानामविष्वग्भावः स समवायाख्यः सम्बन्धः।

अधिगतं प्राप्तम् अन्यत्वं व्यक्तिभेदत्वं यैस्तथाभूतानाम् अविष्वग्भावोऽपार्थक्यम् अपराधीनत्वम् वा स समवायः भवति यथा वा "परस्परोपसंश्लेषो भिन्नानां यत्कृतो भवेत्। समवायः स विज्ञेयः स्वातंत्र्यप्रतिरोधकः,, ॥ श्रीः

श्रीः श्रीः श्रीः श्रीः

प्रश्नपूर्वकमुदाहरति॥ कथमिति= समवायसम्बन्धः कुत्र कथं जायते। यथा "इह कुण्डे दधि" इतिप्रत्ययः, कुण्डदध्नोः सम्बन्धे प्रतीयमाने सति
दृष्टः। यद्यपि कुण्डदध्नोः संयोगविशेषस्तथापि कुण्डम् एव आधारः, दधि आधारी। तयोरिव अग्रे निर्दिष्टानामपि समवायसम्बन्धोऽवबोध्यः।
अवयवाऽवयविनोः जातिव्यक्त्योः, गुणगुणिनोः क्रियाक्रियावतोः नित्यद्रव्यविशेषयोः च यः सम्बन्धः स समवायः। यथाऽवयवाऽवयवि
नोः, तन्तुषु पटसम्बन्धः। जातिव्यक्त्योर्यथा द्रव्ये द्रव्यत्वसम्बन्धः। गुणगुणिनोः यथा= तन्तुषु रूपसम्बन्धः। क्रियाक्रियावतोः यथा=
शरे गमनसम्बन्धः। नित्यद्रव्यविशेषयोः यथा नित्यद्रव्यविशेषसम्बन्ध इति। **समवायः संयोगव्यतिरिक्त इति व्याचष्टे॥ न चेति=**
असौ अवयवाऽवयव्यादिसम्बन्धः संयोगो भवितुं नार्हति कस्मात् सम्बन्धिनामयुतसिद्धत्वात्= युतसिद्धः संयोगः, अयुतसिद्धः समवायः
अवयवाः कुतोऽपि समागत्य न सम्बन्धिनो जायन्ते, किन्तु तत्रैव स्वभावसिद्धाः सन्ति। संयोगस्त्वप्राप्तयोः प्राप्तिः उपकल्प्यते तस्मात्।
अन्यतरकर्मादिनिमि[redacted] [illegible] अन्यतरकर्मादिनिमित्तम् अवयवस्य अवयविनो वा क्रियादिकारणं यत्र नास्ति तस्मात्

मू= कथम्। यथेह कुण्डे दधीति प्रत्ययः सम्बन्धे सति दृष्टस्तथेह तन्तुषु पटः इह वीरणेषु
कटः इह द्रव्ये गुणकर्मणी इह द्रव्यगुणकर्मसु सत्ता इह द्रव्ये द्रव्यत्वम् इह गुणे गुण
त्वम् इह कर्मणि कर्मत्वम् इह नित्यद्रव्येऽन्त्या विशेषा इति प्रत्ययदर्शनादस्त्येषां स-
म्बन्ध इति ज्ञायते। न चासौ संयोगः। सम्बन्धिनामयुतसिद्धत्वात्। अन्यतरकर्मादि
निमित्तासम्भवात् विभागान्तत्वादर्शनात्, अधिकरणाधिकर्तव्ययोरेव भावादिति।
स च द्रव्यादिभ्यः पदार्थान्तरं भाववल्लक्षणभेदात्॥

संयोगोऽन्यतरकर्मजः, उभयकर्मजः, संयोगजः वा दरीदृश्यते न च तथा समवायः। विभागान्तत्वादर्शनात्= विभागस्य अन्तत्वाऽ
वलोकनात् संयोगस्य यथा विभागान्तत्वं समवालोकि, न तथा समवायस्य। संयोगस्तु स्वतंत्रयोरपि भवति यथोर्ध्वोऽवस्थितयोरङ्गुल्योः
निरीक्ष्यते। अतः समवायो न संयोगः अपितु तद्भिन्न एव यथा च सूत्रम् "निष्क्रियाणां समवायः कर्मभ्यो निषिद्ध एव" वै·द·
५।२।२३ **समवायस्य द्रव्यादिभ्यः पार्थक्यं साधयति॥ स चेति=** स च समवायो द्रव्यगुणकर्मसामान्यविशेषेभ्यः पदार्थान्तरं
पृथक् पदार्थोऽस्ति कुतः, भाववल्लक्षणभेदात्= भावः सत्ता तद्वल्लक्षणं समवायस्यापि ज्ञेयं यथा सत्ता द्रव्यादितो विलक्षणा
तथा विलक्षणबुद्धिहेतुः समवायः। यथा च सूत्रम् "द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यातः" वै·द·७।२।२८॥

इह शान्तमुपवर्ण्य समन्वयति ॥ यथेति = यथा येन प्रकारेण भावस्य सामान्यस्य स्वाधारेषु द्रव्यादीनां द्रव्यत्वगुणत्वकर्मत्वानां च स्वाधारेषु द्रव्यगु
णकर्मसु आत्मानुरूपप्रत्ययकर्तृत्वात् आत्माऽनुरूपः प्रत्ययः स्वस्वयोग्यः प्रत्ययः द्रव्यं सत् गुणः सन् कर्म सत् इत्यात्माऽनुरूपः प्रत्ययः द्रव्यत्व-
स्य द्रव्यम्, गुणत्वस्य गुणः, कर्मत्वस्य कर्मेत्येवंविध आत्माऽनुरूपः प्रत्ययः तस्य कर्तृत्वात् स्वाश्रयेभ्यः स्वाश्रयिणः द्रव्यत्वस्य द्रव्यं गुणत्व
स्य गुणः, कर्मत्वस्य कर्मेति तेभ्यः परस्परतः द्रव्यतः द्रव्यत्वं पृथक्, गुणतो गुणत्वं पृथक्, कर्मणः कर्मत्वं पृथक् इत्यर्थान्तरभावः पृथक्प
दार्थत्वं भवति । तथा तस्मात् कारणात् समवायस्य समवायसम्बन्धस्यापि पञ्चसु पदार्थेषु द्रव्यगुणकर्मसामान्यविशेषेषु इहेति दर्शनात्
इह तन्तुषु पटः, इह कर्मणि कर्मत्वमित्यवलोकनात् तेभ्यः द्रव्यगुणकर्मसामान्यविशेषेभ्यः पञ्चभ्यः पदार्थेभ्यः पदार्थान्तरत्वं पृथक्पदार्थ
त्वमिति सिद्धम् । समवाय एक एवेत्याह ॥ न चेति = यथा संयोगोऽन्यतरकर्मजादिभेदात् बहुविधस्तथा न समवायः । भाववल्लिङ्गाविशेषात् = यथा
द्रव्यं सत् इत्यादिकस्य लिङ्गस्य अविशेषोऽभेदः तथा विशेषलिङ्गाऽभावात् भाववत् सामान्यवत् एकः समवायः । तस्माद्भाववदिहेदमिति

मू = यथा भावस्य द्रव्यत्वादीनां स्वाधारेषु आत्माऽनुरूपप्रत्ययकर्तृत्वात् स्वाश्रयादिभ्यः परस्पर
तश्चार्थान्तरभावः तथा समवायस्यापि पञ्चसु पदार्थेष्विहेतिप्रत्ययदर्शनात् तेभ्यः
पदार्थान्तरत्वमिति । न च संयोगवन्नानात्वं भाववल्लिङ्गाऽविशेषात् विशेषलिङ्गाऽभा
वाच्च तस्माद्भाववत्सर्वत्रैकः समवाय इति । ननु यद्येकः समवायो, द्रव्यगुणकर्म
णां द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः सह सम्बन्धैकत्वात्पदार्थसङ्करप्रसङ्गः ॥

प्रत्ययस्य लक्षणस्य सर्वत्र अभेदात् भेदे प्रमाणाऽभावाच्च सर्वत्र सर्वस्मिन् स्थले एकः समवाय एवेति सिद्धम् । समवायो नानाऽनित्यश्चेति प्रा
भाकराः मन्यन्ते „ तदयुक्तमुक्तं घटरूपे नष्टे रूपं नष्टमितिप्रत्ययः न तु रूपसमवायो नष्ट इति कस्यापि प्रत्ययो भवति । अतीन्द्रियत्वादिह बुद्ध्य
नुमेयः समवाय इति कणादाः । इन्द्रियसम्बद्धविशेषणताप्रत्यासत्त्या प्रत्यक्षोऽयमित्यस्मत्पादाः । यथा च सूत्रम् "तत्त्वं भावेन „ वै. द. ७।२।२८
समवायैकत्वे द्रव्यसाङ्कर्यं भविष्यति ॥ नन्विति = नन्वित्याशङ्कायाम् । यदि एक एव समवायः न नाना, तर्हि द्रव्यत्वगुणत्वकर्मत्वादिविशेषणैः
सह द्रव्यगुणकर्मणां सम्बन्धैकत्वात् पदार्थसङ्कीर्णता प्राप्स्यति । यथा द्रव्यत्वस्य सम्बन्धः द्रव्ये, गुणत्वस्य सम्बन्धो गुणे, कर्मत्वस्य योगः
कर्मणि एवं द्रव्यत्वोऽस्त्वितरेते पृथिव्यादिद्रव्यस्थानं तथा गुणस्य द्रव्ये समवायः, तयोः समवायसम्बन्धाविशिष्टत्वात् गुणस्यापि द्रव्ये द्रव्य
त्वसम्बन्धाच्च द्रव्यत्वं स्यात् । यथा च गुणत्वयोगः रूपादिषु रूपादिकस्य च गुणत्वं [illegible] सिद्ध्यति तथा तत्सम्बन्धश्च द्रव्यकर्मणोः
तद्योगात् द्रव्यकर्मणोरपि गुणत्वं प्राप्नुयात् । यथा च कर्मत्वयोगः उत्क्षेपणादि कर्मणि सिद्धः, उत्क्षेपणादिकस्य च कर्मत्वं सिद्धं, तथा तत्स-
म्बन्धः गुणद्रव्ययोः तद्योगात् गुणद्रव्ययोरपि कर्मत्वं सिद्ध्येत् । एवं मिथः साङ्कर्यप्रसङ्गः सङ्करस्याभावः सांकर्ये तस्य प्रसङ्गः साङ्कर्यप्रसंङ्गः इति ॥

समवायैकत्वपक्षं समाधत्ते॥ इति नेति= या पदार्थसङ्कीर्णता प्राप्नोति सा न जायते, कुतः आधाराधेयनियमात् आधारः आश्रयः, आधेयः आश्रेयः, तयोः नियमः, तस्मात् आधाराधेयनियमो दृष्ट इति भावः। द्रव्यसमवायाद्द्रव्यत्वं भवति न तु समवायसद्भावमात्रेण द्रव्यत्वम्। समवायश्च द्रव्ये द्रव्यमाधारः, आधेयश्च समवायः द्रव्ये एव न तु गुणकर्मसु। एवं गुणसमवायाद् गुणत्वं समवायो गुणे, गुण आधारः समवायश्चाधेयः इत्येवं कर्मण्यपि विवेचनीयम्। यद्यप्येकः समवायः स्वतंत्रः अपराधीनः संयोगवत् नापरसम्बन्धी तथाऽप्याधाराधेयनियमः समवायेऽस्ति। उदाहरणपूर्वकं विवृणोति॥ कथमिति= आधाराधेयनियमः कथं भवतीत्युत्तरं यच्छति। द्रव्येषु एव द्रव्यत्वं भवति न तु गुणकर्मणोः। गुणेषु एव गुणत्वं न तु द्रव्यगुणेषु। कर्मस्वेव कर्मत्वं भवति न तु द्रव्यगुणयोरित्येवमादि ज्ञातव्यम्। कस्मात् तत्र हेतुमाह अन्वयव्यतिरेकदर्शनात् अन्वयव्यतिरेकौ द्वौ एव दृष्टौ, तत्र द्रव्यत्वादिषु द्रव्यसमवायस्य द्रव्ये एवान्वयो न तु गुणकर्मसु। यथा यत्र २ द्रव्यत्वं तत्र २ द्रव्यमित्यन्वयः। यत्र २ द्रव्यत्वं न भवति तत्र २ द्रव्यत्वमपि न भवति इति व्यतिरेकः। द्रव्यत्वस्य गुणकर्माणि व्यतिरेकिणः सन्ति तस्मादन्वयव्यतिरेक

मू = इति न। आधाराधेयनियमात्। यद्यप्येकः समवायः सर्वत्र स्वतंत्रः तथाप्याधा
राधेयनियमोऽस्ति। कथम्। द्रव्येष्वेव द्रव्यत्वं गुणेष्वेव गुणत्वं कर्मस्वेव कर्म
त्वमिति एवमादि कस्मादन्वयव्यतिरेकदर्शनात्। इहेति समवायनिमित्तस्य
ज्ञानस्यान्वयदर्शनात् सर्वत्रैकः समवाय इति गम्यते। द्रव्यत्वादिनिमित्तानां
व्यतिरेकदर्शनात् प्रतिनियमो ज्ञायते॥ यथा कुण्डदध्नोः संयोगैकत्वे भवत्याश्रया
श्रयिभावनियमः। तथा द्रव्यत्वादीनामपि समवायैकत्वेऽपि व्यङ्ग्यव्यञ्जकशक्ति
भेदादाधाराधेयनियम इति॥

दर्शनात्। इह तन्तुषु पट इति समवायनिमित्तस्य द्रव्यत्वनिमित्तप्रत्ययस्य द्रव्ये एवान्वयप्रदर्शनं गुणत्वनिमित्तप्रत्ययस्य गुणे एवान्वयप्रदर्शनं कर्मत्वनिमित्तप्रत्ययस्य कर्मण्येवान्वयप्रदर्शनं भवति। तस्मात् सर्वत्रैक एव समवाय इति गम्यतेऽवबुध्यते। द्रव्यत्वादिनिमित्तानां व्यतिरेकोऽपि दृश्यते यथा द्रव्यत्वस्य द्रव्येऽन्वयो गुणकर्मभ्यो व्यतिरेकश्च। गुणत्वस्य गुणेऽन्वयः द्रव्यकर्मभ्यश्च व्यतिरेकः, एवं कर्मत्वस्य कर्मणि अन्वयः द्रव्यगुणेभ्यश्च व्यतिरेकः तद्दर्शनात् प्रतिनियमः द्रव्यत्वस्य द्रव्ये गुणत्वस्य गुणे कर्मत्वस्य कर्मणि नियमो ज्ञायते। दृष्टान्तं प्रदर्श्य समवायैकत्वसाधनेनोपसंहरति॥ यथेति= लोके कुण्डे दध्नि चैक एव यद्यपि संयोगः तथाऽपि कुण्डमेवाधारो दधि चाऽऽधेयभूतमिति आश्रयाश्रयिभावनियमः। तथाहि द्रव्यत्वादिषु समवायः एक एव यद्यपि तथाऽपि द्रव्यत्वादीनां व्यङ्ग्यव्यञ्जकशक्तिभेदात् द्रव्यत्वं व्यञ्जकम् द्रव्यं व्यङ्ग्यमेव द्रव्यत्वाभिव्यञ्जिका शक्ति द्रव्येष्वेवोपलभ्यते न गुणकर्मसु, एवं गुणत्वाभिव्यञ्जिका शक्तिः गुण एव न तु द्रव्यकर्मसु। कर्मत्वाऽभिव्यञ्जिका शक्तिः कर्मसु न द्रव्यगुणेषु। तेन द्रव्येष्वेव द्रव्यत्वं गुणेष्वेव गुणत्वं कर्मणि एव कर्मत्वम् तच्छक्तिद्वयभेदाद्द्रव्यत्वादिषु आधाराधेयनियमोऽपि वर्तते। द्रव्यमाधारो द्रव्यत्वमाधेयमेवं गुणकर्मस्वपि ज्ञेयमिति॥

समवायस्य नित्यत्वं प्रतिपादयति॥ सम्बन्ध्यनित्यत्वे इति= सम्बन्ध्यनित्यत्वेऽपि सम्बन्धोऽस्यास्तीति सम्बन्धी-संयोगसम्बन्धविशिष्टः सम्बन्धी यथाऽनित्यः तथा संयोगोऽप्यनित्यः। सम्बन्धिप्रणाशे यथा संयोगस्यानुपलब्धिः, न तथा समवायः, । यथा अनित्यत्वे सम्बन्धिनि विनष्टे, समवायस्य विनाशो न दृष्टः। तत्र हेतुमाह। भाववदकारणत्वात् यथा सामान्यमकारणकं दृष्टं तथा समवायोऽपि दृष्टस्तस्मात्। संयोगोत्पादे तत्सम्बन्धी समवायिकारणं दृष्टमतः समवायिकारणे प्रणष्टे संयोगस्य प्रणाशः। समवायस्य तु सम्बन्धिनौ न कारणम्। यथा येनप्रकारेण प्रमाणतः कारणेऽनुपलब्धे भावस्य सत्तायाः नित्यत्वं व्याख्यातम्। तथा समवायस्यापि न किञ्चिदपि कारणमुपलभ्यतेऽतः समवायोऽपि नित्य एव। द्रव्यादिषु समवायः कया वृत्त्या वर्तते इति पूर्वपक्षमाचष्टे॥ कयेति= कया वृत्त्या द्रव्यादिषु द्रव्यगुणकर्मसु समवायो वर्तते। संयोगवृत्त्या चेद्वर्तते तत्र, तन्न भवति। संयोगः गुण एव गुणः सर्वदा द्रव्ये वर्ततेऽतो गुणकर्मसु समवायो न भ

मू= सम्बन्ध्यनित्यत्वेऽपि न संयोगवदनित्यत्वं भाववदकारणत्वात्। यथा प्रमाणतः कारणानुपलब्धेः नित्यो भाव इत्युक्तम् तथा समवायोऽपीति। न ह्यस्य किञ्चित्कारणं प्रमाणतः उपलभ्यते इति। कया पुनर्वृत्त्या द्रव्यादिषु समवायः वर्तते। न संयोगः संभवति तस्य गुणत्वेन द्रव्याश्रितत्वात्। नापि समवायस्तस्यैकत्वात् न चान्या वृत्तिरस्तीति॥

विष्यतीति नाऽपि समवायरूपो भवितुमर्हति। समवाय एक एव न नाना, तस्मात् न चान्या वृत्तिः संयोगसमवायाभ्यां वृत्त्यन्तरं न चास्ति इत्यतः कया वृत्त्या तत्र द्रव्यादिषु समवायस्य निवास इति। अतो वृत्त्यभावात् न समवायो वर्तते इति निष्कर्षः॥

श्रीः श्रीः श्रीः

सिद्धान्तमुपवर्णयति ॥ नेति = वृत्त्यभावात् न समवायो वर्तते इति यदुक्तं तन्न भवति। कस्मात्। तादात्म्यात् अभेदस्वरूपत्वात् वृत्त्यात्मकत्वात् स्वत एवाऽयं वृत्तिरूपः। यथा द्रव्यगुणकर्मणां द्रव्ये गुणे कर्मणि च द्रव्यं सत् गुणः सन् कर्म सत् इति सत्तारूपः भावपदार्थो सामान्यपदार्थः वर्तते, नान्यः सत्तायोगोऽस्ति = तेषु कश्चिन्न सत्तान्तरयोगोऽस्ति। एवमित्थं प्रकारेण अविभागिनो विभागमप्राप्नुवतो वृत्त्यात्मकस्य स्ववृत्तिस्वरूपस्य समवायस्य नाऽन्या वृत्तिः न संयोगरूपा वृत्तिः न वा समवायान्तररूपा वृत्तिरस्ति तस्मात् स्वात्मवृत्तिः स्वात्मना स्वरूपेण वृत्तिर्भवति न वृत्त्यन्तरेणेति। समवायस्याप्रत्यक्षत्वमनुमेयत्वञ्च साधयति ॥ अत इति = अत एवाऽस्मात्कारणादेव अयं सम

मू = न तादात्म्यात्। यथा द्रव्यगुणकर्मणां सदात्मकस्य भावस्य नान्यः सत्तायोगोऽस्ति। एवमविभागिनो वृत्त्यात्मकस्य नान्या वृत्तिरस्ति। तस्मात् स्वात्मवृत्तिः। अत एवातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् स्वात्मगतसंवेदनाऽभावाच्च। तस्मादिह बुद्ध्यनुमेयः समवाय इति। इतिश्री प्रशस्तपादमुनिप्रणीते प्रशस्तपादभाष्ये समवायः पदार्थः समाप्तः ॥

वायोऽतीन्द्रियः बाह्येन्द्रियैः अप्रत्यक्षः। तत्र हेतुमाह। सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् = यथा सत्तादिपदार्थाः अप्रत्यक्षा तथा समवायस्यापि प्रत्यक्षेषु वृत्त्यभावः तस्मात् पुनश्च स्वात्मगतसंवेदनाऽभावात् = स्वात्मनि गता प्राप्ता या संवेदना ज्ञानं तस्य भावात् यथा इन्द्रियेण संयोगप्रतिभासो न तथा समवायप्रतिभासः। सम्बन्धिनोः पिण्डीभावोपलम्भात्। आत्मगतज्ञानेन अवबोध्यः इतियावत्। अतोऽयं बुद्ध्यनुमेयः बुद्ध्याऽनुमातुं योग्यः समवायोऽस्तीति सिद्धान्तः इतिश्री लैयावास्तव्यन्यायभूषणोपपदविशिष्टजगन्नाथशास्त्रिकृते न्यायभाष्यप्रकाशे समवायपदार्थः समाप्तः ॥

अन्त्यं नमस्कारं प्रदर्श्य ग्रन्थं समाप्नोति॥ योगाचारेति=यः कणभुक् कणादमुनिः योगाचारविभूत्या योगः चित्तवृत्तेः महेश्वरे धारणं तस्य यः आचारः व्यवहारः स एव विभूतिः धनं तया योगाचारविभूत्या महेश्वरं महाँश्चासौ ईश्वरः महेश्वरः तं महेश्वरं महादेवं तोषयित्वा तपसा प्रसन्नीकृत्य वैशेषिकं शास्त्रं द्रव्यगुणादिषट्पदार्थवर्णनात्मकं शास्त्रं चक्रे विदधे। तस्मै अजिह्म

मू= योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः॥१॥
इतिश्रीप्रशस्तपादमुनिप्रणीतं द्रव्यादिषट्पदा
र्थभाष्यं समाप्तम्॥श्रीरस्तु शुभमस्तु॥

ब्रह्माऽभ्यासदूरीकृतप्रमादाय उलूकरूपाय, महेश्वरप्राप्तद्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणपदार्थषट्करहस्यप्रपञ्चनपरकसूत्रसमुदायाय कणभुजे कणादाय मुनये नमोऽस्तु। यथा च वायुपुराणे पूर्वखण्ड २३ अध्याये न्यरूपि "अक्षपादः कणादश्च उलूको वत्स एव च॥ २०३॥ "योगात्मानो महात्मानो विमलाः शुद्धबुद्धयः। प्राप्य माहेश्वरं योगं रुद्रलोकं ततो गताः॥ २०४॥

वैवर्ण्यसौवर्ण्यसभाप्रभूता यल्लोकिहृद्या नयकन्दली या। नयाधिगन्तृव्रतिवृन्दसौख्यं कारुण्ययोग्यानतिशुद्धधीमान्॥१ कृत्स्नान् समध्यापयितुं प्रकाशं तस्या यथाऽयं बलदं सुदध्मः। व्यधायि काम्यं सुमनोऽभिरामं मया जगन्नाथसुविप्रजेन॥२"जगन्नाथः शास्त्री कुलमधिवसन्नेव विदधे जगल्लोकैर्दिक्लोवति बहुग्रामे वैक्रमसमे॥ जगद्रक्षाकृत्ये विहितपदयुग्माङ्कितमही जगद्राजीवाल्लमुपकृतिकरं सुष्ठगदितम्॥ रामसप्ताङ्कचन्द्रेऽब्दे शुचिमास्यसिते दले। पञ्चम्यां भौमघस्रे च ग्रन्थः पूर्तिमगादयम्॥४॥ इतिश्री मुज़फ़्फ़रगढप्रान्तान्तर्गततैयावास्तव्यन्यायभूषणोपपदविशिष्टजगन्नाथशास्त्रिकृतः प्रशस्तपादभाष्यस्य भाष्यप्रकाशः समाप्तः। श्रीरस्तु शुभमस्तु॥